१. A. विजित। २. A. लांसुरपुरः। ३. D. दुरंदिगात। ४. A. त। ५. D. पणींद्रः। ६. D. न। ७. D. चीनि। ८. D. रा। ९. D. र्जितमु। १०. A. मुं। ११. A. स्फु। १२. D. धरस्य रे। १३. D. घे चरितो। १४. D. घन इव भवतात्। १५. A. तन्वी। १६. D. तवति। १७. D. स्पंकृतौ। १८. A. सपूभिं। १९. D. श्च स्तुतपदयुगलः for श्चक्रयुतै...स्तुतपदयुगलः। २०. D. सामध्वनि मुखरमहैः। २१. D. त्ति। २२. A. तुष्यद्ध्रंत्तिशतसहस्र। २३. D. स्तौततुष्कमस्मृतं क्रौंचपदामिधं। २४. D. त्ति। २५. A. मद्रिय। २६. D. स्त। २७. D. क्लिप्त। २८. A. कै। २९. D. स्रोत। ३०. D. खिरहृदयभिदां। ३१. A. रं।

CC0. In Public Domain, Digitizagtion by eGangotri

निर्जरनारी (लोचन) नीलोत्पलवनविकसनसकलहिमकरः
श्रीपतिशङ्खः पातु स[1] युष्मान्दर[2] विकसितदलनवकुमुदनिभः ॥२३८॥

मकारश्च नकाराणां षट्कं सश्च गुरुद्वयम् ।
वृत्तं [3]नवर्तुषड्बाणयतिः(ति) स्यादपवाहकम्[4] ॥ २३९ ॥

यन्ना[5]भीनलिनवसतिरुप(र)चयति भुवननिचय[6]मिम[7]मश्रान्त(न्तो)
[8]दुर्लक्ष्यं जगति [9]सुकृत(मसुकृत)मपि करतलगतमिव जानानः ।
दिश्याद्वः श्रियम[10] वित(र)तमधुर[11]सकलनगरयुवतिकृतसङ्गीतः
शौरिः स [12]प्रमदन(म)मलसुरवनहृदि विदधति स[13]मर (शमति)
विश्राणः ॥ २४० ॥

छन्दोभेदेन वृत्तानां दर्शितेयमुदाहृतिः ।
भूलोकमल्लदेवेन शास्त्रछन्दानु(छन्दःशास्त्रानु)वर्तिना ॥ २४१ ॥

वृत्ता[14]वान्तरभेदानामानन्त्यान्न प्रकीर्तितम् ।
लक्ष्यलक्षणयोर्जातं [15]ग्रन्थविस्तारभीतितः ॥ २४२ ॥

वृत्तनामाङ्कितं वृत्तं [16]दातव्यमिति केचन ।
प्रवदन्ति प्रयत्नेन [17]मा(म)तङ्गस्य च तन्मतम् ॥ २४३ ॥

[18]यत्र रेफो जकारश्च [19]त्रीन्वा[20]रानन्तरान्तरा ।
गुरुर्लघुश्च पर्यन्ते तद्वृत्तं वृत्तमुच्यते ॥ २४४ ॥

वच(वेध)सा मनोहरस्वर[21]स्तवायो(वाय)गीयमान(वृत्त)साम
राजते जगत्त्रयेऽपि यस्य [22]दुष्टदैत्यवंशदाहि धाम ।
सर्वपापहारि पावनं [23]हरेः[24] सदा स्मरामि तस्य नाम
कीर्तयामि [25]वाद्भुतं चरित्रमस्यविष्टपत्रयी[26]ललाम[27] ॥ २४५ ॥

---

१. D. drops this स । २. D. र । ३. A. नर्तुषड्बाण D. नवर्तुषड्बाणा । ४. D. का । ५. A. न्रा । ६. A. धय । ७. D. मंश्रांत । ८. D दुक्ष्यं । ९. A. D. सुकृतमपि । १०. D. वितमरनकलसकलयु । ११. A. गरसकलयुवति । १२. D. ममखिलसुरवरहृदि । १३. D. शमतिबिभ्राणं । १४. A. न । १५. D. ग्रथं विस्तर । १६. A. पाद । १७. A. मतंगत्यंतरांतरं । १८. A. यत्रेफो । १९. A. त्रिवारानन्तरा । २०. D. रांनंतरं । २१. D. रंतवये गीयते स्म यस्य नाम । २२. A. दृष्टांदैत्य । २३. D. नं । २४. A. रे । २५. D. चा । २६. A. ये । २७. A. मः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृत्त[1] वृत्तस्य लक्ष्ये(क्ष्मे)दं दर्शितं लक्ष्यसंयुतम् ।
सोमभूपेन शिक्षार्थं गीत[2] विद्यावतां नृणाम् ॥ २४६ ॥

पदानां नियमो नास्ति छन्दो यत्र न विद्यते ।
समास[3] पदभूयिष्ठं तत्तु गद्यं निगद्यते ॥ २४७ ॥

अतसीपुष्पप्र[4] करसमानकायकान्ति उ(न्त्यु)त्सङ्ग[5] विष्टरो[6] पविष्ट-
लक्ष्मीलोललोचना(न)चारु[7] चषकपेपीयमानागण्यलावण्यपीयूष-[8]
रसविरस अ(सा)मृतकरबिम्बविडम्बिना[9] कम्बुना विलूनबाण-
बाहुचक्रेण[10] चक्रेणप्रतिहतत्रिदिवपतिपरिपन्थिभुजो-
द्धद[11] मदोत्कटगदया (गदया) जनित[12] निखिलना[13] कनायकनिकाय-
कामिनीनयनानन्देन(नारविन्देन)विराजमानकरचतुष्टयमय-
स्तम्भविभ्रमभुजदण्डमण्डल[14] माखण्डलपुरःसुरा(सर)सुरसहस्र-
(स)मभ्यर्चितपादपद्मयुगलम् अ(म)नि[15] शमशेषत्रिभुवनत्राण-
परायण[16] नारायण[17] महर[18] हरर्चयन्ताम् (रर्चयतां)जपतां
ध्यायतां[19] ध्यायिनां (च) भूयो भूयो भवभीषणभूमि-
विश्रान्तयो न भवन्ति (भवन्ति भवन्ति) च विलासविभव-
[20] विजितजम्भारातिविभूतयो भूतयः ॥ २४८ ॥

तद्गद्यं[21] स्वरसंयुक्तं तालेन च विवर्जितम् ।
[22] वर्णनीयाल्प(यस्य)नाम्ना त (य)त्प्रान्ततालेन गीयते ॥ २४९ ॥

म[23] गणद्वयमादौ स्या[24] द्रगणैः सप्तभि[25] र्युतम् ।
[26] इत्यादि पादैर्बहुभिर्दण्डकः परिकीर्ति[27] तः ॥ २५० ॥

---

१. A. त्त । २. D. वाद्यार्थिनां । ३. D. बाहुलं यत्र तत् गद्यं निगद्यते । ४. D. स । ५. A. त्सेग । ६. A. नो । ७. D. रुच पेपी । ८. A. रविसर । ९. D. ना विलूल । १०. D. णप्रतिह्र । ११. A. र । १२. D. drops this तनि । १३ A. drops this नाक । १४. D. लपुरः सरः सरसुर । १५. A. अभीश । १६. A. drops नारायण । १७. A. स । १८. D. हभ-जतां जपतां । १९. A. D. तां च । २०. D. विवर्जितजम्भा । २१. D. स । २२. D. वर्ण्-नीयमनाम्ना तत्प्रांते तालेन गीयते । २३. A. म । २४. A. द्र । २५. A. स्ततः । २६. D. स्त-नंत इत्यादि पादैर्बहुभिः । २७. A. त्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अजमजरमजस्रतेजस्विनं चिन्तयन्तीह यं तापसाः क्वापि पुण्य[1]पदे
[2]नियमितमनसः स्थिरीभूतभूतेन्द्रियाः क्षान्तिभाजःसमीभूत-
भृका[3]ञ्चना-।
रुचिरचितसुरायुधं बिभ्रतं विभ्रमादर्शमम्भोधि[4]जायाहृदा कौस्तु-
भम्(भं)
[5]हरिमघसमाश्रयसे (हरिमहरहमाश्रये) ज्यायसे श्रेयसे भूषणं
भूर्भुवः स्वस्त्रैलोक्यस्य ताम् (त्रिलोकस्य तम्) ॥ २५१ ॥

अयं तालैः[6] स्वरैर्युक्तो मध्येपादं विराजितः।
पुनः पदसमायुक्तो गातव्यो दण्डको बुधैः ॥ २५२ ॥

[7]अन्तरा स्वरविन्यासं तालेनैकेन के[8]नचित्।
गेयं नाम ततो गीत्वा ग्रहेण परिमुच्यते ॥ २५३ ॥

आद्यै[9] द्वादश मात्राः स्युर्दशाष्टौ च ततः परम्।
ततश्च द्वे दशार्यां या(यां) [10]तुर्ये पञ्चदशैव च(च) ॥ २५४ ॥

दलयतु दुरितमशेषं युष्माकं कंसवैरिणश्चक्रम्।
यद्दैत्यकण्ठविपिनं छिन्द[11]दपि न जायते कुण्ठम् ॥ २५५ ॥

आर्यालक्षणसंयुक्ता गाथा प्राकृतभाषया।
गीयते पूर्ववद्रम्या छन्दोलक्षणवेदिभिः ॥ २५६ ॥

यो[12] सूसोरारुद्ध(द्ध)ज अलंलच्छीणाहस्सणमहभञ्जीये।
जं सुमरिऊँण याचहृ(पद्रु)भोन्स्वशिरैःसंनिभतस्वोविरयो ॥ २५७ ॥

[13]त्रयो गु(ग)णा गुरुश्चा(रू चा)न्ते प्रथमेऽथ तृतीयके।
द्वितीये च तुरीये च द्वौ गणौ च [14]गुरू तथा ॥ २५८ ॥

जगणो नात्र कर्तव्यो भागान्ते यमकं भवेत्।
इति द्विपथकं नाम तस्योदाहृतिरुच्यते ॥ २५९ ॥

---

१. D. पाद। २. D. droqs this नि। ३. D. कांतवना। ४. D. धिया। ५. D. हरिं मेघश्यामनाश्रयसे भूषणं। ६. D. लः। ७. This श्लोक comes after the following four lines in the mss.। ८. D. कुत्र। ९. A. र्धाय। १०. A. छुर्यें। ११. A. न्न। १२. D. पोजूसे रारुद्ध जुअलं छीगा हस्सण महञ्जीये। जं सुमारेजण पावहमोस्वसिरिसतिभुन्स्वोपि। १३. A. गुणा। १४. A. तुरी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुवलयकिसलयकान्तिर्वः सौख्यं वितरतु विष्णुः ।
त्रिभुवनसम्भवपरिरक्षासंहरणप्रभविष्णुः ॥ २६० ॥

[1]गातव्या(व्यः)स्वरसंयुक्तस्तालेन परिवर्जिताः(तः)।
प्रबन्धो द्विपथाभिज्ञो[2] गीतविद्याविशारदैः ॥ २६१ ॥

[3]भकारत्रयसंयुक्तं गुरु[4]द्वयसमन्वितम् ।
पादैश्चतुर्भिर्गदितं दोधकं वृत्तमुच्यते ॥ २६२ ॥

नौमि [5]पदाम्बुरुहद्वितयं ते[6]
माधव बाधितदैत्यकुटुम्ब[7] ।
येन [8]सरामि भवाम्बुधि[9]पारम्(रं)
दुस्तरमस्तसमस्तविकल्पम् ॥ २६३ ॥

[10]पदान्ते स्वरसंयुक्तं [11]वर्ण्यं(पर्यं)नामविभूषितम् ।
येन केनाऽपि तालेन गातव्यं दोधकं बुधैः ॥ २६४ ॥

चतुर्भि(र्भिः)सगणैर्युक्तं यस्य पादचतुष्टयम् ।
प्राकृतैः संस्कृतै[12]र्वापि ज्ञेयं दोधक(तोटक)मुत्तमम् ॥ २६५ ॥

अतिवामनरूपधरस्य हरे(रेः सदृशौ)र्नध[13]राधरवारिनिधिः(धी)।
पदमात्र[14]ममुष्यगुणान् कथयेकरमुंकथम(येयुरमी मनुजाः
कथम-)ल्पधियः ॥ २६६ ॥

येन केनाऽपि तालेन रागेणाभीप्सितेन च ।
गातव्यस्ता(स्तो)टको[15] नाम प्रबन्धो[16] गीतवेदिभिः ॥ २६७ ॥

यत्र षोडश मात्राः स्युः प्रतिपादं चतुर्ष्वपि[17] ।
प्रान्तेषु यम[18]कुम्भेक(कश्चैक)मतिला[19]सा(डिल्ला सा)
प्रकीर्तिता ॥ २६८ ॥

सोमणिवं परम[20]पुंडरीकं सेवदं[21]णिस्समेक पुंडरीअं ।
[22]अविसंगरणिज्जिअ पुंडरीअ ॥ २६९ ॥

---

१. D. गंतव्यः । २. A. ख्यो । ३. A ज । ४. D. त्रय । ५. A. पा । ६. A. तो । ७. A. टुंबः । ८. A. न । ९. A. द्वि । १०. A. पा । ११. A. र्ण्यं । १२. D. तैः र्वा । १३. A. रस्य हरेर्न धराधरवारिनिधिः । १४ D. त्रु । १५. A. कौ । १६. A. द्वो । १७. A. र्थं । १८. D. कुंभै । १९. D. ल्ला । २०. D. drops this म । २१. A. हरिस्वमेवहणिस्वमेक पुंडरीअ । २२. A. विसंगिरस्तिजिअ पुंडरीअं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादद्वये तत्रार्द्ध(तथाद्यार्धं)भिन्नार्थ(र्थं)परिवर्तते ।
ततः पादद्वये चान्ये द्व(ऽन्यस्मिन्न)डिल्लाया विवर्तते ॥ २७० ॥

रेहइ पुल्लसरोरुह वयणो णम्मकहासु विसद्द[1]कवयणो ।
लीलाविभ्रमरंजिअरामो सौममहीवै (वइ) संगररामो ॥ २७१ ॥

[2]आदल्ला च लघुनैकेन संयुतो नडिल्लाङ्कुचन[3]जानैकेन संयुते ।
वर्ण्यनामसमायुक्ते गेये प्राकृतभाषया ॥ २७२ ॥

षट्कलो गण आद्यः स्यात् ततः[4] पञ्चचतुष्कलाः[5] ।
अन्तेगुरु[6]र्द्वितीये जः (च) षष्ठे (पादे) च द्विपदी तु सा. ॥ २७३ ॥

भवजल(नि)धिदूषितमकरौघ[7]निरन्तरं(र)दन्तुरान्तरम्(रं)
[8]विषयविशेषभोगविरहानलहेति नितान्तभीषण[9]म् ।
निरवधिबोधसेतुपरिकल्पनकोविदखिन्नमानसो
मुहुरहमुत्तितीर्षुरनिशं भगवत्पदयोः स्मरामि ते[10] ॥ २७४ ॥

[11]पादद्वयान्ते कर्तव्यः स्वरन्यासो यथोचितः ।
येन केनाऽपि तालेन गातव्या द्विपदी बुधैः ॥ २७५ ॥

लघ्वादि[12]षु गणेष्वादौ कर्तव्या[13]सधिके लघुः[14] ।
गुर्वादयः प्रकृत्यै[15](त्यै)व स्युरे[16]ते मान्मथा गणाः ॥ २७६ ॥

तत्राद्या[17]नां चतुर्णां च [18]पुरोरन्तस्य जायते ।
रतिसंज्ञामन[19]ङ्गेन गणैश्चत्वार ईरिताः ॥ २७७ ॥

आद्यद्वितीयौ[20] द्विग[21]णौ तृतीयस्तु[22] चतुर्गु(र्ग)णः ।
चतुर्थस्त्रि[23]गणः पादो [24]गणास्त्वे[25]कादशाधिकाः(धिका दश)॥२७८॥

[26]सरश्च दमन(षष्ठश्च दशम)श्चैव भवेत्कामप्रिया(यो)गणाः(णः) ।
शेषाः स्मरगणा यस्यांत्रिपदी सा निगद्यते ॥ २७९ ॥

---

१. A. च । २. A. अहिल्लावलधुनें । ३. A. ज्जा । ४. A. ततां च च । ५. D. लः । ६. A. द्वि । ७. A. द्यवतिरतदं तु । ८. A. दिषर्यावशेष D. विषभोग । ९. A. ण । १०. A. तत्पदद्वयम् । ११. A. तेन गीतेन । १२. D. द्विगणेष्वादौ । १३. D. व्यम । १४. D. घु । १५. A तै । १६. D. रसौ मन्मथा । १७. A. द्यादीनां । १८. D. गु । १९. D. ज्ञागेन । २०. A. यो । २१. A. गुणस्तृ । २२. A. श्च । २३. A. गु । २४. A. दौ । २५. A. स्ते-कादशा । २६. A. षट्श्च D these four lines are dropped in D ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेदनी वर्णे सल्लूका दियणुमीनागिवेदवोत्तगेय ।
गिपने लतदेकदवन पादंगलिगे महिमेयम् ॥ २८० ॥

द्वितीयमक्षरं पादे प्राणाक्षरमिति स्मृत[1]म् ।
पादेष्वावर्तते[2] तत्तु स्वरस्य नियमो नहि ॥ २८१ ॥

आद्यं[3] पादद्वयं गीत्वा किञ्चिच्छेदं तृतीयकम् ।
तृतीयं पुनरावर्त्य चतुर्थं परिगीयते ॥ २८२ ॥

मात्रा षोडश पात्रं[4] स्याद्य(देस्युर्य)दि वाप्येकविंशतिः ।
चतुर्विंशतिसंख्या वा चतु[5]ष्पादा चतु[6]ष्पदा(तुष्पदी) ॥ २८३ ॥

[7]सुरगिरगिरह्व असूड इतलुतिर्दसुरकुजदुर्यलेरिमिक्क ।
सुरविलासिनि परोलडुदाडि दरुहरिअंयं कामाले गला ॥ २८४ ॥

येन केनाऽपि तालेन रागेणभिमतेन च ।
गीयते स्वरसंयुक्ता[8] गीतज्ञैश्च चतुष्पदी ॥ २८५ ॥

गणानां कामसंज्ञानां[9] चतुर्णां पुरतो गुरुः ।
अष्टानां लघवस्तद्व[10]द् गणाः षोडषबाणकाः[11] ॥ २८६ ॥

पादे पादे तु कर्तव्यौ द्वौ गणौ मान्मथ[12] स्त्रिषु ।
अन्ते बाणस्तु षड्व[13](ड्व) द्यास्तुत्तरार्धे (र्द्धे) तथैव च ॥ २८७ ॥

[14]गडणादि तुरगन मेडेचर्णिगलदीप्तिः ।
गेडे गोंडतमगेश्विचारतियासोदिर्गल पोले ।
पातु लुगडतो लिह्री विषुकु इति केन मंगिस्वसंसिद्धिय ॥ २८८ ॥

कर्णाटभाषया गे[15]या गेप्राणाक्षरसमन्विता ।
[16]षट्पदी तालरहिता सानुप्रासा कथात्मिका ॥ २८९ ॥

---

१. A. त । २. A. ने नस्तु । ३. D. द्य । ४. A. दःस्या । ५. A. तुःपा । ६ A. तुःपदी । ७. D. सुरगिरिय अमूडि ईतलु तिदरिमकः । सुरविलासिचरोलिहुद्दाडिदरुहरि अमाले गलः । ८. D. क्तो । ९. D. नाच्च । १०. D. द्वद्‌गंणः । ११. D. जाः । १२. D. थो त्रिषु । १३. A. द्व । १४. D. गडणदिंदुरगणपेडे वर्णिगलदीप्ति । गेडेगोडुं तभगेत्तिवारतिथासो डिर्गलपालिपालुगडलो- लिर्हाविष्णुकुइतिके.नमगिगस्तसंसिद्धय । १५ D. drops गेयागे । १६. D. षड्वालरहिता सानु सानुप्रासा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रथमे द्वादश मात्राःस्युर्द्वितीये विंशतिस्तथा ।
[1]पादेऽस्यामुत्तरार्द्धे च कुन्द इत्यभिधीयते ॥ २९० ॥

कौ[2]स्तुभरुचियन्तंन्कुरदोल्लु केःणुगिल पोणेरय विद्या च वियंनि-
रेपतरंजियसुरगुरुपरिवृन्दने मगीगे विष्णुर्बेडिदचरमी ॥ २९१ ॥

[3]स तालशून्यः पदैश्च तिरुद्वैश्च समन्वितः ।
कर्णाटभाषयैवासौ गीयते कन्दसंज्ञः (ज्ञकः) ॥ २९२ ॥

कर्णाटभाषया यस्तु विरुदैश्च समन्वितः ।
गीयते वर्णतालेन स तु वर्णः प्रकीर्तितः ॥ २९३ ॥

प्रथमे च तृतीये च पञ्चमे तिथिसंज्ञया ।
[4]द्वितीये च तृतीये च मात्राभास्वरसंज्ञया ॥ २९४ ॥

इ(ई)[5]द्दकूपञ्चदशश्चान्ते दोहकेन समन्वितः ।
वस्तुनामा [6]प्रबन्धोऽयं मुनिभिः परिकीर्तितः ॥ २९५ ॥

[7]जेच्छतिहणुसयल्लुनिछिसे हुगम्भीरिं वजसमा परसपलकाल
सञ्चहिन विदूद्दुह ॥ नामाविहसत्वरि ॥ २९६ ॥

पघुची जोच्चिया गणिजूइसोदाणचक्कुल निर्दलघुद्दयण किय
आनन्दु । वृचुद्धोउक्खिउअ वहरउसलद्धिपर गोविंदु ॥ २९७ ॥

ईद्द[8]विध(ः)प्रबन्धोऽसौ[9] नाटकै[10]रपि गीयते ।
भरतो[11]क्तप्रकारेण नानारससमुद्भवः ॥ २९८ ॥

द्विपदी छन्दसा[12]र्धं च मर्धं (सारार्द्धमर्धं) तेनकसंयुतम् ।
पूर्वापरोक्तयोरत्र न पदे नियमो भवेत् ॥ २९९ ॥

पाञ्चजन्यसुदर्शनकमलकौमोदकीर्दधतः ।
कराः कंसारेस्तमालपल्लवरुचो रचयन्तु सुखानि वः[13] ॥ ३०० ॥

---

१. A. पदि । २. D. सिरिकौस्तुभरुचियंत न्रूरदोल्लुक्नोस्फुलिंगयोरपविद्यार्धावयंति । रपरिरंजिष-पुरगणपरद्दढनेमगीगे वेघुवेडि दवरमा । ३. D. drops these four lines । ४. A. drops this line । ५. A. दक्यं च पदश्वांते । ६. A. त्र । ७. D. जेच्छति हणुसयल्लुनिलिसेंहु गंभीरिवजः सपरसयल्सच्चहिनविद्धइ । नानाविहसत्परिसरिपञ्चीतुजोश्चियगणिहयिः सो दाणवकुलनिद्दुणु-दुहयणकियआणंद । वुद्धोदुक्किउ अवहरउसलञ्धिपइगोविंदु । ८. D. दग्विध । ९. D. यं । १०. D. के परिगीयते । ११. A. तेक्त । १२. D. सासार्धं । १३. D. वः । तेन्नकः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादाःषोडशमात्राः स्युर्द्वौ द्वौ च[1] प्राससंयुतौ ।
ईदृक्षैर्बहुभिः पादैः[2] कर्तव्या चच[3]री बुधैः ॥ ३०१ ॥

मधुरि[4]पुनायकु पह्लुतरसाहारकिसलयलकिवउः ।
विचकिलपरिमालाग्रोषुम्यौं ।
अलिकुलझङ्कारबहु[5]कुसुमैः कोइल कउ[6]रउ करइ ।
[7]सुहावउ तरणींह कुसु[8]मसररक्काखारउ हालकैं ।
नरवैकचुपविनसितालिहिछं देगारि पुडिज्जइ ।
कुङ्कुमसलिले नणुरंजइ तरुणियणिम्मदुरुणजिज्जयि ।
पठहिदो लउवडि खेलिज्जइ । जुवति हे चरण हं दिउदुपेल्लज्जइ ।
चंदणे अच इले वेणु किज्ज इमल्लि य मंजरि शिरे तुरुं
विज्जइसि अधु विश्व । अवरुड विज्जइनोभाहलनवसरूप
हरिज्जइकश्रूरमन्निपुमसिसे विज्जइ । रागे वसन्ते ।
पीउ गाइज्जइ हंसे तुलायिमुं । देसो विज्जइ । विरुलं
तउवाणि नाणिज्जै ॥ ३०२ ॥

रागो हिंदोलक[9]स्तत्र तालश्चैषात्र चर्चरी ।
वसन्तस्योत्सवे गेया स्फुटं प्राकृतभाषया ॥ ३०३ ॥

पदे सत्यं समादा[10]य विहाय यमकस्थितिम् ।
आवृत्या[11] क्रियते यस्तु चक्रतालः स कथ्यते ॥ ३०४ ॥

कमलाकुचकलश[12]केलिकल्पि[13]तकस्तूरिका[14]पत्रभङ्गम् (ङ्ग) ।
[15]पत्रभङ्गवि[16]षदानवपूतनाप्रलय[17]कारकः(कर) ।
करकलितसुदर्शना[18]नुगृहीतपुरन्दर ।

---

१. A. चाशेष । २. A. दौः । ३. A त्व ४. D. रितुमन्मथनायकु । यङ्गतउ २ । साहारकेसलयलखीउ । निरूतउ । चिंचकिलपरिमालालगनौयुम्यै । ५. D. हुसुमैं । ६ D. ल । ७. D. सु । ८. D. संभसरह ॥ हक्कारउ । होलहं नरवैकचुपवितइ । तालिहिंछंदेगारिजहाजवतिहिं चरणहिंदेदु-फलिज्जइ । वंदणअवणविवणुकिज्जइ । मल्लिमंजरिशिरेतुरुंविज्जइ । सिहधूविज्जइ मोत्राहलनवसरुपहिरिज्जइ । कशूरसत्तिसुशशिसेविज्जइ । कपूरसन्निसु शशि सेविज्जइ ॥ पिरुरुलंतउवणिमाणिज्जइ । ९. A. श्चैवस्तत्र-तालश्चैव । त्रयस्वरी चैवसंनस्योत्संजे गेया स्फुटं प्राकृतभाषया । १०. A. गेयविहायगमकस्थितिं । ११. A. त्य । १२. A. शेकेली । १३. D. ल्प । १४. A. यत्र भंगे । १५. A. सू । १६. A. घट्ट D. षदानवपृ । १७. D. यकरकलित । १८. A. नृ ।

मा. ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दरचकितभक्तजनवत्सल कौ[1]स्तुभप्र[2]भाजालसहस्ररचनाविदग्ध ।
दग्धनिखिलदुरित भगवन्नारायण नमस्ते ॥ ३०५ ॥

पद्यचक्रवालो यथा ।
[3]शशाङ्कलकलङ्किकुमुदम् ।
नवहते तिहि मकर ॥
करे तदसमं विलसितं ।
विजयते जयते तव यशः ॥ ३०६ ॥

गद्ये वा पद्यबन्धे वा वर्णनानान्तशोभितः ।
नादत्ते स्वरसंयुक्तो जेगीयते चक्रवालकः ॥ ३०७ ॥

गीयते जयतालेन जयशब्दादिकैः पदैः[4] ।
येन केनाऽपि रागेण सा भवेज्जय[5]मालिका ॥ ३०८ ॥

जय भुजपरिघो(घ)[6]धृतगोवर्धनधराधर
[7]जय कल्पान्तकालकेसरिकरालाकार कालियप्रलयकारि[8]न्
जय मधुवधूवदनविधुन्तुद
जय गोपीजननयननी[9]लोत्पलशीतक(कि)रण
जय मन्दरग्रावकषणनिर्मलीकृतके[10]यूरमणिभासुरभुजदण्डमण्डल
जय राहुवधूवैधव्यदीक्षादानदक्ष
जय नरकासुरकान्ताकठिन[11]कुचकलशकस्तूरिकास्था[12]सकाहारिन्
जय जठरकुहरनिक्षिप्तत्रिभुवन त्रायस्व देव लक्ष्मीपते[13] ॥ ३०९ ॥

मातृकाक्षरमेकैकं पदादौ विनियोज्य [14]च ।
वाञ्छितार्थं समायोज्य क्रियते मातृका[15]हि सा ॥ ३१० ॥

असौ शरण्यः शरणागता[16]नाम् ।
आकारमाहात्म्यपरास्तकामः[17] ॥

---

१. D. लग्नकौंसुंभ । २. A. माजमहस्तरचनाविखिल । ३. D. शशांक सकलं किरु मुदवनहते हिमकरे तदमं विजयते चक्रवालकः । ४. A. रैः । ५. A. पमाजिनी । ६. D. द्धतः । ७. D. drops this जय...कार । ८. D. रिशत । ९. A. नीलोत्पलवचनविलास D. नीलवर्नविकाश । १०. A. मणिकेयूरभासुरभुजदंडमंडल D. केयूरमणिकिरणभासुरमंडल । ११. A. नं कुचककलश । १२. A. श्वा । १३. A. तेः । १४. A. ह । १५. A. drops this । १६. A. नामाहात्म्यपरास्तकामः । १७. D. माः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इष्टार्थदायी[1] सततं प्रजाना[2]म् ।
ईशानकल्पः कलिकालजेता ॥ ३११ ॥

उदारनेपथ्यधरः परेषा[3]म् ।
उ(ऊ)ष्माण[4](मन्तं) शमयन् रणेषु ॥
(ऋत्विग्द्वि[5])जैराहिततिग्मतेजा ।
[6]एकातपत्रं कलयन्प्रभुत्व[7]म् ॥ ३१२ ॥

ऐश्वर्यवीरो हरिणेक्षणाना[8]म् ।
उष्ण(ओष्ठ)[9]प्रकम्पात्परसाप्त[10] झम्पः ॥
औदार्यवान् बिभ्रदपोढरागा[11]म् ।
अङ्के विपञ्चीमिव पक्ष्मल[12]क्ष्मीम् ॥ ३१३ ॥

[13]अङ्कनदि[14](अःकेनचि)न्नूनमसौ पृथिव्याम् ।
कृनावतारं(रः) किल कारणेन ॥
सोमेश्वरक्ष्मापतिरभ्रगङ्गा-।
तरङ्गसंस्पर्धिय[15]शाश्चकास्ति ॥ ३१४ ॥

ताला[16]नां नियमो नात्र न रा[17]गनिय[18]मस्तथा ।
प्रबन्धो मातृका [19]नाम स्वेच्छया परिगीयते ॥ ३१५ ॥

स्वरैः पाठैः (टैः) सविरुदैस्तालेन च समन्विता ।
कयापि भाषया क्लृ[20]प्ता यु[21]ग्मप्रासा नु पद्धली(तु पद्धडी) ॥ ३१६ ॥

जनित[22]कमलान[23]न्द प्रणत[24]सुरगोवि[25]न्द ।
दनुज[26]कुल[27]संहार [28]अघ(घ)कमलनीहार ।
भक्तजनभयहरण सुरसङ्घ[29]नतचरण ।
[30]पुण्यसञ्चयसदन सरसी[31]रुहनिभवदन ।

---

१. A. सी । २. A. नामीशान । ३. A षांमु । ४. A.D. मंतं । ५. A. त्सग्भिर्द्विज D. ऋग्विर्द्धि । ६. A. प । D. एकांत । ७. A. वं । ८. A. नामुष्ण । ९. A कपा । १० A. कंपः । ११ A. गामंके । १२. A. लाक्षीं । १३. A अः केनमसौ पृथिव्याः । १४. A. वि । १५. A. शश्च कीर्तिः । १६. A. त्रा । १७. A. म । १८. A त । १९. D. उलेन च समन्विता । २०. A ब्धा । २१. D. मेप्रासानपद्धली । २२. A. तः । २३. A. नंदः । २४. A. तः । २५ A. विदे । २६. A. जः । २७. A. ललसंहार । २८. A. मघ । २९. A. ना । ३०. A. पुंण्य । ३१. D. सि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नीलजलधरवर्णी[1](र्ण)मकरकुण्डलकर्ण ।
तरुणरविनिभचक्र स्वभुजपालितशक्र ।
हतदैत्यगणदर्प दमितकालियसर्प कंसभुजब[2]लनाना(श)दक्ष ॥ ३१७॥

ईदृक्[3] पध्दल(पध्दडि)का प्रान्ते स्वराः[4] पाठा[5](टा)श्च कोविदैः ।
तालेन संयुता गेया भाषया तु यया कया ॥ ३१८ ॥

स्वराणाञ्च पदानाञ्च नियमो नात्र विद्यते ।
नियमः प्रतिपाल(तालं)स्यादस्मिन्क्रौञ्चपदाभिधे ॥ ३१९ ॥

स्वरा[6]न्रागानुसारेण [7]पदादी(नि)ष्टार्थयोगतः ।
रचयित्वा प्रयत्नेन गेयं क्रौञ्चपदं[8] बुधैः ॥ ३२० ॥

[9]पदद्वय तेन(पदद्वयं प्रयत्नेन)समानगणसम्मितम् ।
संस्कृतं च तथा दे(श्यं)कार्यं हंसपदे बुधैः ॥ ३२१ ॥

जय निर्जितदुर्जयदानव जनार्दन[10] ।
भाकतिदेव सदामरासोधत्वशानिंपरकीलवर सूचु ॥ ३२२ ॥

अप(य)त्रैकः संस्कृतः पादस्तदन्यो देशभाषया ।
[11]गीयते प्राससंयुक्तः प्रोक्तो हंसपदाभिधः ॥ ३२३ ॥

पादोन[12]भजयैर्युक्तः कर्तव्यः स्वमनी[13]षया ।
पश्चात्स्वराः प्रयो[14]क्तव्याः प्रबन्धे कलहंसके ॥ ३२४ ॥

भुवन[15]धारण महाबल[16] विष्णो[17] ।
ईह[18]ग् लक्ष्मपदं [19]सर्व गा(गी)त्वा गाये[20]त्ततः स्वरा[21]न् ।
[22]झम्पातालेन मेधावी प्रबन्धे कलहंसके ॥ ३२५ ॥

तालद्वयसमायुक्तः पदपाटो[23]पशोभितः ।
पदैः प्रश्नोत्तरै[24]र्युक्तः स प्रोक्तः[25] शुकसारिकः ॥ ३२६ ॥

---

१. A. र्णि । २. D. वलचाणूरमदनामलन । ३. D. क् पद्धलीप्रांते । ४. A. रा । ५. A. टा । ६. A. न्नादा । ७. A. यदादि । ८. A. द । ९. D. drops these two lines । १० D. ना कंसासु गीयते प्राससंयुक्तप्रोक्तो हंसपदाभिधः । ११. A. गीतांतो । १२. A. थजपैं । १३. A. ती । १४. A. कर्तव्या प्रवंधि । १५. A. भावन । १६. A. लि । १७. D. ष्णोः । १८. A. दग्ल । १९. A. पूर्वं । २०. A. यंस्त । २१. A. राः । २२. A. पंपा । २३. D. दोप । A. टोय । २४. A. रे । २५. A. क्त ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बहिः कोऽयं चक्री चि(वि)तर[1]रुचिरां दोहनघटीं
हरिर्बाले [2]सिंह व्रज भज निजां[3] काननभुवम्।
मधुध्वंसी मुग्धे भवतु भवता [4]चे(जै)त्ररिपुणा
जितो गोपीवाक्यैरिति विजयते दैत्यम[5]थनः ॥ ३२७ ॥

गद्ये च पद्यबन्धे वा तालद्वयनियोजिता[6]।
प्रश्नोत्तरपदैः [7]पादैर्गेयं(या)स्याच्छुकसारिका ॥ ३२८ ॥

कर्णाटलाटभाषाभ्यां प्रश्नो[8]त्तरपदैर्युता।
गीयते सा(या)नु (तु)गीतज्ञैः सा [9]भवेच्छुकसारिका ॥ ३२९ ॥

पले लालीनीते [10]द्रुतहोल्लि वृत्तं हि दहे
[11]निदेनागेहे लानिल्लु हट पोतुं न जाणइ
माएतोदीनासा। छांडु छांडु [12]मयिजा इत्वं
वा गोपिदसुकुखेलण एने देहम् ॥
[13]निनेदात्तरिए गोविन्दने देहे एतगातनंतोशोतोह्मणि
कहामणि कहाम्हसि वाउलिपि नारायणु जगहकारा गोसांवी॥३३०॥

ईदृक्प्रश्नो[14]त्तरैर्युक्ता वाञ्छितार्थेऽभि[15]योजिता।
रसेन येन केनाऽपि गातव्या शुकसारिका ॥ ३३१ ॥

प्रथमा[16]र्धं स्वरैर्ज्ञेयं[17] द्वितीयं बिरुदैः पुनः।
हयलीला गणै[18]र्बध्दं हयलीलाक्रम(तथा?)[19]स्त्वयम् ॥ ३३२ ॥

हयलीला प्रकारेण भवे[20]द्या लक्षणान्विता।
तालेन गजलीलेन गजलीला[21]प्रकीर्त्यते ॥ ३३३ ॥

भवनाशकरं सकलार्तिहरं [22]प्रणमामि हरं भवदोषहरम् ॥ ३३४ ॥

---

१. A. विहित। २. A. सीह। ३. D. कां। ४. A. चित्र। ५. A. दमनः। ६. A. तं। ७. A. पाव्यौंयास्याछु। ८. A श्न्रै। ९ A. मिधौंशु। १०. D. ल्लिवुत होदेहे। ११. D. निंदेन गेलानिलु हंठं न जाणउ माएतोरीना स छांडु छाडु। १२. D. मई जाइ वो गोविंद सहखेलण एनेदेहो। १३. A. नीनीतेंद्रातरिए गोविंदे हें एत गात त तोरांतोहम्हिणिकाहांह्मणसि वाउलिपनायणु जगहकेरु गोसावि। १४. A. श्नो। १५. A. नि। १६. A. थं। १७. A. गेयं द्वितीयं गणैः पुनः। १८. A. गि। १९. A. स्वरम्। २०. A. वद्या। २१. A. लं। २२. A. शुभदं प्रणमामि हरं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गजलीलस्य तालस्य गणै[1]र्बध्दं पदं बुधैः ।
गी[2]यते यत्र गीतज्ञैर्गजलीला हि सा भवेत् ॥ ३३५ ॥

स्वरपा[3](प)दान्वितान(न्य)ष्टौ पदकानि भवन्ति चेत् ।
अष्टौ रागास्तथा तालाः स स्यात्स(श)रभलीलकः ॥ ३३६ ॥

देव निलोत्पलदलसमानकायकान्त[4](न्ते)
विहितसकलभक्तलोकदुरितशान्तः(न्ते)
इच्छामात्रजनितनिखिल[5] जगज्जन्य
करकमलतलकल्पित[6] पाञ्चजन्य ।
नाभिनलिनस्थपद्मासनस्तूयमान
पादस्पर्शपवित्रीकृतवैनते[7]यान
नाकिलोकनेत्रामृताय मानमूर्ते
तुभ्यं नमः प्रसाधितधवलकीर्ते ॥ ३३७ ॥

पदे पदे [8]भवेद्रागस्तालश्चान्यः[9] पदे पदे ।
पा[10]दान्तस्वरपादाभ्यां ज्ञेयं शरभलीलकम् ॥ ३३८ ॥

अनेकदेशभाषाभिः स्वरैः पादैश्च तेन्नकाः (न्नकैः) ।
चिंत्रिको(चित्रको)बहुतालैश्च विचित्र(ः)परिकीर्तितः ॥ ३३९ ॥

जेणे[11] रसातलउणु मत्स्यरूपे वेद आणियले मनु[12] शिवकवाणियले
तो संसारसा[13]य(ग)रतारण(णु)मोहं तो राखो(खो)नारायणु ॥
[14]कूर्मिनागिमन्दरमेवचद्मचेशालां नु
सुररिगममृतसाधिसि कोटदेवनेपगीगे वरजो सुवररूपे
पाथालुपैशिदाण तुहरिणकछ पुचमाचषिदाढ गोविन्द
धरणि उध्दरियम् सौदेउमन्दरदुहोच्छ उपचँडेनि श्रीनारसींहदै
हिंरण्यकशिपुरोस्सुगोह । वश्चिवंपे नादैचुटुं मनवलवेंडिका

---

१. D. द्धपरं । २. D. गा । ३. A. पदान्विताष्टौ D. पादा । ४. कांतितः । ५. A. स्व । ६. A. यांव । ७. A. तेयमान D. तेयान । ८. A. न चेद्रागता । ९. A. न्य । १०. A. पदांते स्वरपादाभ्यां गेयः सरलकः सदा । ११. D. णें । १२. D. मूसिवभ्याणियलें । १३. D. सायरसायरतणु महतेराखो नारायणु । १४ D कूर्मनाभिमंदरवेंचवेंनलांतुसुररिगभृतमंसाधि । सिक्रोद्दवनेगीगेवरवाजोसुखरुवेंपायलुपै सिदाणउ हरिणक्रसुमाचविं ॥ दाढगोंविंढं धरणिउद्धरियं । सोदेउमइवरदुहोउ पचँडेनिश्रीनारसिंहुदैत्यहिरण्यकशिपू । रांसुगोहत्राच्चिचंपेनादैवुंदु । मनवल वेडिक निनिच्चेडमं । यूवामनरूपुवेत्तिदैत्यबलिछ्लिति । भूमित्रेपरदहेन्निन्नेलूकसूधोमे । कम्मड्डकरुतु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निचंड मयुवामनु भूफलके त्रिदैत्युबलठिल्लिनि भूमित्रिपुर-
हृदेन्निवलूकसुधौ मेरस्मदुकारन्
जे[1] ब्रह्मणेरकुलेउपजीय्या कात्तवीया जेणे(य्याजुणेर)बाहुफरसे
खांडिया परसरा मुदे उतो महामङ्गल करउ ।
नन्दगोकुलम् । जायौ[2] कन्हुजो गो[3]वीजणे पडिहे
लीटे नयणें जोविया महणाधर आविनाह्मणि हक्कारिया
कन्हौभरडासौ अह्मों[4]णां चिंतिया देउ । बु[5]ध्दरूपें
जो दाणवसुरांव[6](वंच)डणि वेद[7]दूषण
बो[8]ल्लडणि माया मोहि[9]या तो[10] दे उमाझि पासाउ करु ॥ ३४० ॥

कल्किभू(र्भू)त्वा अश्व(त्वाश्व)मारुह्य[11] खड्गहस्त(स्तो)
जनसंहरणोद्यतः । नि[12]ष्कूपणः(निष्कोष)कृपणः(पाण)पाणिः
कारुण्यं निःकृ(ष्कृ)पोऽपिकरोतु मे ॥ ३४१ ॥

[13]पाठान्ये(ने)वंविधान्य[14](न)त्र प्रतिरागं नियोजयेत् ।
स्वरा[15]न् वर्ज्यान्परित्यज्य क्षिपेद्रागोचि[16]तान्स्वरान् ॥ ३४२ ॥

तालान् भिन्नाँस्तथा तत्र न्यसेत्तत्र पदे पदे ।
पादाँस्तालानुसारेण तेन्नका[17]न्यतिसंयुतान् ॥ ३४३ ॥

एवं कृत्वा पदन्यासं रागैस्तालैः समन्वितम् ।
स्वरैः पादैस्तथा [18]तेन्नैर्गतिव्योऽयं विचित्रकः[19] ॥ ३४४ ॥

भिन्नवृत्ति[20] स्त्रिभिः पादैः स्वरपादसमन्वितैः ।
तालत्रय[21] निबद्धश्चेत्रिभ[22]ङ्गी(ङ्गि)रभिधीयते ॥ ३४५ ॥

नीलनीररुहरो[23]चकमूर्तिः कौ[24]स्तुभद्युतिविराजितवक्षः (क्षाः) ।
पाञ्चजन्यपरिभूषितपाणि(णिः) [25]साचि(पात्वि)नांशुभ-
बलाक्य (लसितोत्पल)नाभः ॥३४६॥

---

१. जे व्राह्मणेरकुलें उपजियां कातवीर्या । ज्जणेराबाहु रसेंखांडियां । परशुरामुदेवु । शेमा हरममलकरउनंदगोउलं । २. A. यो । ३ D. गोवाजणें पडिहें ।। लोटें नयनें । ४ A णा । ५ A बुधरूपें । ६. D. पंचउणि । ७. A. दूषेण । ८. A. वो । ९. D. यिया । १०. A ना देउ मोझि पसुउ करु । ११. D. ह्यस्वरव । १२. D. निःकृपणःकारुण्यं । १३. D. पदान्ये । १४. D. न्यात्र । १५. D. रावर्ज्यात्परि । १६. D वितान् A. चितान् । १७. A. कांनति । १८. A. तोनै । १९. A. कम् । २०. A. त्तेःस्त्रि । २१. A. यं । २२. A. द्वंगी । २३. D. रेवकं मूर्त्ती A. रोचकमूर्तेः । २४. D. क्रो । २५. D. पाविरांशुसवल्कयनाभः ।

Dr. Urmila Sharma Collection, Varanasi

सृजसि देव जगन्ति रजोन्वि[1]तस्तदनुपालयसि स्फुटस[2]त्त्ववान् ।
अपि च[3] संहरसे[4] तमसावृतो[5] जगति चित्रमिदं[6] तव चेष्टितम् ॥३४७॥

नाभी[7]सरोरुहजुषा चतुराननेन
संस्तूयमानपदपङ्कजपुष्कराक्ष[8]
दुग्धाम्बुराशिभुजगाधिपभोगशायिन्
त्रायस्व मां दुरितनाश[9]कृते नमस्ते ॥ ३४८ ॥

एवं भिन्नै[10]स्त्रिभिर्वृत्तैः स्वरपादसमन्वितैः ।
कृत्वा पादत्रयं गेय[11]स्त्रिभङ्गिस्यात्त्रितालकः ॥ ३४९ ॥

अथवा भिन्नवृत्तस्थैः पादैरेव त्रिभिर्युतः ।
रच्यते पूर्वमार्गे[12](ण)तथापि स्यात् त्रिभङ्गिकः[13] ॥ ३५० ॥

अमरराज[14]शिखामणिरश्मिभी[15]रञ्जिता[16]ङ्घ्रिसरोरुहयुग्मकम् ।

वन्दे देवं त्रिभुवनगुरुं पावनं वासुदेवम् ॥ ३५१ ॥

भिन्नपादत्रय[17]स्येयमुदाहृतिरुदीरिता ।
[18]अर्थे रसे न नियमो वि(त्रि)विधेऽपि[19] त्रिभङ्गिनी(के) ॥ ३५२ ॥

चतुष्टयेन भाषायां(णां)ता[20]लरागचतुष्टयात् ।
विरच्यते प्रबन्धोऽयं[21] स[22]भव(वे)चतुरङ्गकः ॥ ३५३ ॥

[23]यः स्रष्टा चतुराननस्य विबुधस्त्राणैक[24]बध्दस्थितिः ।
[25]पदारविदरसलोकं दोदनीलप्यहे ॥
[26]जोगोची(पी)जणे गाह(इ)जे बहु परि रूपे निहीं ।
गोमयसैकः शेशनलेसु लघुशशजणभासवंकसे ॥ ३५४ ॥

भाषाभिः संस्कृताद्याभिरिति यो निर्मितो[27] भवेत् ।
अर्थे[28]न येन केनापि स गेयश्च[29]तुरङ्गकः ॥ ३५५ ॥

---

१. D. तः ॥ तद । २. A. सत्त्वान् । ३. D. स्व । ४. A. सि । ५. D. तः ॥ । ६. A. न । ७. D. भि । ८. D. क्षः । ९. A. कृ । १०. A त्ति । ११ A. यं गेयं त्रिभंगी स्या । १२. A गैंतथा स्यापि । १३ A. क । १४. A. जि । १५. A. भिरं । १६. D. तांस । १७. D. यस्यासु । १८. A अथ । १९. D. ना त्रिभंगिके । २०. A. त । २१. D. यः । २२. D. सर्वलोकैकरंजकः । २३. D. अष्टा च । २४. A. कजालाच्छिव : । २५ D जोलवी वयणारविंदभसल्लोकंदोदनीरुप्यहो । २६. D. जो गोवीजणें गाइजे वहुपरीं रूपीं तिन्हो गामय । शेकश्रेशमलेषुकश्चुराजंणे मालेदिशवंकशे । २७. A. ता । २८. D. अप्पेन A. अर्थेन केनापि । २९. A. स्व ।

CC0. In Public Domain, Digitizagtion by eGangotri

आदितालेन संयोज्य 'यत्र खण्डं चतुष्पदम्।
पदपा[2]ताष्टकाद्गेय[3]: सिंहविक्रान्तसंज्ञकः[4] ॥ ३५६ ॥

सुदर्शनदलितबाणबाहो शिरोमात्रावशेषीकृतराहो
निरवधिशा[5]स्त्रार्थोपदेशदक्ष सङ्गररङ्गदलितहिरण्याक्ष।
समुत्सारितपुरन्दरभय[6] विहितप्रणतजनपापक्षय
संसारपारावार[7]सन्तरणसेतो जय जय नाथ वैनतेयकेतो ॥ ३५७॥

सानुप्रासं पदद्वन्द्वं खण्डमेकं प्रकीर्त्यते।
'पदान्ते पा[8]ट[9]विन्यासैः सिंहविक्रान्तसंज्ञके[10] ॥ ३५८ ॥

[11]आश्रित्य कैशिकं रागंम(गम)नुप्रासमनोहरम्।
बद्धः पद्येन गद्येन द्वाभ्यां वा स(सं)युतं स्वरैः ॥ ३५९ ॥

---

१. D. प। A. यत्र खंडचतुष्टयं। २. A. दा। ३. A. यं। ४. A. कम्। ५. A. शार्थोपदेशसंगर। ६. A. यावहित। ७. A. रसंगन चरणसेतौ। ८ A. पा। ९. A. द। १०. A. कम्। ११. D. drops this and reads as follows :—

य(अ)त्यानन्दकरैः पाटैः पदैरुत्साहसूचकैः।
प्रतापवर्द्धनो रच्यः स्वरतेन्नकसंयुतः ॥ १ ॥

त्वया महा(ही) महो(हा)मत्स्यरूपधारिणा रसातलनिमग्ना
दंष्ट्राङ्कुरायेन(ग्रेण) समुद्धृता।
त्वया नरसिंहवपुषा कुलिशखरशिखराभिः (नखराभिः) किन्न
दारितं हिरण्यकशिपोरुरः (।)
तस्मात्स्वरस्वसात्मानं (त्सोदरस्यात्मनो)
राघव समाहूय पन्नगकुलभक्ष्यं तार्क्ष्यम्(क्ष्यं)
छिन्धि मेघनादप्रयुक्तान्नागपाशान्।
इति किल कृतप्रोत्साहनो रामः। (मःप्र)प्रणतमणिमुकुट-
घटिताञ्जलिपुटैः। स्व(सु)रगणैः तद्र(णैस्तत्क्ष)णात्स्मृतप्राप्तवैन-
तेयविघटितनिबिडनागनिगडबन्धः। (न्धः सो) सोत्साहे(ह)-
शौर्यगुणारम्भः। निशितदशाननादशरक्षतस्मात् (दशानन-
शाराद्रक्षा(क्षत्व)स्मान्) ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमुत्साहजनकैः पदैः पाठोपशोभितैः ।
इष्ट(ष्टे)नार्थेन रागेण बुधैस्तालेन भाषया ॥ ३ ॥

प्रतापवर्धनो गेय(यो) लक्ष्मज्ञैर्व(र्गे)यकारकैः ।
उदाहृतिरिति प्रोक्ता मानसोल्लासकार(रि)णा ॥ ४ ॥

अनुप्रासससमोपेतैः पदैस्तालेन संयुता ।
देशि(शी)कारपदैर्भव्या ज्ञेया मुक्तावली तु सा ॥ ५ ॥

अवडोंगरकडणिये वाजेवानादुसुम्मदीसइकालाहरिणुवेधं ।
धूसटसींगनादुजतुलं देवह्न परिवाजइ। गोवर्धनगिरिकंचरु
गहिरुणजइ।
सुरेंद्रहपणवाशिखियादेदयिनंदणकह्वदोहोवुकभ्रियरूपें सलकेणां
सावलिया गोउलिं वालियां पडिहेनयणां रन्हिकदेउं उवालिया॥६॥

सानुप्रासैः पदैरेतैर्ज्ञेया मुक्तावली तु सा ।
इष्टेनार्थेन तालेन रागेणाभीप्सितेन च ॥ ७ ॥

रच्यते विरुतै(विरुदै)रेव तालेनाभिमतेन च ।
वर्ण्यनामसमोपेता सा भवेदङ्कचारिणी ॥ ८ ॥

असुरकुलान्तकदैत्यवंशदावानल॥ बाणबाहुवनकुठार रावणान्तः।
(न्तःपु)पुररावण संसारसागर(सागरतारण)। यमलार्जुनप्रभञ्जन
मधुकैटभसूदन गोपीत(पीजन)नय नेन्दी(नयनेन्दी)वरचन्द्र
धर्मलताप्रसवकन्द बलिकुञ्जरबन्धनस्तम्भ त्रिदशगणकृतारम्भ
त्रिजगत्त्राण रक्ष मां देव नारायण ॥ ९ ॥

उदाहृतिरियं प्रोक्ता हरिमुद्दिश्य भक्तितः ।
सा गातव्येष्टतालेन विरुदैरङ्कचारिणा (णी) ॥ १० ॥

स्वराक्षराणि सङ्गृह्य वाञ्छितार्थो विरच्यते ।
क्रमाद्वा व्युत्क्रमाद्वा यः स स्वरार्थो निगद्यते ॥ ११ ॥

सम(मा)गमागम(मा)पापमादम(पाप)धानि(नीसमागमः) ।
धास(मा)नि(नी)मानि धा(मा)नि पापसन्निगमागमाः ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं स्वराक्षरैरर्थं निबध्य परिगीयते ।
स्वरार्थो गीय(त)तत्त्वज्ञैर्भाषया तु यया कया ॥ १३ ॥

धवलादिपदैः पादैराशीर्वादसमन्वितैः ।
छन्दसा येन केनापि कर्त्त(र्त)व्यो धवलाभिधः ॥ १४ ॥

धवलु हिमालउ धवलअयां(गंगा)धवलु एरावणु धवलु ।
चन्द्रु धवलु महेसरु । धवलु छत्रु अ(ब्र)म्हदेछपसने
धवलु जसु ॥ १५ ॥

आशीर्वादयुतैः पादैरीदृक् धवलपूर्वकैः ।
अनेन नियमेनायं गीयते धवलाभिधः ॥ १६ ॥

सुमङ्गलपथो(दो)पेतैः शुभैर्वाक्यैर्मनोरमैः ।
कैशिक्या बोट्टरागेव(ण) गेयं मङ्गलगीतकम् ॥ १७ ॥

दधिदूर्वाक्षतचूतपल्लवकनककलशमातुलुङ्गकमलस्वस्तिक-
नन्द्यावर्त्त(र्त)सितकुसुम वन्दनकुङ्कुमलाजादिमङ्गलद्रव्याणि
विप्राः पुण्यतमा योषितः महर्षयः देवमातरः नवग्रहा
लोकपालाश्च ब्रह्माविष्णुमहेश्वराः ।
एते प्रयच्छन्तु मम मङ्गलम् ॥ १८ ॥

उदाहृतिरियं प्रोक्ता प्रबन्धे मङ्गलाभिधे ।
प्रसा(शा)न्ताश्च त्रयः पादास्तालस्तत्र तृतीयकः ॥ १९ ॥

उविशब्देन सा चांते(चान्ते)कार्या स्यादोविका बुधैः ।
गोत्रलेंगोलिनिह्मंवि अचलुवलुतो मज्झपडिहे कन्नोसाचलू-
लादि(उ)विए ॥ २० ॥

सम्भोगे विप्रलम्भे वा शृङ्गारे रचितैः पदैः ।
हृदिस्थं प्रियमुद्दिश्य गेया स्यादिह गोधिका ॥ २१ ॥

इष्टतालेन गातव्यं सानुप्रासं पदद्वयम् (पदाधिकं) ।
इयमप्योविका प्रोक्ता प्रान्ते उविए(प)दं यदि ॥ २२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

येन केनापि तालेन पदैश्च बिरुदैस्तथा।
गद्ये वा पद(द्य)बन्धे वा वीरश्रीरिह बा(बो)ध्यते ॥ २३ ॥

अनेकदुर्ध्दरदैत्यदानवराक्षसक्षयकारिणं(न्)।
सृष्टिस्थित्यन्तकरणैकनिरतम्(त)।
अचिन्त्यं(न्त्य)भगवन्तमनन्तं(वन्ननन्त) त्रैलोक्यमोहसमर्थ
अति(र्थाति)निपुणं(ण)रावणान्तकम्(क)।
कंसासुरमर्दनं(न) मधुकैटभसूदनं(न) बलिबन्धविधायक जय देव
जगन्नाथ बलिसुखविधायक सुरत्राणकृतारम्भ मधुकैटभ-
सूदन ॥ २४ ॥

अनेनैव प्रकारेण पदेषु बिरि(रु)देषु च।
देवमुद्दिश्य भूपं वा वाञ्छितार्थेन गीयते ॥ २५ ॥

उदाहरणमाख्यातं वीरशृङ्गारकर्मणि।
भूलोकमल्लदेवेन क्षपिताशेषवैरिणा ॥ २६ ॥

पदैस्त(स्ते)नैश्च तालैश्च सङ्गतो यत्र गीयते।
प्रबन्धो ललितो नाम कथितः सोमभूभुजा ॥ २७ ॥

गोपीजननयनेन्दीवरवनविकासचन्द्र गोवर्धनोद्धरण
त्रातगोकुल गोविन्द बालक्रिडाकौतुकाद्भुतदर्शनजनितदेवकी-
हृदयानन्द जय देव भगवन् मुकुन्द ॥ २८ ॥

ईदृक् पदानि तेन्नाश्च तालमाननियोजिताः।
उदाहृतिरियं प्रोक्ता प्रबन्धे ललिताभिधे ॥ २९ ॥

स्वरैरेकः पदैरेको बिरुदैश्च तथापरः।
एवं खण्डत्रयं कार्यं स्वराङ्के तालसंयुतम् ॥ ३० ॥

अचिन्त्यो योगिभिश्चिन्त्यो निर्गुणोऽप्यगुणस्तथा
जयति भगवान् भक्तजनवत्सलः
श्रीवत्सलाञ्छन गोविन्द रावणमहाशैलकुलिश
घातककंसासुरगजपञ्चानन बाणदावानल हिरण्यकशिपूरु-
फलकविदारणचक्र ॥ ३१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं पदैश्च विरुदैर्दर्शितं खण्डयुग्मकम्
खण्डमाद्यं स्वरैर्गेयं एवं(यमेवं)खण्डत्रयं भवेत् ॥ ३२ ॥

अभीष्टं नायकं कृत्वा देवं वा वसुधाधिपम् ।
तालेन सङ्गतो गेयः स्वराङ्को व(गे)यकारकैः ॥ ३३ ॥

स्वरैः पदैस्तेनकैश्च यस्य खण्डत्रयं भवेत् ।
खण्डं च गमकोपेतं अ(तम)ङ्कध्वनिनिवा(रिती)रितम् ॥ ३४ ॥

आद्यं स्वराङ्कवद् गेयं खण्डयुग्मं मनीषिभिः ।
तृतीयं तेनकैर्गेयं चतुर्थं गमकैस्तथा ॥ ३५ ॥

उदाहरणमेतस्मिन्प्रबन्धैकध(न्धे क च)नोदितम् ।
दर्शितं सोमभूपेन मूढानां बोधकारिणा ॥ ३६ ॥

स्वरैश्चैव तथा पादैस्तनै(दैः पदै)स्तेनैस्तथाद्धकम् ।
क्रमेणैव चतुर्भागो गीयते स चतुर्मुखः ॥ ३७ ॥

अङ्कध्वनिप्रकारेण देयं खण्डत्रयं भवेत् ।
चतुर्थपादकैर्गीतैर्गमकास्तत्र वर्जिताः ॥ ३८ ॥

स्वरे(रैः) पदे(दैः) तथा पादे(दैः) विरुदैश्च पृथक् पृथक् ।
अन्तरात्ते(ते)न्नकोपेत(तः) पञ्चभङ्गी निगद्यते ॥ ३९ ॥

चतुर्मुखप्रकारेण गीयते तेनकैर्विना ।
विरुदास्तेन्नकस्थाने तेनकांशा(काश्चा)न्तरान्तरा ॥ ४० ॥

पञ्चभङ्गिप्रबन्धश्च(स्य) स्पर्शितं लक्षणं मया ।
विशेषः खण्डसन्धा(न्धी)नां तेनकाः परिकीर्तिताः ॥ ४१ ॥

श्रीविलासः स्वरादिः स्यात् श्री(च्छ्री)रङ्गः पाटपूर्वकः ।
पञ्चाननः पदादिः स्याद् बिरुदादिस्तु मातलिः ॥ ४२ ॥

तेन्नाधि(दि)रुपधिः प्रोक्तो गीतलक्षणवेदिभिः ।
एवं पञ्चप्रकारेण पञ्चभङ्गीः(ङ्गी) प्रदीयते ॥ ४३ ॥

काव्यजैर्गीतसम्भूतैर्योलङ्कैरैर्विरच्यते ।
अलङ्कारभवो यस्मात्तस्मात्प्रोक्तस्त(स्तु) मण्डनः ॥ ४४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतालङ्कारमार्गेण गीतमुत्पाद्य यत्नतः ।
उपमाद्यैरलङ्कारैर्गीते न्यस्य पदावलीम् ॥ ४५ ॥

यत्र गायति गीतज्ञः स भवेन्मण्डनाभिधः ।
इदं लक्षणमाख्यातं सोमेश्वरमहीभुजा ॥ ४६ ॥

शृङ्गारादिरसैर्योऽसावष्टभिः परिकल्पितः ।
क्रमेण व्युत्क्रमेणापि रससन्दोह उच्यते ॥ ४७ ॥

स्मरशरभरविशदराधाहृदय बालगोपाल चूलीक्रीडा-
विकू(क)लितः(त) । विकृतवदनदर्शनजनितहासकोष्ण-
नयनोदकस्नातमन्दोदरी । (रीप्र)प्रलापदीक्षित स्वा(स्वी)कृतभीरु-
भैरव पूर्वरचितसकलसंहारशास्त्रकोविद
प्रवर्तितसङ्गरसञ्जातविजय बहुबाहुशालिन् ।
देदीप्यमानसुदर्शनजातकम्पावसाददैत्यदयितासम्मोहकारिन्
गरदानप्रवृत्तपूतनास्तनपानव्याजकृष्टरुन्धिरा(धिर)वसामस्तिष्क-
पश्व(ङ्क)कलुषीकृतनन्दे(न्द)गोपगृहप्राङ्गण दुष्टदैत्येन्द्रस्तम्भा-
स्फालनमात्राविभू(र्भू)ताभूतपूर्वनरहरिर्व(व)पुर्विलोकनोत्पन्न-
रोमाञ्चकञ्चुकेशाश्रयाय प्रवर्तितबहुस्तोत्र य(जय)
देव नारायण ॥ ४८ ॥

शृङ्गारादिरसैः सर्वैरष्टभिर्यः प्रयोजितः ।
रससन्दोहनामा स प्रबन्धः परिगीयते ॥ ४९ ॥

नन्द्यावर्तश्चतुर्वृत्तः स्वस्तिकाचा(कश्चा)ष्टवृत्तकः ।
तालास्तत्सङ्ख्या योज्या गीतशास्त्रविशारदैः ॥ ५० ॥
गद्यैस्तालविहीनैश्च वृत्तैर्वा तालसङ्गतैः ।
रागैरनेकैः क्लृप्तोऽसौ भवेद्रागकबन्दकः (दम्बकः) ॥ ५१ ॥

गद्ये वा पद्यबन्धे वा रागेनै(णै)केन धीमता ।
तालैश्च बहुभिर्युक्तस्तालार्णव इतीरितः ॥ ५२ ॥

देवतास्तुतिसंयुक्तैः पादैश्चैव समाक्षरैः ।
बहुभिर्गीयते या तु सा भवेत्सर्व(स्तव)मञ्जरी ॥ ५३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नौमि नारायणं देवं त्रैलोक्यत्राणकारणम्।
नौमि नीलोत्पलछा(च्छा)यं क्षीरोदार्णवशायिनम्।
नौमि शङ्खगदापाणिं चक्रनीरजधारिणम्।
नौमि लक्ष्मीकुचाभोगकुङ्कुमारुणितं हरिम्।
नौमि गोपीसु(मु)खाम्भोजविकासनदिवाकरम्।
नौमि नित्यं सदानन्दं ज्ञानदर्शनलोचनम्।
नौमि मोक्षपरप्राप्तिकारकं भवतारकम्।
नौमि दैत्यवधूवर्गवक्त्राम्बुजनिशाकरम्।
नौमि दंष्ट्राङ्कुरप्रान्तसमुद्धृतवसुन्धरम्।
नौमि पादत्रयाक्रान्तनिःशेषभुवनत्रयम् ॥ ५४ ॥

उदितस्तवमञ्जर्यां पदानां कल्पनाक्रमः।
भूलोकमल्लदेवेन भुवनख्यातकीर्तिना ॥ ५५ ॥

पादैर्बहुविधैश्चैव विरुदाख्यानकैः पदैः।
कडुक्को नाम विख्यातस्तालरागो निजेच्छया ॥ ५६ ॥

अर्थश्चाध्यात्मिकः प्रासः पादद्वितयशोभनः।
उत्तरार्द्धभवे(र्द्धे भवे)देवं चर्या सा नु(तु) निगद्यते ॥ ५७ ॥

संसारसारुदत्तरें कायरहितें चंडिया।
कोहलोहमोहबहुकेणा भरिया।
इंद्रिदिपवणखरवेणवहंपि।
दुक्खियलाहरिहणि यतद्रि तपावधिः ॥ ५८ ॥

ईदृक् पदानि चत्वारि दर्शितानि मयाधुना।
अध्यात्मिकार्थयुक्तानि चर्यानाम्नि प्रबन्धके ॥ ५९ ॥

यतिः समासमात्रासु विषमासु न विद्यते।
गीयते तालयुग्मेन सा भवेत्(द्) ध्वनिकुट्टिनी ॥ ६० ॥

संसारतारणं जगत्कारणं त्रिदशपतिपालनं नौमि तं हरिम्।
दितिकुलसूदनं दनुजघातनं जलधिजलशायिनं नौमि हरिम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कंसवंशनाशकरण मनुजदेह वासुदेव मत्स्यकूर्मकालरौद्र-
वदन नरसिंहवामनाङ्गरामरामकृष्णवुद्धकल्किरूप देव
नमोऽस्तु ते ॥ ६१ ॥

एवमादिपदैर्भव्यैरिष्टेनार्थेन संयुता ।
भूलोकमल्लदेवेन वर्णिता ध्वनिकुट्टिनी ॥ ६२ ॥

अष्टाक्षरस्य पादस्य चत्वार्याद्याक्षराणि च ।
आवर्तते(न्ते) विलोमेन चतुष्पादेष्वयं क्रमः ॥ ६३ ॥

प्रथमस्य द्वितीयं तु द्वितीये प्रथमं भवेत् ।
तृतीयं तु तृतीयं(ये) च चतुर्थं तु तृती(तुरी)यके ॥ ६४ ॥

रामाकाममकारामा(मारा)म(मा)समाश्व(स्व) खमा(स्वमासमा) ।
कामासीय(म)मसीमाका मसूम (मस्वमक्ष) क्षमस्वम ॥ ६५ ॥

न रागतालनियमो विद्यतेऽत्र कदाचन ।
गीयते वर्णनैपथ्यात्सर्वतोभद्रसंज्ञकः ॥ ६६ ॥

पदमध्यस्थितं वर्णं गोपयित्वा तु गीयते ।
अक्षरच्युतकं नाम प्रौढे(ढै)रेव हि लक्ष्यते ॥ ६७ ॥

(एवं)न प्राप्य चात्यर्थं दुःखशक्ता स्तुतिर्यथा ।
यायत्तु(यत्नं)कुरु(म)हावुध्दे यया(था)र्थः सुखदो भवेत् ॥ ६८ ॥

यद्वा तद्वा भवे-(च्छ)न्दो भाषा वा या च काचन ।
अनन्वितमिवाभाति विना वर्णेन केनचित् ॥ ६९ ॥

यदि क्षिपेत्तु तद्वर्णं तदा भवति सङ्गतम् ।
अरूक्षराष्टिकं(अक्षरक्षिप्तकं) नाम कथितं सोमभूभुजा ॥ ७० ॥

मसपसरकं चेति खण्डनं पनं नकलकम्(चेति दनं पनं कलकं) ।
क्षेप(क्षिपै)कमक्षमक्षरत्वाद(मक्षरं त्वादा)वर्थव(त्तु)-
विधीयताम् ॥ ७१ ॥

गोपयित्वा हृदि स्वा(स्था)र्थं मध्दूमे(यद्रूपे) प्रश्नरूपतः ।
समस्तव्यस्तरूपेण तस्यैवोत्तरमुत्तरम् ॥ ७२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कः सेव्यः कः क्रतौ यः (गेयः) का स्थिरा (पा)ति क(कः) प्रियाम् ।
साम्प्रतं सत्यसन्धकः (न्धः कः) श्रीमत्सोममहीपतिः ॥ ७३ ॥

यस्यां रसेन वीरेण सङ्ग्रामचरितं जयः ।
गीयते बहुभिः पादै राहडी सा प्रकीर्तिता ॥ ७४ ॥

प्रथमे च तृतीये च कला भुवनसङ्ख्यया ।
द्वितीये च तुरीये च मात्राः स्युः सूर्यसङ्ख्यया ॥ ७५ ॥

द्वितीये च चतुर्थे च यमकप्रा(कं प्रा)न्ततो भवेत् ।
स दोहद इति ख्यातः कर्तव्यो लाटभाषया ॥ ७६ ॥

गोविनयनहजोरस्वैजो कंसखयकालु ।
सो अम्ह दुरिअइवहरउ कन्हभराडावालु ॥ ७७ ॥

पूर्वार्द्धं तालहीनस्तु गातव्यो ब(गे)यकारकैः ।
तालेन वाथ सम्पूर्णो दोहदं(दो) गीतवेदिभिः ॥ ७८ ॥

दोहदस्य तथा चार्थं(र्धं) पादद्वयविभाजि(वर्जि)तम् ।
द्वितीयं किञ्चिदावक्ष्ये(वर्त्ये) गातव्यं झम्बडाभिधम् ॥ ७९ ॥

दोहदस्य यदा चान्ते क्रियते डोल्लरीपदम् ।
डोल्लरी नाम सा प्रोक्ता गीयते लाटभाषया ॥ ८० ॥

सप्तविंशतिमात्राश्च त्रिषु पारसिरास्थितिः ।
आवर्तते द्वितीये तु तृतीये तु विमुच्यते ॥ ८१ ॥

भाषात्र लाटा विज्ञेया तौरुष्की प्राससंयुता ।
अभीप्सितौ तालरागौ कर्त्तव्यौ गीतवेदिभिः ॥ ८२ ॥

पदद्वयं तथा प्रान्ते ललितं च पदं यदि ।
गीयते मातु (सा तु) विख्याता लोल्ली प्राकृतभाषया ॥ ८३ ॥

एवं(कं) पदं तथा गीत्वा शृङ्गाररसभूषितम् ।
अन्ते देवानुसंयुक्तं ज्ञे(गे)यमेकपदं भवेत् ॥ ८४ ॥

निरचि(न्वि)तपदद्वन्द्वा सानुप्रासेन मण्डिता ।
अन्ते दन्तिपदोपेता हन्निगेया विचक्षणैः ॥ ८५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादैर्बहुविधैर्भव्यैस्तालेन च समन्वितः ।
वर्ण्यनामसमोपेतः कैवाडः परिगीयते ॥ ८६ ॥

उद्ग्राहो ध्रुवकश्चेति यत्र खण्डद्वयं भवेत् ।
स्वरैर्निरन्तरैर्गेयमादितालेन गायकैः ॥ ८७ ॥

वर्ण्यनाम तथाभागे (ऽभोगे) तदन्ते धृ(ध्रु)वकः पुनः ।
उद्ग्राहेण प्रमुच्येत स्वराख्यं करणं तु तत् ॥ ८८ ॥

तालेन करणाख्येन पादै(टै)र्मुरजसम्भवैः ।
स्वरैः प्रगीयते यत्तु तद् बन्धकरणं विदुः ॥ ८९ ॥

अनेनैव प्रकारेण हस्तपाटविराजि(वर्जि)तम् ।
तथा च स्वरसंयुक्तं तत्प्राकृतं पुनः पुनः ॥ ९० ॥

पाटस्थाने पदं कार्यं स्वराश्च विहितास्ततः ।
लक्षणं करणस्यैव पादादिकरणे भवेत् ॥ ९१ ॥

हस्तपादै(टै)स्तथा तेनैः पदस्वरसमन्वितः ।
गीयते तालयुक्तो यः स वर्णरस(सर)को भवेत् ॥ ९२ ॥

सङ्गीतं धातुकरणैः स्वरैरेवं हि गीयते ।
गातुर्वण(र्ण)स्य नाम स्यादाभोगे वर्तिनी तु सा ॥ ९३ ॥

प्रतितालो लघुर्मन्दः कङ्कालश्च कुकुट्टकः ।
पञ्चैते वर्णगीताः स्युर्वर्त्तन्यां त(न) द्रुतो लयः ॥ ९४ ॥

ऊद्ग्राहः पूर्वभागः स्यात्ततो मेलापको भवेत् ।
ततश्च धृ(ध्रु)वको ज्ञेयस्ततश्चाभोग इष्यते ॥ ९५ ॥

गीतयुद्धाह्य(मुद्ग्राह्य)ते तेन स उद्ग्राहः प्रकीर्त्तितः ।
उद्ग्राहो(ह)ध्रुवयोः सन्धिश्श्लेषान्मेलापको भवेत् ॥ ९६ ॥

पौनः पुण्या(न्या)त्(द्) ध्रुवत्वाच्च ध्रुवकः परिकीर्तितः ।
ध्रुवस्याभोगकरणादाभोग इति संज्ञितः ॥ ९७ ॥

अयं समस्तगीतेषु विधिः साधारणो मतः ।
मेलापकस्तथाभोग आहतौ चापि नाहतौ ॥ ९८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सानुप्रासपदद्वन्द्वं गमकस्तदनन्तरम् ।
ततो वर्णा(र्णा)दिपदकमेक उद्ग्राह उच्यते ॥ ९९ ॥

एवमुद्ग्राहयुगलं तृतीये च पदद्वयम् ।
गीतमालापको ज्ञेयो गमकैः समलङ्कृतः ॥ १०० ॥

ततश्च धृ(ध्रु)वको ज्ञेयो गणादिनियमोझि(ज्झि)तः ।
गीतनाम्ना समायुक्त आभोगो गीयते ततः ॥ १०१ ॥

गीत्वाभोगं पुनर्गेयो ध्रुवको ब(गे)यकारकैः ।
सर्वेषामेव तालानां धातूनां धातुसंज्ञितम् ॥ १०२ ॥

भूमिर्मो वारि यो ज्ञेयो हुतभुक्(ग्) यो(रो)निलस्तु सः ।
व्योम ते(तो)जो रविः प्रोक्तः शशिवो(र्मो)नस्त्रिविष्टपम् ॥१०३॥

सुधाकरगणाः पञ्च सुरालयगणा(ण)स्ततः ।
पदमेकमिदं प्रोक्तं सानुप्रासं तथापरम् ॥ १०४ ॥

इति पादत्रयं यस्यामेक(ला)नादावली(ती) तु सा ।
उदाहरणमेतस्याः कथ्यते सोमभूभुजा ॥ १०५ ॥

यौवनभूषितगौ(गो)पवधूमुखपद्ममधुकर श्यामल-
विग्रहकान्तिविनिर्जितनवजलधर देवकीनन्दन स(स्मे)रसरोरुह-
केसरसञ्चयपिञ्जरवसन केलिलसत्कमलानयनाम्बुज-
विभ्रमोभवनप्रदुग्धाब्धिकृतशयन । दलितपुण्डरीकनयन
कौस्तुभरत्नमरीचिकदम्बर्भासुर वरद पाहि पुरदर(न्दर)मन्दर ।
गीतसुखावहबिरुदपरम कुसुमशरजनज विमोहितनिखिलभुवन ।
उत्पत्तिस्थितिकारण प्रभो नारायण(।) असौ परमेश्वरदेव-
विरचिता एला नादावती ॥ १०६ ॥

एवं लक्षणमेतस्यामुदाहरण(मीदृशम्) ।
ईदृक्(ग्)रागेण सा नित्यं मन्दतालेन संयुता ॥ १०७ ॥

शृङ्गाररसमूमि(यि)ष्ठकैशिकीवृत्तिरञ्जिता ।
पाञ्चालीरीतिसंयुक्ता गेया नादावती बुधैः ॥ १०८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भारती देवता तस्या द्विजमुख्यकुलं भवेत्।
नादावत्या महान्नादो वर्णश्चे(श्वे)तश्च भाव्यते ॥ १०९॥

यत्र वह्निगणाः पञ्च षष्ठो वायुगणो भवेत्।
इदमेकं पदं चान्यत्सानुप्रासं च तादृशम् ॥ ११०॥

ईदृक्(ग्)रूपत्रया वेला गेया हंसवती बुधैः।
उदाहरणमेतस्याः कथ्यते सोमभूभुजा ॥ १११॥

रौद्रकाळा(ला)नलोद्वा(द्धा)सिखड्गप्रभातु(नु)शोभिता
(बा)हुलतारक्तप्रवाहारुणां मेदिनीं कुर्वता(ती) वितता
प्रा(भा)सुरकरिकरा भद्रावती भवेत् ॥ ११२॥

उदाहरणमेतस्याः कथ्यते सोमभूभुजा।
नानाकारैर्निराकारैर्नित्यं विकारितं दैत्येन्द्राणी(णा)मन्त्रस्नायुस्फिक्-
वसामज्जासृक्कर्षकारिप्रपातपूतनालोहेन ताटकार्पिता॥
शक्रस्त्रीनामात्यन्तायार्त्ता(र्ता)नां श्रृणु नाक्रंदानमन्दातुलिंप(म्प)न्
रक्तकिशिक्षोदोद्भूतैर्गोपीगोदानुकदावानलगोपीतगोपी-
निशान्ता॥ काश्मीरौघच्छायामच्छारक्तामारैः कुर्वाणः स्वकाये
बालादित्याः ता(स्ता)म्राकाराः शौरे त्वं त्राणं भूपा(या)व्यपाये सभा
मे हिरण्यकशिपुरुधिरालिप्तशरीर ढणे(छि)न्नसूर्पन(शूर्पण)-
खाश्रवणनासिकां(क) (अङ्)गी(कृ)तसंसारव्यतिकर आपादि-
तथा(पा)पि(ज)ननरका(क)देव दामोदर सोमेश्वरदेवविरचिता
एला भद्रावती॥ एवं लक्षणमेतस्यामुदाहरणमीदृशम् ॥ ११३॥

ककुभेन प्रसूतव्या कङ्कालख्य(स्ता)ल इष्यते।
बीभत्सस्तु रसस्तस्या भारती वृत्तिरिष्यते ॥ ११४॥

वैदर्भरीत्या गातव्या एला भद्रावती वरा।
वाराही देवता चास्याः कुलं शूद्रसमुद्भवम् ॥ ११५॥

एला भद्रावती ध्येया कृष्णवर्णोपशोभिता।
(एवं) चतस्रः कथिता गगैला लक्षणान्विता(:) ॥ ११६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मात्रैलाश्च चतस्रः स्युस्तासां वक्ष्यामि लक्षणम्।
पदं षण्मात्रमेकं स्याद् द्वितीयं पञ्चमात्रिकम् ॥ ११७॥

अनुप्रासस्त(स)मोपेतः पादः प्रथममी(ई)रितः।
एवंविधो द्वितीयः स्यात्तृतीयो दशमात्रकः ॥ ११८॥

अनुप्रासेन संयुक्तं पङ्क्तिभिश्च यथा पदैः।
विभज्य त्रिषु मात्रेषु द्वात्रिंशन्मातृकाः क्रमात् ॥ ११९॥

क्रियते सा भवेदेला रतिरेखेति संज्ञिता।
पद्मनयन जलशयन। लक्ष्मीस्तनाभोगमध्यस्थितमुक्ताहारा(र)।
भक्तशरण प्रतिबुधार्त्ति(र्ति)हरण सकलदैत्यवंशच्छेदकुठार।
अघहरण भवतारण मे लक्ष्मीकान्त जय जय देव नारायण नमोस्तु
ते। आ(?)सोमेश्वरदेवविरचितेयमेलावती लेखा ॥ १२०॥

ईदृक्(ग्)लक्षणसंयुक्ता भाषया प्रि(ऽपि)यया कया।
इष्टेनार्थेन रागेण रतिलेखा प्रगीयते ॥ १२१॥

मात्रास्व(श्च) रतिलेखायाः द्वै(या द्वै)गुण्येन नियोजिता(:)।
हृद्याः पादत्रये यस्याः कामलेखेति सा स्मृता ॥ १२२॥

निहि(ह)तखरासुरदूषण श्रीवत्सभूषण प्र(?)संसारसागरतारण
निखिलभुवनशरणः(ण)। अमित मद्दद्भूत विक्रमपालितधर्मक्रम।
प्र(?)मायावामनरूपबलिबन्धकर। कंसासुरमर्दन दे(द)शकन्ध-
रतर्जन धृत जय रघुतिलक अभिराम राम नमोस्तु ते।
आ(?) सोमेश्वरदेवविरचिता कामलेखेयमेला ॥ १२३॥

ईदृक्पदयुता भव्या लक्षणेन समन्विता।
इष्टार्थरागभाषाभिः कामलेखा प्रगीयते ॥ १२४॥

रतिलेखागता मात्रा त्रि(स्त्रि)गुणाश्चेत्प्रयोजिताः।
त्रिषु पादेषु संयुक्ता बाणलेखा तु सा भवेत् ॥ १२५॥

नखशिखा(व्या)पादितदैत्यवक्षःस्थल पालितजम्भाराति-
भुजबलप्रकर कमलाकस्तूरिकापत्र प्रशमितनिखिलभुवनभङ्ग।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करकमलपुटालितशङ्खसुदर्शन सुकृतशतलभ्यपुण्यदर्शन
गङ्गाप्रवाहप्रभवपद एकपवित्रितजगज्जय ।
कालिन्दीकेलिकार सरभसरचितकालियनिकार मधु जठरकुहरनि- ॥
विष्ट(विष्ट)पत्रय जय जय देव जगन्निवास वासुदेव ।
सोमेश्वरदेवविरचिता बाणलेखेयमेला ॥ १२६ ॥

पादैरेवंविधैर्बद्धा मात्रानियमसंयुता ।
त्यक्तान्यनियमा न(ज्ञेया) बाणलेखा विचक्षणैः ॥ १२७ ॥

या मात्रा रतिलेखायाश्चातुर्वण्य(र्ण्य)विभाजिताः ।
पादत्रयेपि सा प्रोक्ता चण्डलेखा सुशोभना ॥ १२८ ॥

शशधरनिकरविकासितकुवलयदलमेचक सकलभुवनतल-
धर्माधर्मविवेचक करकलितभुवनतलधर्माधर्म मधुकैट(ट)भशमन
नाभिनलिननिवासिचतुर्मुख चरितविविधजन देवकीनधन(नन्दन)
परिपालितसु(र)पतिविहरणनन्दन प्रकरकलितपाञ्चजन्य भुज-
विजितमहासुरसमर । अधिशयित(शश)धरकरविशदभुजगतल्प
प्रणतजनपीयूषधारासाराकल्प गुणगणनिलय निखिलगुणविरहित
जय देव पीताम्बर अखिलभुवनवास तुभ्यं नमः ॥ १२९ ॥

आ(?) सोमेश्वर(देव)विरचिता चन्द्रलेखेयमेला ॥
एतैर्लक्षणसम्बद्धैर्युक्ता पदकदम्बकैः ।
इष्टा समर्थतालेयं चन्द्रलेखा प्रगीयते ॥ १३० ॥

एकमेकाधिकैर्वर्णैर्दशभिः पदमीरितम् ।
अनुप्रासेन संयुक्तं पदमन्यत्तथाविधम् ॥ १३१ ॥

ईदृक्पदद्वयं पादस्तद्वत्पादद्वयं परम् ।
पूर्वपादद्वयस्यान्ते गमका वर्जितास्तथा ॥ १३२ ॥

यमकान्ते पदं कार्यं विरुधै(विरुदै)र्वापि वर्णकैः ।
तृतीयपादप्रान्ते च कार्यो मेलापको बुधैः ॥ १३३ ॥

ततस्तु यवकः (ध्रुवकः) कार्यः सानुप्रासपदद्वयः ।
ध्रुवकान्ते वर्णनाम ततश्चाभोग इष्यते ॥ १३४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एलादेहमिमं प्राह सोमेश्वरमहीपतिः ।
एला मदनवत्येषा कथ्यते तदुदाहृतिः ॥ १३५ ॥

अनवरतभुवनशरण प्रणतजनदुरितहरण (गमकः)
सकलसुरासुरपूजितपदयुगलम् । सततविबुधभयशमनम् (।)
प्र(?)शङ्खाब्जचक्रपाणिदामोदरम् । विकचसरसिरुहवदनम् ।
सकलशुभनिचयसदनम् । मधुलक्ष्मीकण्ठदलहारसंसार-
मण्डपसूत्रधारम् । नमामि रावणान्तकरं रामम् । गोपीजनमनोहरं
रामम् । आ(?)चोलई(ले)श्वरसरस्वतीवदनाम्बुजमित्रम् ।
गेया वि(हि)मदनावती वर्णैला ॥ १३६ ॥

एवं प्रासयुतैः पादैर्द्विपदैस्त्रिभिरीरिताम् ।
द्विपथाङ्कादिकैर्वर्णैर्गातव्या मदनावली ॥ १३७ ॥

एला मदनवत्याद्या तावल्लक्षणसंयुता ।
वर्णैर्द्वादशसङ्ख्यातैर्बाशि(तैः शशि)लेखा निगद्यते ॥ १३८ ॥

मरकतमणिनिचयरुचिरं दधतमुदधिशयनमचिरम् ।
पि(पी)ताम्बरधरं लक्ष्मीपतिं विरचितविहगपतिगमनं अ(नम)-
विनयमदम(त्ता)रिशमनम्। श्रीवत्साङ्कितवत्स(त्सं)पुण्डरीकाक्षम् ।
उदधिनिखिलभुवनम् । दलितदशवदनभुजवनम् ।
तं प्रणमामि दशरथनन्दनम् । केश(व)देवनारायणम् ।
आचोल्लयिसरस्वति(ती)वदनतिलक गायन्ति शशिलेखावर्णनम्
॥ १३९ ॥

इत्यनुप्राससंयुक्तैः पादैः षड्भिरलङ्कृता ।
द्वादशारस(क्षर)संयुक्तैः शशिलेखा प्रगीयते ॥ १४० ॥

त्रयोदशाक्षरे कार्ये पात्रपादत्रयेपि च ।
पूर्ववल्लक्षणं शिष्टं प्रभावत्यां निरूपितम् ॥ १४१ ॥

विहितनतिमनुशुभभावकम् । दशवदनवनपावकम् ।
प्रलयलक्ष्मीहृदयवल्लभम् । देवं भुवनपतिहरिं अ(रिम)धि-
सलिलनिधिव(वि)रचितसेतुं जगदव(न)निधनकरणहेतुम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अ(?)शुद्धसंवेदनमयम् । माधवं मधुसूदनं नि विधु(भु)म् ।
चरणयुगु(ग)लकृतन(स)कलाक्रमणं त्रिभुवनमहितकमलावरणम्
(मेध्रु)। दुरितभयहरं कौस्तुभभूषणं पीताम्बरवसनं श्रीधरम्
॥ १४२ ॥

गीतवर्णं समं कृत्वा तालमानविभूषितम् ।
एला प्रभावती नाम गातव्या गीतकोविदैः ॥ १४३ ॥

मनुसङ्ख्याक्षरपदैस्त्रिभिः पादैर्विभूषिता ।
एलेयं पालनीमेतत्तदुदाहृतिरुच्यते ॥ १४४ ॥

निजविभवविरचितदशावतारं निशितं(त)शरशतक्षत-
दनुजभारम् । प्र(ध्रु)पूतनास(सू)दनम् । केशिकदनं दामोदरम् ।
खगपतिगमनमभयदं करशि(स)रसिजकलितरुचिरगतम् ।
प्र(?)वृन्दावनमधुमथनकरम् । नारायणम् ॥ १४५ ॥

पदानुसारगीतेन पदप्रमयमेव(त्रयसमेन) च ।
प्रयोगैर्बहुलैर्दीर्घैर्नादैर्गायति मालती ॥ १४६ ॥

तिथिसङ्ख्याक्षरपदैस्त्रिभिः पादैर्विराजिता ।
एला स्याल्ललिता नाम तदुदाहरणं तथा ॥ १४७ ॥

शिशिरकरनिकरगतकमलरणदलितकुलमुख प्र (॥ ॥)
मुनिजनवन्दितं चराचरपतिम् । शुचिमणिरचितविकटमुकुटम् ।
बहुदितितनयसमरसुभटम् । अनुगृहीतपार्थं वसुदेवनन्दनम् ।
अजममरपतिसखं भजत हरिमतिशयितसकलमखम् ।
अनुगतवेदाङ्गमन्दिरं कैठभ(टभ)रिपुं पद्मनाभं पितामहजनकम् ।
॥ १४८ ॥

ललितेनैव गीतेन ललितैर्गमकैस्तथा ।
एलेयं ललिता तज्ज्ञैर्गातव्या ललिताक्षरा ॥ १४९ ॥

निशाकरकराः सङ्ख्या वर्णारम्भपदैस्त्रिभिः ।
पादैर्भा(र्भो)गवती प्रोक्ता वर्णैला यतिभिस्तथा ॥ १५० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कचाचितरुचिरचारुवक्त्र। पदयुगलयुगनिपतितपतिताक्र(पद-
युगलनिपतितशक्र) प्र(।।प्रा।)धृतगोवर्द्धनं(भुवन)भूषणं देवम्। उ
अभिनवजलधरभरसदृशवपुषम्। परमपरमपगतरुषम्॥ ध्रु॥
(स)ततमहं ध्यायामि विष्णुम्। उपदेशानुगृहीतजिष्णुम्।
शङ्खचक्रगदाधरं परमात्मांन (त्मानम्) ॥ १५१ ॥

गीतं सुधारसस्यन्दि वर्णमात्रेन(ण) भूषितम्।
भोगवत्यां तु गातव्यं गमकैश्च विराजितम् ॥ १५२ ॥

त्रयः पाता(दा) दशषड्भिः सर्वैः सप्तदशाक्षरैः।
एलायां कुसुमावत्यां स्युरुदाहृतिरुच्यते ॥ १५३ ॥

क्षितिपवनगगनहुतवहजलभवन प्रणतमुनिजन दितम(द)नुजा(ज)
प्र(?) वेदवेदाङ्गपारग लोकावास विभो श्रीपते।
कुसुमशरविवशयुवतिशतरतिदक्ष शतंभर(शर)पतनहतसुरपति-
रिपुपक्ष प्रतिरुचिपुरोध(ग)संवेदनमूर्त्ति(र्ते) विमलकीर्त्ते सवनगमन-
विधिविरचितचतुरविहङ्ग जय जय विदितजननमरणभयभङ्ग-
प्रद्रुततृणदावानल अरिष्टदावानल सकलजनदयालो
शेषशय्याशयालो ॥ १५४ ॥

द्रुतविन्यासगीतेन निबिडैर्गमकैरपि।
एला सुमद(कुसुम)वत्येषा गातव्या तारचुम्बिनी ॥ १५५ ॥

मदेन वा द्वितीयेन प्रतितालेन वा भृशम्।
एला नियमतो गेया वाद्यैस्तालैः कदाचन ॥ १५६ ॥

गणमात्रागणानां च रसस्य नियमोऽत्र न।
न(?)वर्णानां नियमादेता वर्णैलाः परिकीर्तिताः ॥ १५७ ॥

गीत्वा तु प्रथमं पादं गातव्यो गमकस्ततः।
विरुदं वर्णकं वापि ततो नादेन गीयते ॥ १५८ ॥

पादौ(दो) द्वितीय एवं च गातव्यो ब(गे)यकारकैः।
तृतीयाङ्घ्रेः पदद्वन्द्वं गातव्यं पूर्ववत्(द्) बुधैः ॥ १५९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गमकैर्विरुदैर्हीनं नादेन च विवर्जितम्।
ततो मेलापको ज्ञेयः सभालाद्यक्षरादिकः॥ १६०॥

उल(च्च)नीचस्वरोपेतो गमकैर्विविधैर्य(र्यु)तः।
ततश्च ध्रुवको ज्ञेयो रन्यो(रम्यो) रागविभूषितः॥ १६१॥

आभोगश्च ततो गेयो गाननामसमन्वितः।
सर्वासामेव मेलानां गानभोगो भवेदयम्॥ १६२॥

वर्णितः सोमभूपेन तद्विदामुपकारकः।
वर्णानष्टादशारभ्य वर्णैनैकेन वर्द्धिताः(ता)॥ १६३॥

अष्टाविंशतिपर्यन्ता वर्णमाला प्रकीर्तिताः(ता)।
मधुकरी सुस्वरी काककरिणी सुरसा तथा॥ १६४॥

प्रभञ्जिनी कुञ्जिनी च विपुला व(च) तडिल्लता।
विशाला तरला चेति ततः कान्तिमती शुभा॥ १६५॥

कथिता वर्णमालैला(लाः) प्राज्ञैरेकादशैव हि।
इत्येता वर्णमालैला वर्णैला(लाः) क्रमतो बुधैः॥ १६६॥

गातव्यास्तु त्रिभिः पादैः पादैः षड्भिरनुक्रमात्।
कङ्कालः प्रतितालश्च द्वितीयो मह एव च॥ १६७॥

चतुर्थे ते(र्थस्ते)षु तालेषु गेयास्त्वेला यथारुचि।
आदिमध्यावसानेषु ताल एकः प्रयुज्यते॥ १६८॥

द्रुतमध्यविलम्बेन मानेन सुविचक्षणैः।
उद्ग्राहे तु भवेद्यस्याः समानचरणद्वयम्॥ १६९॥

द्विर्गीत्वा पादमाद्यं च गातव्योऽङ्घ्रिर्द्वितीयकः।
गीतेनैकेन गातव्यं (व्यः) सप्रासः पदयोर्द्वयोः॥ १७०॥

वर्णहीनस्ततो ज्ञेयो नवमेलापको बुधैः।
तालेनाद्येन गातव्यो ध्रुव्यो(वो) वारद्वयं ततः॥ १७१॥

एकगीतं तु सम्प्राप्तं ध्रुवस्याद्यं पदद्वयम्।
तृतीयश्च चतुर्थश्च पा(गा)तव्या(व्यो) वन्यगीततः॥ १७२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्ण्य(र्ण)नीयगुणौ(णा)धारौ पादौ प्रासयुतौ ध्रुवौ।
आभोगश्च ततः कार्यः स्वरैरुच्चैरलङ्कृतः ॥ १७३ ॥

देवीनाम्ना समोपेतो नृपनाम्ना समन्वितः।
रम्य(म्यं)सलि(ली)लमाभोगं प्रयुज्य तदनन्तरम् ॥ १७४ ॥

पुनर्धृत्वा (ध्रुवं)सकृद् गीत्वा ग्रहतालेन मुच्यते।
गृ(ग्र)हे मेलापके मोक्षे कार्यं चैव यथारुचि ॥ १७५ ॥

आदितालोऽथ कङ्कालः प्रतितालोऽथवा बुधैः।
ध्रुवश्चै(वे चै)व तथाभोगे(ग) एष तालः प्रयुज्यते ॥ १७६ ॥

ग्रहतालं परित्यज्य योज्यस्तालो यथैलया।
एको रागो भवेदस्यां तालद्वितयमेव हि ॥ १७७ ॥

लक्ष्म दण्डकिकायाश्च कथितः(तं) सोमभूभुजा।
वारद्वितयमुद्ग्राहः प्रथमं (मः) परिगीयते ॥ १७८ ॥

सकृत(द्) द्वितीय उद्ग्राहो गीयते च ततो ध्रुवः।
ध्रुवे(वो) वारद्वयं गेयं(यः) पश्चादाभा(भो)ग इष्यते ॥ १७९ ॥

पुनर्गेयो ध्रुवः प्राज्ञैर्गीतलक्षणवेदिभिः।
मड्डकंका(कङ्का)लतालाभ्यां प्रतितालेन वर्जितम् ॥ १८० ॥

अन्यस्तालः प्रयोक्तव्यो रो(झो)म्बडे लक्षणं त्विदम्।
गारुंगाव्ये(ख्ये)न तालेन द्वितीयेन तथैव च ॥ १८१ ॥

अन्यो निःसारुकेन स्यादेकतालिकया तथा।
षडमी रोंबडाः (झोम्बडाः) सिद्धाः साम्प्रतं तालसंज्ञया ॥ १८२ ॥

उद्ग्राहे पाद एकः स्यादेकः पादस्तथा धृ(ध्रु)वे।
द्विरुद्ग्राहः प्रगातव्यो धृ(ध्रु)वो वारद्वयं ततः ॥ १८३ ॥

वर्ण(र्ण्य)नामसमोपेत आभोगस्तदनन्तरम्।
आवर्ते(त) धृ(ध्रु)वो भूयः स भवेल्लम्बकाभिधः ॥ १८४ ॥

उद्ग्राहे च धृ(ध्रु)वे चैव पा(प)दमेकं प्रवर्तते।
आभोगो वर्ण्यनामाङ्को विलम्भः परिकीर्तितः ॥ १८५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तालस्त्वन्यो भवेद्यस्मिन् उ(न्नु)दुग्राहः पादमात्रकः ।
ध्रुवस्तालयुतो यत्र प्रतिलम्भः स उच्यते ॥ १८६ ॥

यस्योदुग्राहपदं भिन्नं पूर्वार्द्धेन समन्वितम् ।
गीयते यत्र गीतज्ञैः स भागः कथितो बुधैः ॥ १८७ ॥

लम्भकेषु भवेद्भागो नियमेन द्वितीयकः ।
झा(झो)म्बडेषु तथा भागविकल्पः प्रतिगीयते ॥ १८८ ॥

यदुक्तं झोम्बडलक्ष्म गमकस्य तदेव हि ।
गमकव्यतिरिक्तोऽयमादितालेन गीयते ॥ १८९ ॥

लक्षणं लम्भकस्यैव किन्तु तालो ध्रुवो भवेत् ।
एकतालीति मानै(नामै)षा कथिता सोमभूभुजा ॥ १९० ॥

करणं च तथैवे(वै)ला टेंकिका (ढेङ्किका) रोम्बड(झोम्बड)स्तथा ।
लम्बुको रासकश्चैव तथा स्यादेकतालिकः ॥ १९१ ॥

कन्दवृत्ताधिकः कश्चित्प्रबन्धश्चेन्महा(न्) पुनः ।
अल्पः पश्चात्प्रगातव्यः एष मूढ(सूड)क्रमः स्मृतः ॥ १९२ ॥

त्रिपदी षट्पदी चैव वधू(धव)लो मङ्गलस्तथा ।
उवी च चर्चरी वर्या राहडी दन्तिका तथा ॥ १९३ ॥

एते षुदेवना(सूडेषु नो)गेया(:) प्रबन्धा लौकिका मता(:) ।
विप्रकीर्णा(:) प्रगातव्या पारेषु च(व्यापारेषु) पृथक् पृथक् ॥ १९४ ॥

त्रिपदी कण्डने चैव शृङ्गारे विप्रलम्भके ।
प्रायः शास्त्रिभिरेवैषा गेया नानार्थभूषिता ॥ १९५ ॥

कथासु षड्पदी योज्या विवाहे धवलस्तथा ।
उत्सवे मङ्गलो गेय श्चर्यायोग(गि)जनैस्तथा ॥ १९६ ॥

महाराष्ट्रेसु(षु)योषिद्भिरुवी(रोवी) गेया नु (तु) कण्डने ।
होलाके चचरी गेया राहडी वीरवर्णने ॥ १९७ ॥

दन्ती गोपालकैर्वादे गातव्या निजभाषया ।
एवं विषयभेदेन प्रबन्धाः परिकीर्तिताः ॥ १९८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रागाणां च प्रबन्धानामुक्तं लक्षणमुत्तमम् ।
रम्यो गीतविनोदोऽयं कथितः सोमभूभुजा ॥ १९९ ॥

विधिर्येषां प्रबन्धानां तादृशः परिकीर्तितः ।
तालेन भाषया रागैः स्वरैः पाटैश्च तेन्नकैः ॥ २०० ॥

विधिना तेन ते गेया न विधिः प्रतिलङ्घ्यते ।
विधिलोपे भवेद्दोषो न समकू(म्यग्)लक्षणं भवेत् ॥ २०१ ॥

अन्येषां च प्रबन्धानां भाषायां नियमो न हि ।
मया संस्कृतया वाचा बोधायोदाहृतिः कृता ॥ २०२ ॥

भक्त्या भगवतो विष्णोः प्रबन्धे(ऽ)भीष्टुतिः कृता ।
न त्वेष नियमो नित्यं प्रबन्धेषु विधीयते ॥ २०३ ॥

विष्णुं शङ्करमेवापि ब्रह्माणं वा दिवाकरम् ।
विघ्नेशं भैरवं वापि क्षेत्रपालमतो(थो)ऽपि वा ॥ २०४ ॥

देवीं सरस्वतीं गौरीं महालक्ष्मीं च चण्डिकाम् ।
अन्याश्च देवताः ख्याताः गायेस्तु(त्स्तु)तिपुरःसरम् ॥ २०५ ॥

नृपं वा युवराजं वा महाशक्तिगुणोर्जितम् ।
महादेवीं बृहद्राज्ञीं प्रियां वा योषिदुत्तमाम् ॥ २०६ ॥

गायेन्निजेच्छया गाता यत्र चित्रं (त्तं) प्रवर्तते ।
अथ लाभात्तथान्येषां प्रबन्धो नैव गीयते ॥ २०७ ॥

मानमिच्छन्यशो भूरि द्रव्यं बहु मनीषितम् ।
न प्राकृते(त)जने(नान्) गे(गा)या(ये)त्कदाचित्व(गे)यकारकः ॥२०८॥

यस्तु गायति लोभेन प्राकृतान् गुणवर्जितान् ।
स निन्द्यः स्यात्सतां मध्ये हास्यस्यायतनं महत् ॥ २०९ ॥

देवाना(न्नौ)ति महीपालं तस्य भुक्तिर्निरन्तरा ।
इति गीतविनोदोऽयं कथितः सोमभूभुजा ॥ २१० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतो निःसारुतालेन मङ्गलाचार उच्यते ।
पूर्वपूर्वपदावृत्त्या गायेदुत्तरं (रमुत्तरम्) ॥ ३६० ॥
इति मङ्गलाचारः ।

यत्र पाटैः सविरुदै रङ्गतालेन कल्प(ल्प्य)ते ।
रणरङ्ग (ङ्गः) प्रबन्धः स्यादयं च त्रिविधो भवेत् ॥
समा(म)तीतानागताख्या(ख्य)तालग्रहविभेदतः ॥ ३६१ ॥
इति रणरङ्गः ।

पाटैः पादैः स्वरैस्तेनैर्बिरुदैर्यो विनिर्मितः ।
प्रतापवर्धनः स स्यात् प्रबन्धो रागसुन्दरः ॥ ३६२ ॥
इति प्रतापवर्धनः ।

वसन्तो गुर्जरो देवशाखो तोडी च पञ्चमः ।
धनासिकेतिराः(रागाः) षडत्यो(न्त्यो) मालवकैशिकः ॥ ३६३ ॥

वीराद्भुतौ रौद्रशान्तौ भयाख्यकरुणाभिधौ ।
शृङ्गारश्च क्रमाज्ज्ञेया रसाः खण्डेषु सप्तसु ॥ ३६४ ॥

मेलापकान्विते न स्यादाभोग(:)सप्तमे न च ।
न्यासो मेलापके न स्यादुद्ग्राहाद्येन वा भवेत् ।
आभोगे नामनी स्यात्म उ(तामु)भयोः कविवर्णयोः ॥ ३६५ ॥
इत्युपमालङ्कारः ।

द्वाभ्यां द्वाभ्यां ग(प)दाभ्यां स्यादेकः खण्डस्तथाविधैः ।
त्रिभिः स्यात्कमलानन्दः खण्डो वेदाधिमात्रकः ॥ ३६६ ॥

आलापः प्रतिखण्डः स्यात्प्रयोगे तूपलक्षितैः
गेयश्चाचपुटेनायं प्रबन्धस्तं(न्धः स) निरूप्यते ॥ ३६७ ॥

अस्मिन्ता(स्मिन्ना)लापमारभ्य गीत्वा धातुत्रयं क्रमात् ।
ततो विधाय गमकानालापे न्यासमूचिरे ।
वीरो रसः प्रबन्धेऽस्मिन्रागः स्याद्रससङ्गतः ॥ ३६८ ॥
इति कमलानन्दः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्र पाटैश्च तेनैश्च विरुदान्तपदैस्तथा ।
गद्ये वा पद्यबन्धे वा वीरश्रीरिह बध्यते ॥ ३६९ ॥

अनेकदुर्धरदैत्यदानवराक्षसक्षयकारिणं सृष्टिस्थित्यन्तकरणैक-
निरन्तरं अचिन्त्य(म्)
स्मरभरविवशराधाहृदयवल्लभ बालगोपाल धूलिक्रीडाविकूणित
विकृतवदनदर्शनजनितहास कोष्णनयनोदकम्लान(त)मन्दोदरी-
प्रता(ला)पदीक्षादानदक्ष अनन्तकालस्वीकृतभीरुभैरववपुवि(र्वि)-
रचितसकलसङ्गरशास्त्रकोविद रुचिसञ्जातसन्धानविजय
बहुबाहुशालीन देदीप्यमानसुदर्शनजातकम्पावसाददैत्यदयिता-
सम्मोहकारिन् गरलदानप्रवृत्तपूतनास्तनपानव्याजकृष्टरुधिर-
वसामस्तिष्कपङ्ककलुषीकृतनन्दगोपगृहप्राङ्गण दृप्तदैत्येन्द्र-
स्तम्भास्फालनमात्रादिभूषाभूत(त्राविर्भूत)नरहरिवपुर्वि-
लोकनोत्पन्नरोमाञ्चकञ्चुके(क)साश्चर्यार्यजनप्रवर्तितबहुस्तोत्र
जय जय नारायण ॥ ३७० ॥

शृङ्गारादिरसैः सर्वैरष्टभिर्ये(र्यो)प्रयोजिताः (तः) ।
रससन्दोहनामा स प्रबन्धः परिगीयते ॥ ३७१ ॥

नन्द्यावर्तश्चतुर्वृत्तः स्वस्तिकश्चाष्टवृत्तकः ।
तालस्तत्सङ्ख्यया योज्यो गीतशास्त्रविशारदैः ॥ ३७२ ॥

गद्यैस्तालविहीनैश्च वृत्तैर्वा तालसङ्गतैः ।
रागैरनेकैः क्लृप्तोऽसौ भवेद्रागकदम्बकः ॥ ३७३ ॥

गद्ये वा पद्यबन्धे वा रागेनैकेन केनचित् ।
तालैश्च बहुभिर्युक्तस्तालवर्ण(लार्णव) इतीरितः ॥ ३७४ ॥

देवतास्तुतिसंयुक्तैः पादैश्चैव समाक्षरैः ।
बहुभिर्गीयते या तु तदेत(सा भवे)त्स्तवमञ्जरी ॥ ३७५ ॥

नौमि नारायणं देवं त्रैलोक्यत्राणकारणम् ।
नौमि नो(नी)लोत्पलच्छायं क्षीरोदार्णवशायिनम् ।
नौमि शङ्खगदापाणिं चक्रनीरजधारिणम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नौमि लक्ष्मीकुचाभोगकुङ्कुमारुणितं हरिम् ।
नौमि गोपीमुखाम्भोजविकासनदिवाकरम् ।
नौमि नित्यं सदानन्दं ज्ञानलोचनदर्शनम् ।
नौमि मोक्षपदप्राप्तिकारकं भवतारकम् ।
नौमि दैत्यवधूचर्ष(र्या)चक्राम्बुजनिशाकरम् ।
नौमि पादत्रयाक्रान्तनिःशेषभुवनत्रयम् ॥ ३७६ ॥

उदितस्तवमञ्जर्यां पदानां कल्पनाक्रमः ।
भूलोकमल्लदेवेन भुवनाख्यातकीर्तिना ॥ ३७७ ॥

पदैर्बहुविधैश्चैव विरुदाख्यायकैः पदैः ।
कण्डु(कन्दु)को नाम विख्यातस्तालरागो निजेच्छया ॥ ३७८ ॥

अर्थश्चाध्यात्मिकः प्रास(सः)पादद्वितयशोत(भ)नः ।
उत्तरार्धे भवेदेवं चर्या सा तु निगद्यते ॥ ३७९ ॥

संसारसोपूहदरैः कायहीनं चंडिया ।
कोहलोहमाह बहुकेण तरिया ।
इंदियपयणखरवेगेव हंसि ।
दुक्ति हलाहणिम नडिन पाचधि ॥ ३८० ॥

ईदृक् पदानि चत्वारि दर्शितानि मयाऽधुना ।
अध्यात्मकार्थयुक्तानि चर्यानाम्नि प्रबन्धके ॥ ३८१ ॥

यतिः सप्त(मा)सु मात्रासु विषमासु न विद्यते ।
गीयते तालयुग्मेन सातयेऽ(सा भवेद्)ध्वनिकुट्टनी ॥ ३८२ ॥

संसारसा(ता)रणं जगत्कारणं त्रिदशपालनं नौमि हरिम् ।
दितिजकुलसूदनं दनुजघातनं जलधिजलशायिनं नौमि हरिम् ।
कंसवंशनाशकारणम् । मनुजदेह वासुदेव
मत्स्यकूर्मकोलकाय सिंहवदन नारसिंह वामनाङ्ग
रामकृष्णबुधकल्किरूप देव देव नमोस्तु ते ॥ ३८३ ॥

एवमादिपदैर्भव्यैरिष्टेनार्थेन संयुता ।
भूलोकमल्लदेवेन वर्णिता ध्वनिकुट्टनी ॥ ३८४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टाक्षरस्य पादस्य
अचिन्त्यं नित्यं भगवन्तमनन्तम्
त्रैलोक्यमोहनसमर्थमायानिर्माणनिपुणम्
रावणान्तक(कं)कंसासुरमर्दनम्
मधुकैटभसूदनं बल(लि)बन्धविधायकम्
सु(सु)रत्राणकृतारम्भ(म्भं) मधुकैटभसूदनम् ॥ ३८५ ॥

अनेनैव प्रकारेण पदेषु विरुदेषु च।
देवमुद्दिश्य भूपं वा वाञ्छितार्थेन गीयते ॥ ३८६ ॥

उदाहरणमाख्यातं वीरशृङ्गारकर्मणि।
भूलोकमल्लदेवेन क्षपिताशेषवैरिणा ॥ ३८७ ॥

पदैस्तैस्तैश्च तालेन सम(मे)तो यत्र गीयते।
प्रबन्धो ललितो नाम कथितः सोमभूभुजा ॥ ३८८ ॥

गोपीजननयनेन्दीवरविकासचन्द्र गोवर्द्धनोद्धरण
त्राणगोविन्द गोकुल(त्रातगोकुल)गोविन्द बालक्रीडाकौतुकाद्भुत-
दर्शनजनितदेवकीहृदयानन्द जय जय देव भगवन्मुकुन्द ॥३८९॥

ईदृक्पदानि तेनाथ तालमाने नियोजिता (ताः)।
उदाहृतिरिति प्रोक्ता प्रबन्धे ललिताभिधे ॥ ३९० ॥

स्वरैरेकः पदैरेको विरुदैश्च तथा परः।
एवं खण्डत्रयं कार्यं स्त(स्व)राङ्के तालसंयुतम् ॥ ३९१ ॥

अचिन्त्ये(न्त्यो)ऽपि योगिनश्चिन्त्य(न्त्यो) निर्गुणोऽप्यगु(ग)-
णितग(गु)णो जयति गुणवान् भक्तजनवत्सलः
श्रीवत्सलाञ्छनो विष्णुः।
रावणमहाशैलं(ल)कुलिशघातं(त) कंसासु(सु)रगजपञ्चानन
बाणबाहुदावानल हिरण्यकशिपूरःस्थलविदारणदार(रु)णक्रकच
॥ ३९२ ॥

एवं पदैश्च विरुदैर्दर्शितं खण्डयुग्मकम्।
खण्डमाद्यैः(द्यं)स्वरैर्ज्ञे(र्गे)यमेवं खण्डत्रयं भवेत् ॥ ३९३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनि(भी)ष्टं नायकं कृत्वा देवं वा वसुधाधिपम्।
तालेन सङ्गता(तो) गेयाः (यः) स्वराङ्को गेयकारकैः॥ ३९४॥

स्वरैः पदैस्तेनकैश्च यस्य खण्डत्रयं भवेत्।
खण्डं च गमकोपेतमङ्कध्वनिरितीरितम्॥ ३९५॥

आद्यं स्वराङ्कयज्ञेयं(वद्गेयं) खण्डयुग्मं मनीषिभिः।
तृतीयं तेनकैर्गेयं चतुर्थं गमकैस्तथा॥ ३९६॥

उदाहरणमेतस्मिन् प्रबन्धैश्चध्वनाभिधम्(न्धे क्व च नोदितम्)।
दर्शितं सोमभूपेन मूढानां बोधकारिणा॥ ३९७॥

स्वरैश्चैव तथा पादै(दै)स्तेनैः पादैस्तथार्धकम्।
क्रमेणैव(वं) चतुर्भागैर्गीयते स चतुर्मुखः॥ ३९८॥

अन्धकध्वनि (ङ्कध्वनि)प्रकारेण देये(गेयं) खण्डत्रयं क्रमात्।
चतुर्थपाठ(र्थं पाठ)कैर्ज्ञे(र्गे)यं गमकास्तत्र वर्जिताः॥ ३९९॥

स्वरैः पादैस्तथा पादै(पाटै)र्बिरुदैश्च पृथक् पृथक्।
अन्तरा तेनकोपेत (तः) पञ्चत्तगि(भङ्गि)र्निगद्यते॥ ४००॥

चतुर्मुखप्रकारेण गीयते तेन्नकैर्विना।
विरुदास्तेनकस्थाने तेनकासा(श्चा)न्तरान्तरा॥ ४०१॥

पञ्चत्त(भ)ङ्गिप्रबन्धस्य दर्शितं लक्षणं मया।
विशेषकं च सन्धीनां तेनकाः परिकीर्तिताः॥ ४०२॥

श्रीविलास(सः)स्वरादि(दिः) स्यात् श्री(च्छ्री)रङ्ग(ङ्गः)पदपूर्वकः।
पञ्चानन(नः)पदादि(दिः) स्याद्विरुदादिस्तु मातलिः॥ ४०३॥

तेनादिरुपधिः प्रोक्तो गीतलक्षणवेदिभिः।
पदं(एवं) पञ्चप्रकारेण पञ्चत(भ)ङ्गि(ङ्गिः) प्रदी(गी)यते॥ ४०४॥

काव्यजैर्गीतसम्भूतैर्योऽलङ्कारैर्विरचयते।
अलङ्कारभवो यस्मात् तस्मात्प्रोक्तस्तु मण्डनः॥ ४०५॥

गीतालङ्कारमात्रेण गीतमुत्पाद्य यत्नतः।
उपमाद्यैरलङ्कारैर्गीयतेऽस्य पदावली॥ ४०६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्र गायति गीतज्ञ(ज्ञः) मण्डनान्मण्डनाभिधः।
इदं लक्षणमाख्यातं सोमेश्वरमहीभुजा ॥ ४०७ ॥

शृङ्गारादिरसार्थः स्यादष्टभिः परिकल्पितः।
क्रमेण व्युत्क्रमेणाऽपि रससन्दोह उच्यते ॥ ४०८ ॥

अष्टाक्षरस्य पादस्य चत्वार्याद्याक्षराणि च।
आवर्तन्ते विलोमेन चतुःपा(तुष्पा)देस्व(ष्व)यं क्रमः ॥ ४०९ ॥

प्रथमस्य द्वितीयं तु द्वितीये प्रथमं भवेत्।
तृतीयं तु तृतीये तु (च) चतुर्थं च तुरीयके ॥ ४१० ॥

रामाकाममकारामा(मारा) समा(मासमा)स्वस्वमासमा।
कामास(सी)ममसीमाकामस्वमक्षक्षमस्वम ॥ ४११ ॥

न रागतत(ताल)नियमे(मो) विद्यतेऽत्र कदाचन।
पदमध्यस्थितं वर्णं गोपयित्वा तु गीयते।
अक्षरच्युतकं नाम प्रोढि(प्रौढै)रेव हि लक्ष्यते ॥ ४१२ ॥

एवं प्राप्य न चात्यर्थं दुःखशक्तास्तु क्षत्रियाः।
यत्नं कुरु महाबुद्धे यथार्थः सुखदो भवेत् ॥ ४१३ ॥

यद्वा तद्वा भवेच्छन्दो ता(भा)षया वा कदा(या)चन।
अनन्वितमिवाताति(भाति) विना वर्णेन केनचित् ॥ ४१४ ॥

यदि क्षिपेत(त्तु) तद्वर्णं तदा भवति सङ्गतम्।
अक्षि(क्ष)रक्षित्पकं नाम कथितं सोमभूभुजा ॥ ४१५ ॥

मसपसरकं चेति दनं एनं कलकम्।
क्षे(क्षि)पैकमक्षरं त्वादावर्ध(र्थ)वत्तत्तु गीयताम् ॥ ४१६ ॥

गा(गो)पयित्त्वा हृदिस्थार्थं यद्रूपे प्रश्नरूपतः।
समस्तव्यस्तरूपेण तस्यैवोत्तरमुत्तरम् ॥ ४१७ ॥

कः सेव्यः कः ऋतो(तौ)पेयः का स्थिरा या(पा)ति कः प्रियाम्।
साम्प्रतं सत्यसन्धः कः श्रीमत्सोममहीपतिः ॥ ४१८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यस्यां रसेन वीरेण सङ्ग्रामचरितं जयः ।
गीयते बहुभिः पादै राहडी सा प्रकीर्तिता ॥ ४१९ ॥

प्रथमे च तृतीये च यमकं प्रान्ततो भवेत् ।
सदोष्ठ इति विख्यातः कथितो लाटभाषया ॥ ४२० ॥

गोरीनयणहंजोरस्वैजो कंसहखयकातु ।
सो अम्हण दुरिअइ यवहरतकम्हुतरा डावालु ॥ ४२१ ॥

पूर्वार्द्धता(स्ता)लहीनस्तु गातव्यो गेयकारकैः ।
तालेन वाथ सम्पूर्णो दोहदो गीतवेदिभिः ॥ ४२२ ॥

दोहदस्य तथा चार्द्धं पादद्वयविवर्जितम् ।
द्वितीयं किञ्चिदावर्त्य गातव्यं सब(झोम्ब)डाभिधम् ॥ ४२३ ॥

दोहदस्य पदस्यान्ते(यदा चान्ते) क्रीडते डोल्लरीपदम् ।
डोल्लरी नाम सा प्रोक्ता गीयते लाटभाषया ॥ ४२४ ॥

सप्तविंशतिमात्रश्च त्रिषु पादेषु पानसी ।
आवर्तते द्वितीये तु तृतीये तु विमुच्यते ॥ ४२५ ॥

भाषा तु लाटी विज्ञेया तुरुष्की प्राससंयुता ।
अभीप्सितौ तालरागौ कर्तव्यौ गीतवेदिभिः ॥ ४२६ ॥

पदद्वयं तथा गीत्वा (त्वा) प्रान्ते लोल्लीपदं यदि ।
गीयते सा तु लि(वि)ख्याता लोल्ली प्र(प्रा)कृतभाषया ॥४२७॥

एकं पदं तथा गीत्वा शृङ्गाररसभूषितम् ।
अन्ते देवानुसंयुक्तं गेयमेकपदं भवेत् ॥ ४२८ ॥

निरन्वितपदद्वन्द्वा सानुप्रासेन मण्डिता ।
अन्ते दन्नी(दन्ति)पदोप(पे)ता तन्वि(न्वी)गेया विचक्षणैः ॥४२९।

पदैर्बहुविधैर्नव्यैस्तालेन च समन्वितः ।
वर्ण्यनामसमोपेतः कैवाडः परिगीयते ॥ ४३० ॥

उद्ग्राहो ध्रुवकश्चेति यत्र र(ख)ण्डद्वयं भवेत् ।
स्वरैर्निरन्तरैर्गेयमादितालेन गीयते ॥ ४३१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वर्ण्यनाम तथा भोगे (ऽऽभोगो) तदन्ते ध्रुवकः पुनः।
उद्ग्राहेण प्रमुच्येत स्वराख्यं करणं तु तत्॥ ४३२॥

तालेन करणाख्यांत(तैः) पादैर्मुरु(टैर्मुर)जसम्भवैः।
स्वरैः प्रगीयते यत्तु तद्बन्धकरणं विदुः॥ ४३३॥

अनेनैव प्रकारेण हस्तपाद(ट)विवर्जितम्।
तथा च स्वरसंयुक्तं तत्पादकरणं भवेत्॥ ४३४॥

पाटलास्थ(स्थाने)पदं कार्यं स्वराश्च विहितास्ततः।
लक्षणं करणस्यैव (वं) पादादिकरणे भवेत्॥ ४३५॥

हस्तपादै(टै)स्तथा तेन(नैः) पदं कार्यं स्वराश्च विहितास्ततः।
लक्षणं करणस्यैव (वं) पादादिकरणे भवेत्॥ ४३६॥

हस्तपादै(टै)स्तथा तेनपदस्वरसमन्वितः।
गीयते तालयुक्तो यः सवर्णस(स्व)रको भवेत्॥ ४३७॥

संगीतं धातुकरणैः स्वरैरेवं हि गीयते।
गातुर्वर्ण(र्ण्य)स्य नाम स्यादातो(भो)गे वर्तिनी तु सा॥ ४३८॥

प्रतितालो लघुर्मन्द(न्दः) कङ्कालश्च कटुक्कणः (कुडुक्ककः)।
पञ्चैते वर्णगीताः स्युर्वर्तन्यां न द्रुतो लयः॥ ४३९॥

उद्ग्राहः पूर्वभागः स्यात्ततो मेलापको भवेत्।
ततश्च ध्रुवको ज्ञेयस्ततश्चाभोग इष्यते॥ ४४०॥

गीतमुद्ग्राह्यते तेन समुद्ग्राहः प्रकीर्तितः।
उद्ग्राहध्रुवयोः सन्धिः श्लेषोन्मा(षान्मे)लापको भवेत्॥ ४४१॥

पौनःपुन्याद् ध्रुवत्वाच्च ध्रुवकः परिकीर्तितः।
ध्रुवस्याभोगकरणादाभोग इति संज्ञितः॥ ४४२॥

अयं समस्तगीतेषु विधिः साधारणो मतः।
मल्ला(मेला)पकस्तथाभोग आह(ह)तौ क्वापि नाद(ह)तौ॥४४३॥

सानुप्रासं पदद्वन्द्वं गमकस्तदनन्तरम्।
ततो वर्ण्यादिपद(क)मेक उद्ग्राह उच्यते॥ ४४४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमुद्ग्राहयुगलं तृतीये च पदद्वयम् ।
गीत्वा मेलापको जे(गे)यो गमकैः समलङ्कृतः ॥ ४४५ ॥

ततश्च ध्रुवको ज्ञे(गे)यो गणादिनियमोज्झितः ।
गातुर्नाम्ना समायुक्त आभोगो गीयते ततः ॥ ४४६ ॥

गीत्वाऽऽभोगं पुनर्गेयो ध्रुवको र(गे)यकारकैः ।
सर्वेषामेव तालानां शारीरं धातुसंज्ञकम् ॥ ४४७ ॥

भूमिर्मो वारि यो ज्ञेयी(यो) हुतभुग्यो(ग्रो)ऽनिलस्तु सः ।
व्योम ते(तो)जो रविः प्रोक्तः शशिर्भो नस्त्रिविष्टपम् ॥ ४४८ ॥

सुधाकरगणाः पञ्च सु(रा)लयगणस्ततः ।
पदमेकमिदं प्रोक्तं सानुप्रासं तथापरम् ॥ ४४९ ॥

द्र(इ)ति पादत्रयं यस्यामाद्य(मेला)नादावती तु सा ।
उदाहरणमेतस्याः कथ्यते सोमभूभुजा ॥ ४५० ॥

यौवनभूषितगोपवधूमुखपद्मसधुकरः (र)
श्यामलविग्रहकान्तिविनिर्जितनव्यजलधर देवकीनन्दन। शृङ्गार-
सदना(न)स्मेरसरोरुहसञ्चयपिञ्जर-
शोभनवसनकलितसत्कमलानयनाम्बुजविभ्रमभवन ।
प्रदुग्धाब्धि(ब्धि)कृतशयन दलितपुण्डरीकनयन
कौस्तुभरत्नमरीचिकदम्बकता(भा)सुर वरद पाहि
पुरन्दरगीतक । विरुद(तविरुद)सप्रेमकुसुमशरजनन विमोहित-
निखिलभुवन ।
उत्पत्तिस्थितिकारण प्रतो (भो) नारायण आ सोमेश्वरदेव-
विरचिता । एला नादावती ॥ ४५१ ॥

एवं लक्षणमेतस्यामुदाहरणमीदृशम् ।
ईदृक् (ग्) रागेण सा नित्यं म(न्द)तालेन संयुता ॥ ४५२ ॥

शृङ्गाररसभूयिष्ठकैशिकीवृत्त(त्ति)रञ्जिता ।
पाञ्चालीरीतिसंयुक्ता ज्ञेया नादावती बुधैः ॥ ४५३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भारती देवता न(त)स्या द्वित(ज)म(मु)ख्यकुलं भवेत् ।
नादावत्या महान्नादो वर्णः श्वेतश्च भाव्यते ॥ ४५४ ॥

इति नादावती ॥
यत्र वह्निगणाः पञ्च षष्ठो वायुगणो भवेत् ।
इदमेक(कं)पदं चान्यत्सानुप्रासं च तादृशम् ॥ ४५५ ॥

ईदृक्पादत्रयान्वेता(योपेता) ज्ञेया हंसावती वुधैः ।
उदाहरणमेतस्याः कथ्यते सोमभूभुजा ॥ ४५६ ॥

रौद्रकालानलोद्भूतखड्गप्रभातु(सु)शोभित।
प्र(भा)सुरकरिका (क)राकारकल्पतरुशाखाति(त)ता
राजते कमलायनैः । निर्जितारे उरस्मि(उष्णरश्मि)भानुप्रभाव
प्रतापशिखिकीर्निरुद्यत्सुधामूर्ति-
बिम्बधाव(म्बाव)धारितदिगन्तसखीप्रदग्धरिपुमण्डलाहतभुवन-
तिमिर। त्रिदश(शा)लये वृतविश्रमकामधेनोरहङ्ग(ङ्का)र-
हानिजगदेक(वी)रत्यागलीलायितम् ।
दिग्वधूगीयमाना(न) नाद(त)तप्रसरं धृत्य(दृप्त)दैत्यवनि(-ता)-
मुखाम्भोजचन्द्रोदय ।
कीर्तिसुधारसविसारसागर जगदेकवीर
आहत्(व)वीर श्रीनारायण । आ सोमेश्वरदेवविरचित(ता)
एला वसंस (हंसा)वती ॥ ४५७ ॥

एवं लक्षणमेतस्यामुदाहरणमीदृशम् ।
रागो हिन्दोलकस्तत्र द्वितीयस्ताल इष्यते ॥ ४५८ ॥

रौद्रो रसो भवेत्तस्या वृत्तिरारत(भ)टी तथा ।
लाटा(टी)रीतिसमायुक्ता गेया गेयविचक्षणैः ॥ ४५९ ॥

हंसावत्या गतिर्भव्या रक्तो वर्णश्च वर्णितः ।
यत्र व्योम्नि(म)गणाः पञ्च दिवाकरगणोन्न(णस्त)तः ॥ ४६० ॥

पदमेकमिदं वात्यान् (चान्यत्) सानुप्रास(सं) द(च)तद्विधम् ।
त्रिभिरेवंविधैः पादैरलानंधा(रेला नादा)वती मता ॥ ४६१ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उदाहरणमेतस्याः कथ्यते सोमभूभुजा ।
कुण्डलादौर्मण्डलोद्दामलेकेशैर्निदारु(र)ण-
शौण्ड सन्तुष्टगीर्वाणमव्याभावजनोहित ।
ता(भा)स्वद्भुत(ज)दण्डप्रकरकलितचक्र कृतार्थीकृतशक्रः(क्र)
कंसासुरास्त्रकदम्बप्रलोपोपदेशक्रम दक्षनिषेविन् ।
शेषदेवारिसंपाधिवार्यैकतुक्षिप्रनिर्दि(र्द)लितचाणूर ।
त्रिभुवनैकवीर भूभारभूतप्रभूतोल्लाससमुद्भूत-
सङ्ख्यातकृतान्त त्र(त्रा)यस्व लोकत्रय(य)म्
देव लक्ष्मीपतेर्नित्यमन्यंत(नन्त)सम्भ्रमैः कृतम्
गजेन्द्रमोक्षण प्रणतजनरक्षण कालियकुलदमन
पुरुशतशमन देव मधुसूदन ।
आ सोमेश्वरदेववीरदेवविरचिता एला नन्दावती ॥ ४६२ ॥

एवं लक्षणमेतस्या उदाहरणमीदृशम् ।
प्रतितालेन गातव्या रागे मालवकौ(कै)शिके ॥ ४६३ ॥

वीरो रसो भवेदस्या(स्याः) सात्वती वृत्तिरीरिता ।
गौडीरीत्या प्रगातव्या वुधैर्नादा(र्नन्दा)वती सदा ॥ ४६४ ॥

इन्द्राणी देवता तत्र कुलं वैश्यमुदीरितम् ।
नन्दावती सुनन्दा स्यात् पीतवर्णविरञ्जिता ॥ ४६५ ॥

(इति नन्दावती)

एवं क्षोणीगणाः प्रोक्ताः प्रतिवारिगणे ततः ।
प(इ)दमेकपदं तद्वत् सानुप्रासं द्वितीयकम् ॥ ४६६ ॥

एतादृशैस्त्रिभिः पादैरेला भद्रावती भवेत् ।
उदाहरणमेतस्याः कथ्यते सोमभूभुजा ॥ ४६७ ॥

नानाकारैर्निजाकारैर्नित्यं विकारितं दैत्येद्राणामन्त्रस्नायुस्फिग्-
वसामज्जासृक्कर्षकारिप्रपातपूतनालोहेनताटकार्पिता ।
शक्रस्त्रीनामात्यन्तायात्तानां शृण्वन्नाक्रन्दानमन्दान्
लिम्पन् रक्तकिशिक्षा(क्षो)दोद्भूतैर्गोपीगोदानुकदावानलगोपीत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गोपीनिशान्ता।
काश्मीरौघच्छायामच्छारक्तामारैः कुर्वाणः स्वकाये
बालादित्याः ता(स्ता)म्राकाराः शौरे त्वं त्राणं भूपा(या)व्यपाये
सभा मे हिरण्यकशिपुरुधिरालिप्तशरीर छिन्नशूर्पणखाश्रवण-
नासिकाङ्किकृतसंसारव्यतिकर
आच्छादितपापीजननरक देव दामोदर। सोमेश्वरदेव-
विरचिता एला भद्रावती ॥ ४६८ ॥

एवं लक्षणमेतस्यास्तुदाहरणमीदृशम्।
ककुभेन प्रसू(गी)तव्या केव(कङ्का)लस्ताल इष्यते ॥ ४६९ ॥

बीभत्सस्तु रसस्तस्या भारती वृत्तिरिष्यते।
वैदर्भि(र्भ)रीत्या गातव्या एला भद्रावती वरा ॥ ४७० ॥

वाराही देवता चास्याः कुलं शूद्रसमुद्भवम्।
एला भद्रावती ध्येया कृष्णवर्णोपशोभिता ॥ ४७१ ॥

चतस्रः कथिता (एता) गणैला लक्षणान्विताः।
मात्रैलाश्च चतस्रः स्युस्तासां वक्ष्यामि लक्षणम् ॥ ४७२ ॥

पदं षण्मात्रमेकं स्याद् द्वितीयं पञ्चमात्रिकम्।
अनुप्राससमोपेतः पादः प्रथम ईरितः ॥ ४७३ ॥

एवंविधो द्वितीयः स्यात्तृतीयो दशमात्रकः।
अनुप्रासेन संयुक्तं(क्तः)प्रयुक्तं(क्तः) पञ्चभिः पदैः ॥ ४७४ ॥

विभज्य त्रिषु रागे (पादे)षु द्वात्रिंशन्मातृकाः क्रमात्।
क्रियते सा भवेदेला रतिलेखेति संज्ञिता ॥ ४७५ ॥

पद्मनयन जलशयन|लक्ष्मीस्तनाभोग|मध्यस्थितमुक्ता|हार
भक्तशरण|प्रवि(वि)बुधार्तिहरण सकलदैत्यवंशच्छेदनकुठार
अघहरण भवतारण मे लक्ष्मीकान्त जय जय देव नारायण
नमोऽस्तु ते। आ सोमेश्वरदेवविरचितेयमेलावती लेखा
(रेखावती) ॥ ४७६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ईदृग्लक्षणसंयुक्ता भाषयाऽपि यया कया ।
इष्टेनार्थेन रागेण रतिलेखा प्रती(गी)यते ॥ ४७७ ॥

मात्राश्च रतिलेखाया द्वैगुण्येन नियोजिता(:) ।
हृद्याः पादत्र(द्वास्त्र)यो यस्याः कामलेखेति सा स्मृता ॥ ४७८ ॥

निहि(ह)तखरासुरदूषण श्रीवत्सभूषण प्रसंसारसागरतारण
निखिलभुवनशरण ।
अमित महाद्भुतविक्रमपालितधर्मक्रम प्रमायावामनरूप
बलिबन्धकर ।
कंसासुरमर्दन दशकन्धरतर्जन धृतजय रघुतिलक
अभिराम राम नमोऽस्तु ते ।
आ सोमेश्वरदेवविरचिता कामलेखेयमेला ॥ ४७९ ॥

ईदृक्पदयुता भव्या लक्षणेन समन्विता ।
इष्टार्थरागभाषाभिः कामलेखा प्रगीयते ॥ ४८० ॥

रतिलेखागता मात्रा त्रि(स्त्रि)गुणाश्चेत्प्रयोजिता(:) ।
विभज्य त्रिषु पादेषु बाणलेखा तु सा भवेत् ॥ ४८१ ॥

✓ नखशिखापादितदैत्यवक्षःस्थल पालितजम्भारातिभुजबलप्रकर
कमलाकस्तूरिकापत्र प्रशमितनिखिलभुवनभङ्ग ।
करकमलपुटाकलितशङ्खसुदर्शन सुकृतशतलभ्यपुण्यदर्शन
गङ्गाप्रवाहप्रभवपदपङ्कजचित्रितजगत्त्रय कालिन्दीसलिलकेलिका-
रत सरभसरचितकालियनिकार जठरकुहरनि(-हित)विष्टपत्रय
जय जय देव जगन्निवास वासुदेव ।
सोमेश्वरदेवविरचिता बाणलेखेयमेला ॥ ४८२ ॥

पादैरेवंविधैर्बद्धा मात्रानियमसंयुता ।
व्य(त्य)क्तान्यनियमा गेया बाणलेखा विचक्षणैः ॥ ४८३ ॥

या मात्रा रतिलेखाया चा(श्चा)तुर्वर्ण्य(र्गुण्य)विभाजिता ।
पादत्रयेऽपि सा प्रोक्ता चन्द्रलेखा सुशोभना ॥ ४८४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शशधर(-कर)निकरविकासितकुवलयदलमेचक
सकलभुवनतलधर्माधर्मविवेचक
करकलितभुवनतलधर्माधर्म मधुकैटभशमन
नाभिनलिननिवासितचतुर्मुख चरितविविधजन देवकीमनोमण्डन
परिपालितसुरपतिविहरणनन्दन करकलितपाञ्चजन्य
भुजविजितमहासुरसमर
अधिशायित(शश)धरकरविशदभुजगतल्प प्रणतजनपीयूषधारा-
साराकल्प गुणगणनिलय निखिलगुणविरहित जय देव पीताम्बर
अखिलभुवनवास तुभ्यं नमः । आ सोमेश्वरविरचिता
चन्द्रलेखेयमेला ॥ ४८५ ॥

एतैर्लक्षणसम्बद्धैर्युक्ता पदकदम्बकै(ः) ।
इष्टरागार्थतालेयं चन्द्रलेखा प्रगीयते ॥ ४८६ ॥

एकमेकाधिकैर्वर्णैर्दशभिः पदमीरितम् ।
अनुप्रासेन संयुक्तं पदमन्यत्तथाविधम् ॥ ४८७ ॥

ईदृक्पदद्वयं पादस्तद्वत्पादद्वयं परम् ।
पूर्वपादद्वयस्यान्ते गमका वर्णवर्जितः(ताः) ॥ ४८८ ॥

यमकान्ते पदं कार्यं विरुधै(दै)र्वापि वर्णकैः ।
तृतीयपादप्रान्ते च कार्यो मेलापको बुधैः ॥ ४८९ ॥

ततस्तु ध्रुवकः कार्यः सानुप्रासपदद्वयः ।
ध्रुवकान्ते वर्ण्यनाम ततश्चाभोग इष्यते ॥ ४९० ॥

एलादेहमिमं प्राह सोमेश्वरमहीपतिः ।
एला मदनवत्येषा कथ्यते तदुदाहृतिः ॥ ४९१ ॥

अनवरतभुवनशरण प्रणतजनदुरितहरण । गमकः ।
सकलसुरासुरपूजितपदयुगलं
सततविबुधभयशमनं शङ्खाब्जचक्रपाणिदामोदरम् ।
विकचसरसीरुहवदनं सकलशुभनिचयसदनं
लक्ष्मीकण्ठकन्दलहार (रं) संसारमण्डपसूत्रधारं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नमामि रावणान्तकरं रामं गोपीजनमनोहरं रामं
॥आ॥ चोलइ(लेश्वर) सरस्वतीवदनाम्बुजमित्रम्। गेया
वि(हि)मदनावती वर्णैला ॥ ४९२ ॥

एवं प्रासयुतैः पादैर्द्विपदैस्त्रिभिरीरिताम्।
द्विपञ्चाङ्कादिकैर्वर्णैर्गातव्या मदनावली (ती) ॥ ४९३ ॥

एला मदनवल्याद्या तावल्लक्षणसंयुता।
वर्णैर्द्वादशसङ्ख्याकैः शशिलेखा निगद्यते ॥ ४९४ ॥

मरकतमणिनिचयरुचिरं दधतमुदधिशयनमचिरम्
पीताम्बरधरं लक्ष्मीपतिं विरचितविहगपतिगमनम्
अविनयमदम(त्ता)रिशमनम्। श्रीवत्साङ्कितवत्स(त्सं)-
पुण्डरीकाक्षम्। उदधि(रनिहित)निखिलभुवनम्।
दलितदशवदनभुजवनम्। तं प्रणमामि दशरथनन्दनम्।
जनकसुताहृदयनन्दनम्। केशिनिषूदनं केशवदेवं नारायणम्। आ
चोल्लयि सरस्वति(ती)वदनतिलकं गायन्ति शशिलेखा-
वर्णनम् ॥ ४९५ ॥

इत्यनुप्राससंयुक्तैः पादैः षड्भिरलङ्कृता।
द्वादशाक्षरसङ्ख्यातैः शशिलेखा प्रगीयते ॥ ४९६ ॥

त्रयोदशाक्षरे कार्ये पदे पादत्रयेऽपि च।
पूर्ववल्लक्षणं शिष्टं प्रभावल्यां निरूपितम् ॥ ४९७ ॥

विहितनतिततिमनुशुभभावकम्प(वकं) दशवदनवनपावकम्।
प्रलयलक्ष्मीहृदयवल्लभम्। देव(वं)भुवनपतिं हरिम्।
अधिसलिलनिधिविरचितसेतुम्। जगदवननिधनकरणहेतुम्।
शुद्धसंवेदनमयं माधवं मधुसूदनं विभुम्
चरणयुगलकृत(स)कलाक्रमणं त्रिभुवनमहितकमलावरणम्। मेधु।
दुरितभयहरं कौस्तुभभूषणं पीताम्बरवसनं (आ) श्रीधरम् ॥४९८॥

गीतवर्णं समं कृत्वा तालमानविभूषितम्(ता)।
एला मां प्रे(प्रभा)वती नाम गातव्या गीतकोविदैः ॥ ४९९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मनुसङ्ख्याक्षरपदैस्त्रिभिः पादैर्विभूषिता ।
एलेयं मालती नाम तदुदाहृतिरुच्यते । ॥ ५०० ॥

निजविभवरचितदशावतारम्
निशितशरशतक्षतदनुजभारम्
प्र(उ?)पूतनासूदनं केशिकन्दनं दामोदरम्
खगपतिगमनमभयप(प्र)दम्
करसरसिजकलितरुचिरगदम्
प्रचण्डदानव(वि)वासिनम् । मधुम(थ)नं रमापतिम् ।
शिशुसमुचितललितानिहि(लीलानिह)तकंसं स्मरत
नरहरिमिह परमहंसम् । प्रभु ।
संस्मर सङ्गभङ्गकरम् । शङ्खशार्ङ्गधरम् ।
श्रीवत्सवक्षसं त्रिभुवनगुरुं नाथनारायणं अ । ॥ ५०१ ॥

पादानुसारं गीतेन पदत्रयसमेन च ।
प्रयोगैर्बहुलैर्दीर्घैर्नादैर्गायन्नि(न्ति) मालिनीम् ॥ ५०२ ॥

तिथिसङ्ख्याक्षरपदैस्त्रिभिः पादैर्विवर्जितः (राजिता) ।
एला सा ललिता नाम तदुदाहरणं यथा ॥ ५०३ ॥

शिशिरकरकरनिकरसदृशशङ्खकरकमलं रणदलितकुलमुखं (प्र)
मुनिजनवन्दितं चराचरपतिम् । शुचिमणिचयरचितविकटमुकुटम्
बहुदितितनयसमरसुभटम् । अनुगृहीतपार्थं वसुदेवनन्दनम् ।
अजममरपतिसखं भजत हरिमतिशयितसकलमखम् ।
अनुगतवेदाङ्गमन्दिरम् । कैटभरिपुं पद्मनाभं पितामहजनकम् ।
॥ ५०४ ॥

ललितेनैव गीतेन ललितैर्गमकैस्तथा ।
एलेयं ललिता तज्ज्ञैर्गातव्या ललिताक्षरा ॥ ५०५ ॥

निशाकरकराः सङ्ख्या वर्णारब्धपदैस्त्रिभिः ।
पादैर्भागवती प्रोक्ता वर्णैला यतिभिस्तथा ॥ ५०६ ॥

कचाचितरुचिरचारुवक्त्रं पदकमलयुगनिपतितशक्रम् (प्र)
धृतगोवर्द्धनं कृष्णम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुनिभिरपि न समधिगतमपि (ति) गहनम्
अवनितलनिहितबलिदनुजानिहनम् (र्तिहरम्) ॥ प्र ॥
अदितिनन्दनं भुवनभूषणं देवम्
अभिनवजलधरभरसदृशवपुषम् ।
परमपरमपगतरुषम् ॥ मेघृ ॥
सततमहं ध्यायामि विष्णुम् । उपदेशानुगृहीतजिष्णुम् ।
शङ्खचक्रगदाधरं परमात्मानम् ॥ ५०७ ॥

गीतं सुधारसस्यन्दि वर्णमात्रेन (ण) भूषितम् ।
भोगवत्यां तु गातव्यं गमकैश्च विराजितम् ॥ ५०८ ॥

त्रयः पादाः पदैः षड्भिः सर्वैः सप्तदशाक्षरैः ।
एलायां कुसुमावल्यां स्युरुदाहृतिरुच्यते ॥ ५०९ ॥

क्षितिपवनगगनहुतवहजलभुवन प्रणतमुनिजनदितम(द)नुज
। प्र । वेदवेदाङ्गपारग लोकावास विभो श्रीपते ।
कुसुमशरविवशयुवतिशतरतिदक्ष शरनिपतनहतसुरपतिरिपुपक्ष ।
प्रतिरुचिपुरोधसं वामम(न)मूर्ते विमलकीर्ते ।
सततगमनविधिविरचितचतुरविहङ्गम
जय जय विदितजननमरणभयभङ्ग (प्र)
दुरिततृणदावानल । अरिष्टदावानल
सकलजनदयालो । शेषशय्याशयालो ॥ ५१० ॥

द्रुतविन्यासगीतेन निबिडैर्गमकैरपि
एला कुसुमवत्येषा गातव्या तारचुम्बिनी ॥ ५११ ॥

मण्डे(ण्ठे)न वा द्वितीयेन प्रतितालेन वा भृशम् ।
एला नियमतो गेया वाद्यैस्तालैः कदाचन ॥ ५१२ ॥

गणमात्रागणानां च रसस्य नियमोऽत्र न ।
वर्णानां नियमादेता वर्णैलाः परिकीर्तिताः ॥ ५१३ ॥

गीत्वा तु प्रथमं पादं गातव्यो गमकस्ततः ।
बिरुदं वर्णकं चापि ततो नादेन गीयते ॥ ५१४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादौ (दो) द्वितीय एवं च गातव्यो व(गे)यकारकैः।
तृतीयाङ्घ्रेः पदद्वन्द्वं गातव्यं पुर्ववद्बुधैः॥ ५१५॥

गमकैर्बिरुदैर्हीनं नादेन च विवर्जितम्।
ततो मेलापको ज्ञेयः सञ्चालाद्यक्षरादिकः॥ ५१६॥

उच्चनीचस्वरोपेतो गमकैर्विविधैर्वृतः।
ततश्च ध्रुवको ज्ञे(गे)यो रम्यो रागविभूषितः॥ ५१७॥

आभोगश्च ततो ज्ञे(गे)यो गाननामसमन्वितः।
पुनश्च ध्रुवको ज्ञे(गे)यो वारमेकमिति स्थितिः॥ ५१८॥

सर्वासामेवमेलानां गानयोगो भवेदयम्।
वर्णितः सोमभूपेन तद्विदामुपकारकः॥ ५१९॥

वर्णानष्टादशारभ्य वर्णैनैकेन वर्द्धिताः।
अष्टाविंशतिपर्यन्ता वर्णमाला प्रकीर्तिताः॥ ५२०॥

मधुकरी सुस्वरीका करिणी सुरसा तथा।
प्रभञ्जिनी कुञ्जिनी च विपुला च तडिल्लता॥ ५२१॥

विशाखा तरला चेति ततः कान्तिमती शुभा।
कथिता वर्णमालैला प्राज्ञैरेकादशैव हि॥ ५२२॥

इत्येता वर्णमालैला वर्णैलाः क्रमतो बुधैः।
गातव्यास्तु त्रिभिः पादैः पदैः षड्भिरनुक्रमात्॥ ५२३॥

कङ्कालः प्रतितालश्च द्वितीयो मद (ण्ठ) एव च।
चतुर्थे(र्वे)तेषु तालेषु गेयास्त्वेला यथारुचि॥ ५२४॥

आदिमध्यावसानेषु ताल एकः प्रयुज्यते।
द्रुतमध्यविलम्बेन मानेन सुविचक्षणैः॥ ५२५॥

उद्ग्राहे तु भवेद्यस्याः समानं चरणद्वयम्।
द्विर्गीत्वा पादमाद्यं च गातव्योंऽघ्रिद्वि(व्योऽङ्घ्रिर्द्वि)तीयकः॥५२६॥

गीतेनैकेन गातव्यं (व्यो) सप्रासः पदयोर्द्वयोः।
वर्णहीनस्ततो गेयो नवमेलापको बुधैः॥ ५२७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तालेनैकेन गातव्यो ध्रुवो वारद्वयं ततः ।
एकगीतं च सम्प्राप्तं ध्रुवस्याद्यं पदद्वयम् ॥ ५२८ ॥

तृतीयश्च चतुर्थश्च गातव्यो नव्यगीततः ।
वर्ण्य(र्ण)नीय गुणौ(णा)धारौ पादौ प्रासयुतौ ध्रुवौ ॥ ५२९ ॥

आभोगश्च ततः कार्यः स्वरैरुचै(च्चै)रलङ्कृतः ।
देवीनाम्ना समोपेतो नृपनाम्ना समन्वितः ॥ ५३० ॥

सरम्य(रम्यं) सलि(ली)लमाभोगं प्रयुज्य तदनन्तरम् ।
पुनर्ध्रुवं सकृद्गीत्वा ग्रहतालेन मुच्यते ॥ ५३१ ॥

गृ(ग्र)हे मेलापके मोक्षे कार्य एको यथारुचि ।
आदितालोऽथ कङ्कालः प्रतितालोऽथवा बुधैः ॥ ५३२ ॥

ध्रुवे चैव तथाऽभोगे ताल एकः (ष) प्रयुज्यते ।
ग्रहतालं परित्यज्य योज्यस्तालो यथेच्छया ॥ ५३३ ॥

एको रागो भवेदस्यां तालद्वितयमेवहि ।
लक्ष्म दण्डकिकायाश्च कथितः (तं) सोमभूभुजा ॥ ५३४ ॥

वारद्वितयमुद्ग्राहो गीयते च ततो ध्रुवः ।
ध्रुवं (वो) वारद्वयं गेयं (यो) पश्चादाभोग इष्यते ॥ ५३५ ॥

पुनर्गेयो ध्रुवः प्राज्ञैर्गीतलक्षणवेदिभिः ।
मद्रकङ्कालतालाभ्यां प्रतितालेन वर्जितम् ॥ ५३६ ॥

अन्यस्तालः प्रयोक्तव्यो दो(झो)म्बडे लक्षणं त्विदम् ।
गारुं गाव्ये(रुग्याख्ये)न तालेन द्वितीयेन तथैव च ॥ ५३७ ॥

अन्यो निःसारुकेन स्यादेकतालिकया तथा ।
षडमी रोंब(झोम्ब)डाः सिद्धा(ः) साम्प्रतं तालसंज्ञया ॥ ५३८ ॥

उद्ग्राहे पाद एकः स्यादेकः पादस्तथा ध्रुवे ।
द्विरुद्ग्राहः प्रगातव्यो ध्रुवो वारद्वयं ततः ॥ ५३९ ॥

वर्ण(र्ण्य)नामसमोपेत आभोगस्तदनन्तरम् ।
आवर्तेत ध्रुवो भूयः स भवेल्लम्बकाभिधः ॥ ५४० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उद्ग्राहे च ध्रुवे चैव पा(प)दमेकं प्रवर्तते ।
आभोगो वर्ण्यनामाङ्को विलम्भः परिकीर्तितः ॥ ५४१ ॥

तालस्त्वन्यो भवेद्यस्मिन्नुद्ग्राहः पादमात्रकः ।
ध्रुवस्तालयुतो यत्र प(प्र)तिलम्भः स उच्यते ॥ ५४२)

यस्योद्ग्राहपदं भिन्नं पूर्वार्धे(न) समन्वितम् ।
गीयते यत्र गीतज्ञैः स भागः कथितो बुधैः ॥ ५४३ ॥

लम्भकेषु भवेद्भागो नियमेन द्वितीयकः ।
झा(झो)म्बडेषु तथा भागविकल्पः प्रतिगीयते ॥ ५४४ ॥

यदुक्तं झोम्बडे लक्ष्म गमकस्य तदेव हि ।
गमकव्यतिरिक्तोयमादितालेन गीयते ॥ ५४५ ॥

लक्षणं लम्भकस्यैव किन्तु ताले(लो) ध्रुवो(वे) भवेत् ।
एकतालीति नाम्नैषा कथिता सोमभूभुजा ॥ ५४६ ॥

करणं च तथैवैला ढेङ्किका झोम्बडस्तथा ।
लम्भको रासकश्चैव तथा स्यादेकतालिका ॥ ५४७ ॥

कन्दवृत्ताधिकः कश्चित्प्रबन्धश्चेन्महा(न्) पुनः ।
अल्पः पश्चात्प्रगातव्य एष सूडक्रमः स्मृतः ॥ ५४८ ॥

त्रिपदी षट्पदी चैव धवलो मङ्गलस्तथा ।
उवी च चर्चरी चर्या राहडी दन्तिका(तण्डकस्)तथा ॥ ५४९ ॥

एते सूडेषु(ष्व)तो गेयाः प्रबन्धा लौकिका मताः ।
विप्रकीर्णाः प्रगातव्या व्यापारेषु पृथक् पृथक् ॥ ५५० ॥

त्रिपदी कण्डने चैव शृङ्गारे विप्रलम्भके ।
प्रायः शस्त्रिभिरेवैषा गेया नानार्थभूषिता ॥ ५५१ ॥

कथासु षट्पदी योज्या विवाहे धवलस्तथा ।
उत्सवे मङ्गलो गेयश्चर्या योगिजनैस्तथा ॥ ५५२ ॥

महाराष्ट्रेषु योषिद्भिरोवी गेया तु कण्डने ।
होलाक्रे चर्चरी गेया राहडी वीरवर्णने ॥ ५५३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दन्ती गोपालकैवर्तै गातव्या निजभाषया।
एवं विषयभेदेन प्रबन्धाः परिकीर्तिताः॥ ५५४॥

रागाणां च प्रबन्धानामुक्त(क्तं) लक्षणमुत्तमम्।
रम्यो गीतविनोदोऽयं कथितः सोमभूभुजा॥ ५५५॥

विधिर्येषां प्रबन्धानां यादृशः परिकीर्तितः।
तालेन भाषया रागैः स्वरैः पाटैश्च तेनकैः॥ ५५६॥

विधिना तेन ते गेया न विधिः प्रतिलङ्घ्यते।
विधिलोपे भवेद्दोषो न सम्यग् लक्षणं भवेत्॥ ५५७॥

अन्येषां च प्रबन्धानां भाषायां नियमो न हि।
मया संस्कृतया वाचा बोधायोदाहृतिः कृता॥ ५५८॥

भक्त्या भगवतो विष्णो(ः) प्रबन्धेषु श्रु(स्तु)तिः कृता।
तत्त्वेषु नियमो नित्यं प्रबन्धेषु विधीयते॥ ५५९॥

विष्णुं वा शङ्करं वापि ब्रह्माणं वा दिवाकरम्।
विघ्नेशं भैरवं वापि क्षेत्रपालमथापि वा॥ ५६०॥

देवीं सरस्वतीं गौरीं महालक्ष्मीं च चण्डिकाम्।
अन्याश्च देवताः ख्याता गेया(ः) स्तुतिपुरःसरम्॥ ५६१॥

नृपं वा युवराजं वा महाशक्तिगुणोर्जितम्।
महादेवीं बृहद्राज्ञीं प्रियां वा योषिदुत्तमाम्॥ ५६२॥

गायेन्निजेच्छया गाता यत्र चित्तं प्रवर्तते।
अर्थला(लो)भात्तथान्येषां प्रबन्धो नैव गीयते॥ ५६३॥

मानमिच्छन्यशो भूरि द्रव्यं बहु मनीषितम्।
न प्राकृते(तं) जने(नं) गायेत् कदाचित् व(द्वे)यकारकः॥५६४॥

यस्तु गायति लोभेन प्राकृतान् गुणवर्जितान्।
स निन्द्यः स्यात्सतां मध्ये हास्यस्यायतनं महत्॥ ५६५॥

देवान् गायति यो भक्त्या तस्य मुक्तिर्भवेद् ध्रुवम्।
यो गायति महीपालं तस्य मु(भु)क्तिर्निरन्तरम्॥ ५६६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति गीतविनोदोऽयं कथितः सोमभूभुजा ॥ ५६७ ॥

इति गीतविनोद(ः)।

सद्यो वाद्यविनोदोऽयं[1] प्रसङ्गादभिधीयते ।
पृथ[2]ग्वाद्यं भवेदेकं द्वितीयं गीतस[3]ङ्गतम् ॥ ५६८ ॥

नृत्तानुगं तृतीयं च तुरीयं गीतनृत्यगम् ।
एवं चतुर्विधं[4] वाद्यं विनोदार्थं महीपतिः ॥ ५६९ ॥

सभ्यैः सह समासीनः शृ[5]णुया[6]त्सुसमाहितः ।
वाद्येन राजते गीतं न नृत्यं[7] वाद्यवर्जितम् ॥ ५७० ॥

तस्माद्वाद्यं प्रधानं स्या[8]द्गीत नृत्यक्रियाविधौ ।
ततं च विततं चैव घनं सुषिर[9]मेव च ॥ ५७१ ॥

चतु[10]र्विधमिदं वाद्यं तस्य वक्ष्यामि लक्षणम् ।
तन्त्रीभेदैः क्रियाभेदै[11]र्वीण.व.द्यमनेकधा ॥ ५७२ ॥

दृढतन्तुसमुद्भूत[12]पदोक्तं (पटहं, पटोत्थं, वादित्रं) च तनं[13] मतम् ।
पटहोऽथ[14] हुडु[15]क्का च ढ(ड)क्के द्वे [16]घडसं त(सस्त)था ॥५७३॥

करडा (टा) मर्दल[17]श्चैव त्रिवली डमरुस्तथा ।
[18]रुजा (ञ्जा) च [19]काहुडा (कुडुवा) चैव सेलु[20](ल्लु)काश्च घड (ट)स्तथा ॥ ५७४ ॥

[21]डक्कुली च तथा ढक्का [22]ढम(व)सो दुन्दुभिस्तथा ।
[23]निःसाणकी तथा भेरीत्येवं[24] नानाप्रकारकम् ॥ ५७५ ॥

चर्मनद्धाननं यस्मादानद्धं परिकीर्तितम् ।
तालश्च कांस्यतालश्च घण्टा च[25] जयघण्टिका ॥ ५७६ ॥

---

१. D. पि । २. D. क्वा । ३. D. संमतं । ४. A. ध । ५. A. शृं । ६. D. राज । ७. D. त्तं । ८. A. स्यात् गीत्त । ९. A. नृक्रिया । १०. A. खि । ११. A. भेंदा । १२. D. दैःवी । १३. A पटत्वं च । १४. A. ततमतं । १५. A. ब । १६. A. टका च । १७. A. वाद्यसम्मतम् । १८. A. लाचै । १९. A. भुंजा । २०. A. कडुका । २१. A. कुका । २२. A. ढेकुली । २३. A. ढसो दुन्दुभिस्तथा । २४. A. निःसाणस्तवका मेरी । २५. D. व । २६. A. व ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पट्टकम्रादिकं वाद्यं [1]घनमित्यभिधीयते ।
[2]वंशश्च मुहु(शो मधुक)री चैव पाविका पावकस्तथा ॥ ५७७ ॥

मुरु(मुर)ली तित्तिरी शङ्खः काहा(ह)ला शृंग(शृङ्ग)मेव च ।
इत्येवमादिकं वाद्यं सुषिरं परिकीर्तितम् ॥ ५७८ ॥

चतुर्विधस्य वाद्यस्य क्रियाभेदोऽथ कथ्यते ।
एकहस्तं द्विहस्तं च कुड्डुपाघा[3]तजं तथा ॥ ५७९ ॥

गोलका[4]हननं चैव धनुराघर्षसम्भवम् ।
फूत्कारजनितं वाद्यं वादनं बहुभङ्गिकम् ॥ ५८० ॥

तस्य वादन[5]भेदस्य लक्षणं कथ्यतेऽधुना ।
विवादे च[6] परीक्षायामुत्सा[7]हे त्यागकर्मणि ॥ ५८१ ॥

श्रूयते च यदा वाद्यं पृथग्[8]वाद्यं तदुच्यते ।
देवगेहे नृ[9]पावासे गजवाजिपदान्तिके ॥ ५८२ ॥

आहवे चोत्सवे चेति तद्वदन्येषु कर्मसु ।
गीतनृत्यै[10]र्विना यत्तु भोगार्थं वाद्यते तदा[11] ॥ ५८३ ॥

तद[12]पि प्रोच्यते प्राज्ञैः पृथ[13]ग्वाद्यं पृथ[14]ग्विधम् ।
गीतेन सङ्गतं यत्तु तद्गीतानुगमुच्यते ॥ ५८४ ॥

नृत्तेन सहितं[15] यच्च तन्नृत्ता[16]नुगमीरितम् ।
गीतपात्रा(नृत्या)नुगं वाद्यं तद्वद्गीतनृत्य[17]गम् ॥ ५८५ ॥

एवं चतुर्विधं वाद्यं कथितं हर्षदायकम् ।
अङ्गुष्ठ[18]पर्वमात्रं यत्त[19]देवाङ्गुलमीरितम् ॥ ५८६ ॥

वितस्तिर्द्वा[20]दशैतानि तद्[21]द्वयं हस्त उच्यते ।
सुवृत्तः खादिरो दण्डो द्वादशाङ्गुलवेष्टनः ॥ ५८७ ॥

---

१. A. सुखिरं परिकीर्तिनं । २. A. drops this and the following two lines । ३. A. घातथा । ४. A. काननं चैत्र धाराघर्षणसंभवं । ५. A. नं । ६. A. व । ७ A. त्स्पागकर्मणि. ८. A. थक् वा । ९. A. नवावासे गंजवावासे गजवाजिपदांतिके । १०. A. तै । ११. A. दाः । १२. D. दा । १३. D. थक्वा । १४. D. कृनि । १५. A. जं १६. A. त्या । १७. D. त्त । १८. A. ष्ट । १९. A. त । २०. D. र्वा. । २१. D. तद्वयं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]रन्ध्रत्रयसमायुक्तः श्ल[2]क्ष्णो दृष्टिमनोहरः ।
षड्वितस्तिसमायामो [3]गर्भरन्ध्रसमन्वितः ॥ ५८८ ॥

सार्धा[4]ङ्गुलं तु त[5]द्रन्ध्रं सुवृत्तं द्विमुखं भवेत् ।
वरदारुसमुद्भूतः कार्य[6]स्त्र्यङ्गुलविस्तरः ॥ ५८९ ॥

अष्टाङ्गुला[7]यतो[8] रम्यः पार्श्वं तु चतुरङ्गुलः ।
कूर्मपृष्ठोन्नतो मध्ये पत्रिकाधारग[9]र्तकः ॥ ५९० ॥

तन्मध्ये योनिव[10]द्रन्ध्रं अ(न्ध्रम)धोभागे द्विद[11]ण्डकः ।
किञ्चित्समुन्नतो[12] मध्ये निम्नस्तत्पार्श्वयोरपि ॥ ५९१ ॥

दण्डाग्राधारसंयुक्तः सुवृत्तश्चतुरङ्गुलः[13] ।
रन्ध्रप्रमाणस्थौल्येन शङ्कुना च समन्वितः ॥ ५९२ ॥

एवंविधः स्यात्ककुभः खादिरो वा मनोहरः ।
सुपक्वं च सुवृत्तं च ना[14]भिसूत्रसमन्वितम् ॥ ५९३ ॥

वृत्त(न्त)स्थानं तु नाभिः स्याद[15]ङ्गुला सा भवेद्दूरा ।
परिणाहो भवेत्तस्य[16] द्विगुणस्त्रिंशदङ्गुलः ॥ ५९४ ॥

छेदयेद्वा([17]यित्वा) मुखं कार्यं द्वादशाङ्गुलविस्तृतम् ।
वीणादण्डाग्र[18]भागः स्यादधः सप्तदशाङ्गुले ।
तुम्बकस्य हि बन्धार्थमक्षिवत्सुखि([19]षि)रद्वयम् ॥ ५९५ ॥

अधोभागेन[20] द(ण्ड)स्य ककुभं विनिवेशयेत् ।
ककुभे पत्रिका स्थाप्या मिश्र[21]लोहमयी शुभा ॥ ५९६ ॥

विस्तारे द्व्य[22]ङ्गुला सा स्याद्दैर्घ्ये च चतुरङ्गुला ।
कूर्मपृष्ठ[23]समाकारा मध्यनिम्ना च किञ्चन ॥ ५९७ ॥

---

१. D. रंध्रद्वयमसायुक्तः २. D श्लः दृष्टिमनोहरः A. शूक्ष्णो दृष्टिमनोहरः । ३. D. गर्भे रंध्रः । ४. A. सार्धांगुलं । ५. A. तद्रधं । ६. A. ल । ७. D. ता । ८. A. प D. पाश्चात्यश्चतुरंगुलः । ९. D. र्त्तं । १०. A. वद्रंध्रवधो । ११. D. दंडिकाः । १२. A. तौ । १३. A. लं । १४. A. मानाश्चे नाभिसंयुतं । १५. A. त्रं । १६. A. स्या । १७. A. इत्वा । १८. A. य । १९. D. चि । २०. D. तु दंडः स्यात् । २१. A. श्रे । २२. A. घ्युला । २३. A. ष्ट ।

Dr. Urmila Sharma Collection, Varanasi

रन्ध्रद्वयं स्यात्प्रथमे त[1]न्त्रीं द्विगुणितां न्यसेत् ।
न्यसेदेक[2]गुणां तद्वदन्यरन्ध्रे विचक्षणः ॥ ५९८ ॥

आकृष्य द्विगुणां त[3]न्त्रीं प्रोतां निष्कासयेत्ततः ।
तां च द्विगुणमाव[4]र्त्य तुम्बनाभौ[5] निवेशयेत् ॥ ५९९ ॥

क[6]र्परं नारिकेलस्य स[7]म्मुखं पृष्ठ[8]रन्ध्रकम् ।
विन्यस्य त[9]न्त्रीं तद्रन्ध्रे कीलके परिवेष्टयेत् ॥ ६०० ॥

कीलकं [10]भ्रामयेत्तावद्यावच्च सुदृढं भवेत् ।
एवं [11]तुम्बकबन्धोऽयमाख्यातः सोमभूभुजा[12] ॥ ६०१ ॥

तुम्बकस्य तथा [13]चोर्ध्वं साधुसूत्र[14]विनिर्मितम् ।
[15]बन्धनं वेष्टयेद्दण्डे नागपाशेन [16]भूषितम् ॥ ६०२ ॥

तस्मिन् द्विगुणिते पाशे तन्त्र[17]तन्त्रीं निवेशयेत् ।
समां स्नायुमयीं [18]श्लक्ष्णां सुदीर्घां सुदृढां घनाम् ॥ ६०३ ॥

तयासम्पीड्य [19]तन्त्रीं च ककुभं परिवेष्टयेत् ।
तन्त्रीपत्रि[20]कयोर्मध्ये जीवां तत्र विनिक्षिपेत् ॥ ६०४ ॥

तन्वी [21]स्याद्व्यङ्गुला दैर्घ्ये यवगोधूम[22]विस्तृता ।
तया[23] सम्पद्यते नादस्तेन जीवेति सा स्मृता ॥ ६०५ ॥

किञ्चिल्ल[24]गति नोवेति यन्त्रिका[25] (तां) तत्र लग्निकाम् ।
लग्ना सैव कला ज्ञेया [26]वीणावादनवेदिभिः ॥ ६०६ ॥

पक्ववंश[27]समुद्भूता द्वादशाङ्गुलमायता ।
कनिष्ठा[28]नख[29]विस्तारा श्लक्ष्णा वृत्त(त्ता) मनोहरा ॥ ६०७ ॥

तुम्बकाच्च ततो[30]ऽधस्ता[31]दङ्गुलत्रयमानतः ।
वेष्टयेद्दोरिकां सूक्ष्मां त्रिगुणां मन्द्रसूचिकाम् ॥ ६०८ ॥

---

१. AD. तंत्री हि गुगिता न्यसेत् । २. A. वगुणां न तद्वदन्य । ३. A. तंत्री प्रोता निष्कासयेत्तम: ४. A. वृत्य । ५. A. भै । ६. A. कूर्यरं । ७. A. सु । ८. A. ष्ट । ९. A. तंत्री । १०. A. त्रा । ११. A. तुव । १२. A. जाः । १३. A. वार्द्धं । १४. A. त्रं । १५. D. तं वंधे वेष्टयेद्दण्डे । १६. D. दू । १७. A. तत्र निवेशयेत् । १८. A. च्दणं । १९. A. तंत्री । २०. D. त्री । २१. A. स । २२. D. वर्जिता । २३. D. था । २४. A. ल्लासनि नोवेत्ति । २५. A. का । २६. A. या वीणावादवेदिभिः । २७. A. शा । २८. A. ष्टा । २९. A. क । ३०. A. थो । ३१. A. स्था ।

CC0. In Public Domain, Digitizagtion by eGangotri

प्रधानरन्ध्रे निक्षिप्य[1] धार्या यत्नेन वैणिकैः ।
वीणामधोमुखीं[2] कृत्वा ग्राह्या वादनहेतवे ॥ ६०९ ॥

एतल्लक्षणयुक्तेयमेकतन्त्री विराजते ।
दर्शनात्स्पर्शनाद्वापि ब्रह्महत्यां व्यपोहति ॥ ६१० ॥

दण्डः शम्भुरुमा तन्त्री ककुभश्च जनार्द[3]नः ।
पत्रिका कमला तुम्बं ब्र[4]ह्मा नाभिः सरस्वती ॥ ६११ ॥

दोरको वासुकिः प्रोक्तो जीवाया[5]न्तु सुधाकरः ।
दो[6]रि..यां स्थितः सूर्यस्तस्मादेषा हि पावनी ॥ ६१२ ॥

दोरिकायास्तलोद्देशं वामे स्कन्धे वि[7]धाय च ।
पार्ष्णिना दक्षिणेनाथ ककुभं धारये[8]द्दृढम् ॥ ६१३ ॥

वामहस्तकनिष्ठा[9]या(यां) वि[10]न्यस्या परिसारिणी ।
वेष्टयित्वानामि[11]कायां समाकुञ्च्य च मध्यमाम् ॥ ६१४ ॥

तत्पार्श्वभागसंलग्नां तर्जन्यग्रेण धारयेत् ।
इति वामकरन्यासः[12] सारणे[13] धारणे[14] स्मृतः ॥ ६१५ ॥

वक्षःस्थलसमुद्देशे सारणास्थापनं भवेत् ।
अत ऊर्ध्वं ततो गच्छेत्क्रियाभेदमवाप्य सः ॥ ६१६ ॥

वामहस्ताद[15]धः कार्यो नितरां दक्षिण(:) करः ।
[16]त्यक्त्वा वितस्ति(स्तिं) जीवा[17]या(:) स्थानं तस्य विनिर्दिशेत् ॥ ६१७ ॥

क्रियाभेदमपेक्षा(क्ष्या)सावधश्चोर्ध्वं च गच्छति ।
विहायोपरि वाद्यं तु वामा[18]दूर्ध्वं न गच्छति ॥ ६१८ ॥

वामहस्ते क्रियाभेदाः का(सा)रणे (तिनि)गद्यते ।
सन्निविष्टा तथोत्क्षिप्ता तथा स्यादुभयात्मिका ॥ ६१९ ॥

---

१. A. ष्य । २. D. खां । ३. D. र्द्द । ४. A. ब्राह्मा । D. ब्रह्म । ५. A. यां तु सुधाकाः D. या तु सुधारकः । ६. D. कोदरकायां स्थितः । ७. D. हि धार्य च । ८. A. ये दृढं । ९. A. ष्टा । १०. D. तुंवस्यो परिसारणं । ११. D. कया । १२. A. सा । १३. D. णा । १४. D. णा । १५. D. ततः कार्या । १६. A. त्यक्का । १७. D. वयोः । १८. A. दूर्ध्वं प्रोक्ता सारिणा वैणिकैः सह ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तन्त्रीसङ्गमसुत्सृज्य संसार(सरे)द्यत्र सारणा ।
सन्निविष्टा तु सा प्रोक्ता सारि(र)णा वैणिकैः सह (दा) ॥ ६२० ॥

[1]स्पृष्ट्वा स्पृष्ट्वा समुत्सृज्य [2]तन्त्रीमुद्याति सा[3]रणा ।
उत्क्षिप्ता सा समाख्याता [4]निष्कले(ला) सकलेऽ(ला)थवा
॥ ६२१ ॥

उत्क्षिप्ता च [5]भवेत्क्काऽपि संस्पृष्टावसरे क्वचित् ।
सारणा द्विक्रियायोगात्सा भवेदुभयात्मिका ॥ ६२२ ॥

इति [6]त्रिविध उदिष्टः सारणः [7]सरणक्रमः ।
वादनेष्वेव[8]तन्त्र्याश्च सर्वत्रैव विधीयते ॥ ६२३ ॥

मध्यमामुपरि[9] क्रान्तं तन्त्री संवाद्यते यदि ।
तर्जन्या [10]स तु विख्यातः[11] पूतो नाम विचक्षणैः ॥ ६२४ ॥

स पात इति विज्ञेयस्तर्जन्यैव यदाहति[12](ः)
तर्जन्यान्तः प्रहरणं स लेखः (संलेखः) परिकीर्तितः ॥ ६२५ ॥

अन्तर्मध्यम[13]याघात उल्लेख इति कीर्तितः ।
[14]मध्य या वाद्यते घातः स तु स्यादवलेखकः ॥ ६२६ ॥

तर्जन्या पार्श्वतो हन्याद्धन्यते[15]वा(ऽना)मया हनिः (तिः) ।
[16]तदा तन्त्री[17] [18]समाख्यातो घातः[19] छि(तश्छि)न्नाभिधो बुधैः
॥ ६२७ ॥

मध्यमानामिकाभ्यां च बहिराहन्यते यदा ।
तन्त्री स सन्धितो नाम घातः ख्यातो मनीषिभिः[20] ॥ ६२८ ॥

[21]अतश्चतसृभिर्घातो द्रुतं भ्रमरसंज्ञकः ।
एवं दक्षिणहस्तेन क्रियते विविधा हतिः ॥ ६२९ ॥

---

१. A. स्पृष्टात्स्पष्टात्समुत्सृज्य । २. D. तंत्रा । ३. A. रि । ४. A. निःक । ५, A. न । ६. A drops. त्रि । ७. D. क्रमशस्तथा । ८. A. त्वेक तंत्राद्यः । ९. D. विक्रांता । १०. A. सा नु । ११. A. ता । १२. A. ति D. निः । १३ A. ग । १४. A. ध्येयो वाद्यने । १५. A. चेतवासयावनि । १६. A. य । १७. D. तंत्रि । १८. D. भ । १९. D. त । २०. A. मि । २१. D. अचतसृभिःसंघातो ।

Dr. Urmila Sharma Collection, Varanasi

सारणा यत्र संलग्ना तन्त्र्या(:) पृष्ठे प्रक[1]म्पिता ।
स्फुरितो नाम स[2] ख्यातो घर्षणा[3]च्छ्वसितो भवेत् ॥ ६३० ॥

अङ्गुलीभि[4]श्चतसृभिर्हन्यते हन्य(स्त)योर्द्रु[5]तम् ।
बहिस्तन्त्री यदा तज्ज्ञैः कर्तरीति बुधैः [6]स्मृता(तः) ॥ ६३१ ॥

केव[7]लं तु[8] नखैरेव चतुर्भिर्ह[9]न्यते द्रु[10]तम् ।
दक्षिणेनैव हस्तेन स[11]ङ्घा(घा)तो नस(ख)कर्तरी ॥ ६३२ ॥

अङ्गुष्ठपार्श्वसंस्पृष्टा कर्तरी च न (वच) हन्यते ।
कनिष्ठासारणाभ्यां च (वा) द्वाभ्यां निर्घोष उच्यते ॥ ६३३ ॥

अन्तस्त्वनामिकाघातो वाममध्याहति[12]र्बहिः ।
तदासौ रेफसंज्ञः स्याद्वैणिकैरभिभाषितः ॥ ६३४ ॥

अनामिकाबहिर्घात[13]स्तर्जन्या यदि धार्यते ।
नादस्तथा समाख्यातो [14]विन्दुर्नाम मनीषिभिः ॥ ६३५ ॥

सार[15]णं तु परित्यज्य तर्जनी निर्गता भवेत् ।
तया[16] चाहन्यते तन्त्री तदा निष्कोटितः[17] परः ॥ ६३६ ॥

सोत्क्षेपं हन्यते तन्त्री यत्र सा[18] सारणा [19]हतम् ।
दक्षिणे कर्तरीयोगः [20]स भवेत्स्खलिताभिधः ॥ ६३७ ॥

तर्जन्यङ्गुष्ट(ष्ठ)योरग्रे सकृ(कृष)तस्तन्त्रिकां यदि ।
शुकवक्त्रं[21](क्त्रः) स विज्ञेयः करो वीणाविचक्षणैः[22] ॥ ६३८ ॥

तर्जन्याद्यं कनिष्ठा[23]न्तं द्विविधं परिपत्त(वर्त)नम् ।
तयोस्तु पार्श्वसंस्पर्शाद् भ्रमणं क्रियते करे ॥ ६३९ ॥

स्वरस्थाने यदा [24]वक्री (तन्त्री) द्रुतमायाति सारिता ।
मूर्च्छनासंज्ञको हस्तो [25]दृश्यते वैणिकैः सदा ॥ ६४० ॥

---

१. A. कंपते । २. संख्यातो । ३. णाच्छ्व । D. णातश्वसि । ४. A. श्चा तिसृभिः । ५. A. र्द्रुढम् । ६. A. धै । ७. A. क । ८. D. व । ९. A. ह । १०. A. दतं । ११. A. ससंधातो न कर्तरी । १२. A. नि । १३. A. तो त । १४. A. विदुर्ना विदुर्नाम मनीषिभिः । १५. D. णां । १६. A. य वा १७. A. निष्कोटितां । D निःष्कोटितः । १८. A. स । १९. A. यु । २०. A. ग । २१. D. क्त्रं विज्ञेयः । २२. A. णै । २३. A. ष्टाद्यं विधं । २४. A. क्रमाद्रुत । २५. D. दर्शते ।

CC0. In Public Domain, Digitizagtion by eGangotri
Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतस्रः संहता यत्र कुञ्चितो[1]ऽङ्गुष्ठकस्तले ।
कनिष्ठा[2]तर्जनीस्पर्शस्तन्त्र्या[3]श्चेत्पार्श्वतो भवेत् ॥ ६४१ ॥

सम्प्रसार इति ख्यातस्त्व[4]र्द्धच(श्च)न्द्रकरः परः ।
कनिष्ठा[5]ङ्गुष्ठसंस्पर्शा[6]द् दृश्यते वाद्यकर्मणि ॥ ६४२ ॥

तलेन हन्यते [7]तन्त्री यदा दक्षिणपाणिना[8] ।
वामतर्जनि[9]कास्पर्शात्तलहस्तः[10] प्रकीर्तितः ॥ ६४३ ॥

अङ्गुष्ठे[11]न सहाङ्गुल्यो यदा स्युः कुञ्चिता मनाक् ।
कनिष्ठा[12]ङ्गुष्ठसंस्पर्शस्तदा स्यात् कुह[13]राभिधः ॥ ६४४ ॥

तदधः[14] स्फुरितो हस्तः श्वसितेन समन्वितः ।
उत्क्षेपपरिवर्ताभ्यां कर्तरीरेफ[15]संयुतम् ॥ ६४५ ॥

उल्लेखरेफसहितं धाराख्यं[16] वादने विदुः ।
शुकस्फुरिततो घो(निर्घो)षैः करभेदैरलंकृता[17] ॥ ६४६ ॥

अर्धकर्तरिसंयुक्ता[18] कौकुटी(कौक्कुटी) नाम कथ्यते ।
स्फुरितैर्मूर्छितैर्युक्तः कर्तरीत्रि[19]तयान्वितम् ॥ ६४७ ॥

कङ्कालसंज्ञकं वाद्यं प्राहुर्वाद्यविशारदाः ।
स्पृष्टतारं तु यत्सम्यक्कर्तर्या[20] श्वसितेन च ॥ ६४८ ॥

कुहरेण समायुक्तं वाद्यं वस्तु तदुच्यते ।
कर्तरीश्वसिताभ्यां यत् संयुतं कुहरेण तु[21] ॥ ६४९ ॥

रेफभ्रमरनिर्घोषै[22]र्द्रुतं तत्करणं भवेत् ।
मूर्च्छितस्फुरितैर्हस्तैः कर्तव्या श्वसितेन च ॥ ६५० ॥

निर्वर्त्य[23]ते तु यद्वाद्यं गजलीलं तदुच्यते ।
हस्तौ[24]पर्यायतो[25] यस्मिन्नधश्चोर्ध्वं च गच्छतः[26] ॥ ६५१ ॥

---

१. A. तोंगुष्टक D. तांगुष्टक्र २. A. ष्टा । ३. A. चेत्याश्वंतो । ४. A. स्तद्व्चंद्रकरः । ५. A. ष्टांगुल । ६. A. र्शाद । D. शात् द । ७. A तत्री । ८. A. नी । ९. A. मि । १०. A. स्तं । ११. A. ष्टे । १२. A. ष्टांगुल । १३. A. कु । १४. A. धस्फु । १५. A. संस्पर्शस्तदास्यात्कुहराभिधः । तदधस्फुरितो हस्तःश्वसितेन समन्वितः । उत्क्षेपपरिवर्ताभ्यां कर्तरीरेफसंयुतं । १६. A. ख्य । १७. D. ताः । १८. A. क्तौकुटी D. क्ताः कौक्कुटी । १९. A. त्रनयान्वितः । २०. D. र्याः । ३१. A. भु । २२. A. षेद्रु । ३३. A. र्त्त । ३४. A. स्तो । २५, A. तौ । २६. A. त ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रेफकर्तरिनिष्को[1]टैस्तलेनोपरिवाद्यकम् ।
निःशेषकरसंयोगाद् वाद्यं पक्ष(क्षि)रुतं भवेत् ॥ ६५२ ॥

एवं दशविधं वाद्यं प्राह सोमेश्वरो नृपः ।
उपयो[2]गोऽस्य शिक्षायां[3] विवादो नोपयुज्यते ॥ ६५३ ॥

वीणावादनसिध्यर्थं नि[4]र्मितं शङ्करेण हि ।
दृढास[5]नः स्थिरमनाः प्रगल्भश्च जितेन्द्रियः ॥ ६५४ ॥

गात्रसौष्ठवसंयुक्तो हस्तयोर्विजितश्रमः[6] ।
[7]अभीरुश्च सुशारीरो रागरागा[8]ङ्गकोविदः ॥ ६५५ ॥

वीणावादनविद्यायां वीणाकारो वरो भवेत् ।
सकलं निष्कलं चेति द्विविधं वाद्यमीरितम् ॥ ६५६ ॥

एकतन्त्र्यास्त्वयं भेदः कथितः शम्भुना पुरा ।
जीवा लग्ना प्रकर्तव्या यथा नादोऽभिजायते ॥ ६५७ ॥

स्थूलो[9] ध्वनिर्भवेद्यत्र वाद्यं तत्सकलं भवेत् ।
कलाहीना प्रकर्तव्या बि[10]न्दोरुत्पादहेतवे ॥ ६५८ ॥

तर्जनीमूलसंलग्ना तन्त्री वै[11] निष्कलं भवेत् ।
नवमुष्टिर्वेणुदण्डस्त्वङ्गुलद्वयवे[12]ष्टन(ः) ॥ ६५९ ॥

अङ्गुलद्वयविस्तारः ककुभो वक्त्र(क्र) उन्मुखः ।
मेषान्त(न्त्र)निर्मिता (तां)तन्त्री (न्त्रीं) सूक्ष्मा (क्ष्मां) श्लक्ष्णा
(क्ष्णां) [13]दृढा (ढां) समा (मां) ॥ ६६० ॥

अष्टादशाङ्गुलामा[14]ह तुम्बं वेदाङ्गुलानन[15]म् ।
दन्तनाभिसमायुक्ता दोरीबन्धनवर्जिता ॥ ६६१ ॥

पत्रिका खर्परी[16](कर्पर?) हीना भवेदालवणी शुभा ।
निष्कलस्य प्रकारेण वाद्या[17] ला(ल)वणिका सदा ॥ ६६२ ॥

---

१. A. कोटैस्तलेनोपरिवाद्यकं पंक्षरुतं भवेत् । २. D. भोगो । ३. A. या । ४. A. निमित्तं । ५. A. न । ६. A. म । ७. A. आभीरस्तु । ८. D. गांक । ९. A. ल । १०. A. च्छि । ११. A. वे । १२. D. विस्तरः मेषांतनिर्मिता । १३. A drops. दृढा । १४. D. नाह । १५. A. तं । १६. D. रा । १७. D. द्य ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बिन्दुनादसमोपेतां तुम्बं निक्षि[1]प्य वक्षसि ।
मध्यमानामिकाभ्यां च वाद्या दक्षिणपाणिना[2] ॥ ६६३ ॥

मन्द्रे मध्ये च तारे च त्रिस्थाने बिन्दुरिष्यते ।
तुम्बीमूलं समुत्पीड्य वामाङ्गुष्ठेन धारयेत् ॥ ६६४ ॥

इतराभिस्तु सर्वाभिः स्वरव्यक्तिर्विधीयते ।
त्रिस्वरो दक्षिणो पाणिर्वाम[3]स्तत्र चतुःस्वरः॥ ६६५ ॥

एवं सप्रकमेकं स्यादाला(ल)वण्यां प्रतिष्ठितम् ।
किन्नरी द्विविधा प्रोक्ता द्वितुम्बा च त्रितुम्बिका ॥ ६६६ ॥

द्वितु[4]म्बिका भवेल्लघ्वी त्रितुम्बा बृहती भवे[5]त् ।
पञ्चाङ्गुलाधिकं[6] दैर्ध्यं वितस्तित्रयसम्मितम् ॥ ६६७ ॥

पञ्चाङ्गुल[7]परीणाहो वेणुरन्ध्रे सुरन्ध्रके ।
पञ्चाङ्गुलाग्रतः कार्यः साध्द[8]द्व्यङ्गुलविस्तृ[9]तः ॥ ६६८ ॥

शा[10]ङ्कराक्ष(क्षा)मयोदग्र (ग्रः) ककुभः कीलकान्वितः ।
अर्धाङ्गुलेन हीना स्यात्ककुभात्पत्रिकायसी ॥ ६६९ ॥

दै[11]र्घ्या वि(र्घ्यवि)स्तारतश्चैव कूर्मपृष्ठोपमा व[12]शा ।
गृध्रपक्षास्थिनलिका दण्डपक्षेण[13] योजिता (ताः) ॥ ६७० ॥

[14]चतुर्दशमिताः कार्याः कनिष्ठाङ्गुलिविस्तृताः ।
अङ्गुलाद्व्यङ्गुलं यावत्क्रमशः किञ्चिदुच्छ्रिताः ॥ ६७१ ॥

वा[15]सोमसीविमिश्रेण पञ्चतेन्नविधारिताः ।
आरभ्य [16]त्र्यङ्गुलात्किञ्चिद्यावच्च चतुरङ्गुलम् ॥ ६७२ ॥

अग्राद् द्व्यङ्गुलमुत्सृज्य सुखि(षि)रं तत्र कल्पयेत् ।
ततोऽप्यङ्गुलमुत्सृज्य मेट(ढ़कं) शरपुङ्खवत् ॥ ६७३ ॥

---

१. A. ब्य । २. A. नां । ३. D. हस्तश्च । ४. D. तुंबी च । ५. A वे । ६. A. कंर्घ्यं । ७. A. लः । ८. द्धं । ९. A. स्त । १०. D. शाक । ११. D. र्घ्यादितरतश्चै । १२. D. च । १३. A. न । १४. D. drops this line । १५. D. drops this line । १६. A. अं ।

Dr. Urmila Sharma Collection, Varanasi

कर्तव्यमङ्गुलोत्सेधं [1]तन्त्रीधारणकारणम् ।
अयोमयीं[2] तत्र तन्त्रीं[3] गजकेशसमां[4] दृढाम् ॥ ६७४ ॥

वेष्टयित्वा चले शंसौ (कौ) तं च रन्ध्रे विनिक्षिपेत् ।
[5]षड्छिद्रोसौ भवेत्कण्ठे द्वितीयः स्थिरकीलकः ॥ ६७५ ॥

ऊर्ध्वरन्ध्रादधस्ताच्च[6] प्रथमः [7]शङ्कुरिष्यते ।
पुरतो मेटका (त्) [8]किञ्चित्स्थिर[9]शङ्कुर्निवेश्यते ॥ ६७६ ॥

[10]भ्रामयित्वा व (च)लं शङ्कु (ङ्कुं) तन्त्री (न्त्रीं) कुर्यात्तथा दृढाम् ।
आयसं कि (की)लकं लग्नं चलं शङ्कोर्गलस्थले ॥ ६७७ ॥

[11]स्थापयेत्स्थिरशङ्कौ तु स्थायिमान[12]प्रमाणतः ।
स्वराः(र)स्थानेषु संस्थाप्याः सारिकास्ताश्चतुर्दश[13] ॥ ६७८ ॥

दण्डस्य ककुभस्याधः [14]सन्धौ तच्च नियोजयेत् ।
[15]तृतीयतुर्ययोः सार्योर्मध्ये तुम्बं द्वितीयकम् ॥ ६७९ ॥

प्रथमं लघु [16]तुम्बं स्याद्द्वितीयं पृथुतुम्बकम् ।
कथिता किन्नरी लघ्वी तुम्बकद्वयभूषिता ॥ ६८० ॥

कथ्यते साम्प्रतं रम्या किन्नरी महती मया[17] ।
[18]द्विवितस्त्यधिकायामा परिणाहेङ्गुला[19]धिका ॥ ६८१ ॥

स्ना[20]युतन्त्री समायुक्ता तु[21]म्बकत्रयभूषिता ।
शेषं स्या[22]त्किन्नरीलक्ष्मसार(री)मेटकशङ्कुषु ॥ ६८२ ॥

ककुभे पत्रिकायां च बृहती कर्तरी (किन्नरी) भवेत् ।
अन्याश्च बहवः सन्ति वीणास्तासामिमा वराः[23] ॥ ६८३ ॥

ततस्त्वन्या मया[24]नोक्ता विनोदानुपयोगतः ।
सारीककु[25]भयोर्मध्ये दक्षिणेन करेण तु ॥ ६८४ ॥

---

१. A. तत्री । २. A. यां । ३. A. तंत्री । ४. A. मा । ५. A. डुच्छि । ६. D. त्र । ७. A. शकु । ८. A. किंचि । ९. A. शंर्ति । १०. This and the following line is dropped in D । ११. A. स्थ । १२. A. म । १३. A. शा । १४. A. संधो । १५. D. तुंबीय ॥ । १६. D. तुंबः । १७. A. था । १८. A. वितस्त्य । D. वितस्त्यभ्यधिकायामा । १९. A. णा । २०. A. स्नां । २१. A. तुबक । २२. D. त्कर्तरी लक्ष्मी । २३. A. रा । २४. A. न्योक्ता । २५. A. कुं ।

धारयेत्किं[1](त्कि)न्नरीदण्डं मुष्टया शिथिलबन्धया[2] ।
तर्जनीमध्यमायु[3]क्ता उ(तू)ल्लेखपरिलेखने ? ॥ ६८५ ॥

व्याधि ([4]वाद्य)यन्त्रे प्रयोगेषु तन्त्र्यापाद[5]नकर्मणि (वाद्ययन्त्र-
प्रयोगेपु तन्त्रावादनकर्मणि) ।
तर्जनीमध्यमा[6]नाम(मा) सारीणा[7]मन्तरेन्तरे ॥ ६८६ ॥

प्रचा[8]र्यन्ते स्वरव्यक्तैर्वा(क्त्यै वा)मा:[9] किन्नरिवादने ।
बीजवृक्षशरीरोऽयं [10]कर्करैः सुदृढीकृतः ॥ ६८७ ॥

चर्मवद्धतुलो[11]ङ्गो (योऽ)सौ ब्रह्मणा निर्मितः पुरा ।
एकविंशाङ्गुला[12]यामो मध्ये किञ्चित्पृथुर्भ[13]वेत् ॥ ६८८ ॥

मध्या(सिध्य)ङ्गुलं मुखं वामं दक्षिणा[14]स्य (स्यं) त्रयोदश ।
एकाङ्गुलाधिके [15]वक्री [16]चर्मणी (णि) वर्तुले घने ॥ ६८९ ॥

मध्ये तयो[17]श्च रन्ध्रा[18]णि चत्त्वारिंशत् [19]पृथक् पृथक् ।
[20]प्रान्ते रन्ध्राणि कुर्वीत तेषा[21]मङ्गुलमन्तरम् ॥ ६९० ॥

तेषु रन्ध्रेषु वध्रं च सीव[22]नीक्रमतो न्यसेत् ।
तस्मि[23]न्रन्ध्रे तु प्रोतव्या विवरा[24] कर्करात्मिका ॥ ६९१ ॥

अधश्चोर्ध्वं च कर्तव्या पृष्ठोदरनिदर्शिनी ।
मध्यं विवेष्टयेत्प्राज्ञ[25]स्त्रिभि[26]र्वध्रैर्दृढं ततः ॥ ६९२ ॥

तत्र गोमू[27]त्रिकाबन्धं द्विरन्ध्रं स(सं)मुखं न्यसेत् ।
[28]प्रान्ते कुण्डलिके[29] कार्ये कच्छा(क्षा)बन्धनहेतवे ॥ ६९३ ॥

तत्र कच्छां (क्षां) विनिक्षिप्य सव्यतो द्विगुणं न्यसेत् ।
प्रोतां द्विगुणितां कक्षां वध्र[30]नद्धां द्विरश्चलाम् ॥ ६९४ ॥

---

१. D. त्किर्तरी । २. A. ना । ३. A. नाम । ४. A.D. श्री । ५. A.D. वा । ६. D. मासारीणामंतरेतरे । ७. A. णां मेतरेतरे । ८. A. सार्थते । ९. A. मा । १०. D. कक्करैः । ११. D. प्रे । १२ D. लो । १३. A. भ । १४. A. ण । १५. A. च । १६. D. व । १७. D. पा । १८. A. ध्र । १९. A. drops one पृथक् । २०. A. श्रींत । २१. D. म्रा । २२. D सावरीतु नतो । २३. A. नंध्रे । २४. A. च । २५. A. ज्ञा । २६. A. र्वध्रे । २७. A. गोमूंत्रिकावद्धं । D. गेसू । २८. A. प्राते । २९. A. ते । ३०. D. म ।

CC0. In Public Domain, Digitizagtion by eGangotri

कुर्वीत यस्य तन्नाम मृदङ्ग इति कीर्तितम् ।
भूतिमिश्रं [1]तथा भक्तं [2]मृदितं च[3] सुचि[4]क्कणम् ॥ ६९५ ॥

पिण्डकं तत्र वामास्ये पूरिकामानतो न्यसेत् ।
तनुमात्रं[5] तथा भक्तं सव्यवक्त्रे विलेपयेत् ॥ ६९६ ॥

ततस्तस्य भवेन्नादः [6]श्रवणोत्सवकारकः ।
तक्कारश्च धिक्कारश्च थोंका[7]रो हेंकरस्तथा ॥ ६९७ ॥

[8]नक्कारश्च सदंक्कारो मृद[9]ङ्गे पाटवाचकाः ।
सर्वतु(तू)र्येष्वयं मुख्यो मृदङ्गो नादशोभनः[10] ॥ ६९८ ॥

अस्य संयोगमासाद्य वाद्यं सर्वं सुशोभते ।
[11]घातज्ञाः स्थूलवाद्याश्च न विन्द[12]त्य(न्त्य)नुयायिनाम्(ताम्)
॥ ६९९ ॥

अव्यक्त[13]पाठ(ट)का ज्ञेया निन्द्या मार्द[14]ङ्गिका बुधैः ।
मसृणे[15] वादने दक्षा गीतघातविशारदाः ॥ ७०० ॥

हौडु[16]क्किकस्यानुगताः श्रेष्ठा मार्द[17]लिका(:) स्तुताः ।
खदिरानोकनो[18](हो)द्भूतो मिता[19]स्यो मध्यमो महान् ॥ ७०१ ॥

त्रिवितस्तिर्भवेद्दै[20]र्घ्याष(त्ष)ष्ठयङ्गुलसुविस्तृतः[21] ।
पञ्चाङ्गुलं भवेत्तस्य मुखं सव्यापसव्यकम् ॥ ७०२ ॥

चतुर्विंशाङ्गुलं लो(लौ)हं दक्षिणं[22] वलयं भवेत् ।
वामस्य वलयं वल्या[23](ल्लयाः)कुर्यात्किञ्चित्ततोऽधिकम् ॥ ७०३ ॥

चतुरङ्गुलमुत्सृज्य वामास्ये लोहपत्रिकाम् ।
अङ्गुलत्रयविस्तारां हढं[24] कण्ठे विवेष्टयेत् ॥ ७०४ ॥

---

१. A. न । २. A. मदिनं । ३. A. ब । ४. A विक्कर्णे । ५. D. नतया । ६. A. श्रा । ७. D. क । A. कारकाः । ८. A. नंक्कारश्चैव । ९. D. दंगो । १० A. नाः । ११. A. घृ । १२. A. दंत्यसमुघिनां । १३. D. क्तः पाक्रो विज्ञेया । १४. D. ई । १५. D. णो वादना गीतविद्याघातविशारदः । १६. A. टुंकि । १७. D. ई । १८. A. तो । १९. मित्यास्यो । २०. A. द्वैर्घ्यात्पिष्टागुल । २१. A, स्ततां । २२. A. णे । २३. A. ल्या । २४. D. ढ ।

Dr. Urmila Sharma Collection, Varanasi

कलशा[1]श्च भवेत्सप्त रीतिकोटि(किट्ट?)विनिर्मि[2]ताः ।
परितः[3]कीलिता[4]स्तेषां चतुरङ्गुलमन्तरम् ॥ ७०५ ॥

रन्ध्राणि तेन मानेन कुर्यात्सव्या[5]स्यचर्मणि ।
आवेष्ट्य कलशांस्तांश्च वलयं लोहनिर्मितम् ॥ ७०६ ॥

आकृष्य सुदृढं कुर्यात्सप्तरन्ध्रनिबन्धनैः ।
[6]षण्मास(षण्मासि)कस्य वत्सस्य मृतस्यादाय पारिका[7]म् ॥७०७॥

[8]आङ्गुठ्यं (आगुष्ठ्य) वल्लीवलयं तया सुश्लक्ष्णभूतया ।
वामास्य (स्ये[9]) तत्समावेश्य[10]वलयं सप्तरन्ध्रकम् ॥ ७०८ ॥

कलशेषु निबन्धनीयाच्छिथिलं सूक्ष्मरज्जु[11]भिः ।
सव्यस्य[12] वलयस्यान्ते कल[13]शेभ्यो बहिस्ततः ॥ ७०९ ॥

बन्धनीया[14]दृढं कक्षा कटिवेष्टावधिस्थिता ।
एवं लक्षण[15]संयुक्तः पटहः[16] स्थानकाभिधः ॥ ७१० ॥

स्त्रीनृत्तस्योप[17]युक्तोऽयं कथितः सोमभूभुजा ।
दक्षिणास्ये[18] तु देकारः कवर्गस्य(श्च) द(ङ)वर्जितः ॥ ७११ ॥

टवर्गश्च तवर्गश्च पाट[19]वर्णाः प्रकीर्तिताः[20] ।
वामवक्त्रे[21] तु झ[22]ङ्कारस्त्व[23]धिकः परिहृष्य(श्य)ते ॥ ७१२ ॥

व्युत्क्रमेण यथाशोभं वाद्यन्ते वाद्यवेदिभिः ।
बाह्यं शरीरजं चर्म [24]कवलं परिकीर्तितम् ॥ ७१३ ॥

आन्तरं जाठरं चर्म नाम्ना स्यादियमुद्दली ।
ईदृशः पटहो य[25]स्तु कवलाप्रमुखद्वयः[26] ॥ ७१४ ॥

नाटके घ[27]टते तज्ज्ञैरूर्ध्ववक्त्रस्तु वाद्यते ।
चतुर्वि(विं)शाङ्गुलायामा [28]स्त्र(स्त्व)ष्टाविंशति [29]व(तिवे)ष्टनाः
॥ ७१५ ॥

---

१. A. सा । २. A. मि । ३. A. ताः । ४. A. प्ता । ५. A व्य । ६. D. षष्ठमासिक । ७. A. का । ८. D. आंगुल्य । ९. A. स्पे । १०. A. श्पा । ११. A. ज्जुरिः । १२. A. व्यस्प । १३. D. ळ । १४. A. हमी । १५. A. क्षसंयुक्तः । १६. A. ह । १७. A. य । १८. D. स्या । १९. A. टर्णाः । D. टवर्गाः । २० A. ता । २१. A. क्रे । २२. A. सें । २३. D. स्व । २४. A. के । २५. A. ध । २६. D. यं । २७. A. घघवत्तत्तै । २८. D. स्व । २९. D. वेदना ।

CC0. In Public Domain, Digitizagtion by eGangotri

पिण्डेऽङ्गुलमिता सा स्याद[1]ष्टाङ्गुलमिता[2]न्तरा ।
एकादशाङ्गुले(लं)कार्ये(र्यं)[3] वल्लीमण्डलिके(लकं) शुभे(भम्) ॥७१६॥

उद्दलीपिहिते(तं) कार्ये(र्यं) षड्[4]न्ध्रे(न्ध्रं) सूत्रगुम्फिते(तम्) ।
अर्गलानि पुरस्त्रीणि द्विपार्श्वकलशानि च ॥ ७१७ ॥
पश्चाद्बे[5]धं (बन्धो) विधातव्ये (व्यः) तद्वत्कलशसंयुते ।
मध्ये सूत्रान्तराले च [6]भवेदुदरपट्टिका ॥ ७१८ ॥

तदन्त[7]र्वाद्यकाले [8]तु वामहस्तं विनिक्षिपेत् ।
रज्वा समं वितिपक्क(क्ष) द्वये[9]ऽप्यु(योरु)त्कक्ष[10]कौ तयोः ॥ ७१९ ॥
तद्योजनाय द्विगुणा[11]कर्तव्या स्कन्धपट्टिका[12] ।
[12A]अङ्गुलस्य चतुर्भागं छिद्रमे[13]कं प्रकल्पयेत् ॥ ७२० ॥

[13A]हुडुक्कायाश्चतु[14]र्भागे नादार्थं वाद्यवाह(द)कः ।
कृतं भूलोकमल्लेन स्कन्धवाद्यस्य लक्षणम् ॥ ७२१ ॥
झे[15]ङ्कारोऽत्र हुडुक्का[16]यां [17]प्रधानः परिकीर्तित(ः)
पादा(टा)क्षराणि सर्वाणि पटहे यानि [18]तानि तु ॥ ७२२ ॥
[19]स्कन्धकूर्परयोगेन [20]सश्चो(श्चः) हौडुक्किकेऽ(पाटहिके)धमः ।
[21]अङ्गुष्ठ [22]मणिबन्धेन (च) म(स) श्चः पाटहिके वरः ।
पादकम्पप्रयोगेण स चो(सश्चो) होडुकि(क्कि)को (केऽ)वरः ॥७२३॥
[23]कूर्परा (रे) मणिबन्धे च समुद्भूतस्तु[24] मध्यमः ।
स्कन्धदेशप्रकम्पोत्थ(ः) करकूर्परसंयुतम् (तः) ॥ ७२४ ॥
पादकम्पविहीनश्च सचो (सश्चो) हौडु[25]कि(क्कि)को (के)वरः ।
संचे(सश्चे)न रहितावेतौ तथा तालेन दुर्लयौ ॥ ७२५ ॥

---

१. A. द्द । २. A. तेतरा । ३. A. अलि । ४. A. ड्रंधेव्येत्तः ५. A. द्वेधयिततद्व ६. A. भेंवेदुदरि । ७. D. दवत् द्विकाले । ८. A. नु । ९. A. यो । १०. D. कस्त । ११. D. णाः । १२. D. काः । १२A. This line is repeated on the next page. १३. A. मेकल्प । १३A. These three lines are repeated on the next page. १४. A. भा । १५. A. झ । १६. A. का । १७. D. प्राधान्यं परिकीर्त्तितं । १८. A. नानि । १९ D. gives this line after the following श्लोक । २०. D स्कंधश्चेदधमोत्तमः । २१. A. drops this stanza which is repeated on the next page. २२. D. मणिवणिवन्धेन । २३. A. कूर्पराणि विवंधाश्च समुद्भूतस्तु मध्यमः । २४. D. स्त । २५. A. च्लौटुक्किको मतः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अलग्ना[1]ङ्गुलिहस्तौ च गीतनृत्य[2]बहि[3]ष्कृतौ ।
हाड्डु[4](हौड्डु)क्किकः पाटहिको[5] भि[6]न्द्यादे(निन्द्यावे)वंविधौ मतौ ॥७२६॥

अथ[7] मध्यमयोर्वक्ष्ये लक्षणं सम्प्रयागतम् ।
सर्वपाटप्रयोगेषु ययोः सं[8]लगतः करौ[9] ॥ ७२७ ॥
[10]संच(सञ्च)हीनौ लयाभिज्ञौ [11]मध्यमौ तौ प्रकीर्तितौ ।
[12]सुसंचौ (सञ्चौ) लग्नहस्तौ च सर्वपाटविशारदौ ॥ ७२८ ॥
गीतनृत्तलयाभिज्ञौ तद्विपाटविचक्षणौ ।
बहुला(ल)प्रतिभायुक्तौ तौ पाट[13]वहुड्डुक्किकौ (पाटहिकहुड्डुक्किकौ)
॥ ७२९ ॥

वादकेषु समीचीनौ कथितौ वाद्यवेदिभिः ।
अङ्गुल[14]स्य चतुर्भागं छिद(द्र)मेकं प्रकल्पयेत् ॥ ७३० ॥
हुड्डुक्का[15]याश्चतुर्भागे नादार्थं वाद्यवाद[16]कः ।
अङ्गुष्ठमणिबन्धेन मञ्च(सञ्चः) पाटहिके वरः ॥ ७३१ ॥
पादकम्पप्रयोगेण सचो (सञ्चो)होड्डुक्कि(क्कि)केऽधमः ।
पटहस्य हुड्डुक्कायाः पञ्च सञ्चान्ब्रुवेऽधुना ॥ ७३२ ॥
स्कन्धकूर्परयोस्तद्वदङ्गुष्ठमणिबन्धयोः ।
वामस्य चरणस्यापि कम्पः सञ्चोऽभिधीयते ॥ ७३३ ॥
श्रेष्ठः पाटहिकः सञ्चादङ्गुष्ठमणिबन्धयोः ।
स्कन्धकूर्परसञ्चात्तु नीचः पटहवादकः ॥ ७३४ ॥
वरो हौड्डुक्किकोऽङ्गुष्ठकूर्परस्कन्धसञ्चतः ।
सञ्चाभ्यां मणिबन्धोत्थकौर्पराभ्यां तु मध्यमः ॥ ७३५ ॥
असौ वामाङ्घ्रिसञ्चेन वादनादधमो भवेत् ।
[17]झ(झे)ङ्कारोऽत्र हुड्डुक्कायां प्रधानः[18] परिकीर्तितः[19] ॥ ७३६ ॥

---

१. A. ग्रांगु । २. A. त्त । ३. A. हिक्ट । ४. A. होट्टुक्किकः D. होड्डुकिकः । ५. A. क्को । ६. D. भिंधा । ७. A. न्य । ८. A. सलगतं । ९. A. रौः । १०. D. स च । ११. A. तद्विघातविचक्षणौ । १२. A. drops this श्लोक । १३. A. टहुक्क । १४. A. ल्य । १५. A. का । १६. D. ह । १७. A. झ । १८. D. नं । १९. D. तं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादा(टा)क्षराणि सर्वाणि पटहे यानि तानि तु ।
सव्यास्य[1]मुद्दलीनद्धं[2] वामास्यं रज्जुयन्त्रितम् ॥ ७३७ ॥

हुडुक्का[3]या यदा चैवं तदा तद्ध[4]ट(ड)सं भवेत् ।
मध्यमाङ्गुलि[5]सन्धावङ्गुष्ठायां च(न्धौ चाङ्गुष्ठं च वि)नियोज्य च ॥ ७३८ ॥

एवं दक्षिणहस्तेन [6]मञ्चनो(दना)क्तेन घर्षयेत् ।
वामाङ्गुष्ठेन सम्पीड्य चाङ्गुलीभिस्तु वादयेत् ॥ ७३९ ॥

गोबा[7](ङ्का)रस्तत्र[8] मुख्यः स्याद् घर्षणादुपपादितः ।
द्वादशाङ्गुलदीर्घा स्यात्किञ्चिन्मध्य(ध्ये) कृशा भवेत् ॥ ७४० ॥

अश्ववालान्विते वक्त्रे हुडुक्का(क्का) चे[9]त्परावधिः ।
[10]कुडु(डु)पेन वादनीया हस्तेनापि विच(च)क्षणैः ॥ ७४१ ॥

[11]रुक्का(ढेङ्का)रस्त[12]त्र मुख्या[13](ख्यः) स्या[14]द्धस्तपातेन जायते ।
घटश्चैव तटश्चैव डगिश्च[15] कुडुपोद्भवाः ॥ ७४२ ॥

[16]पाटवर्णा इमे सर्वे ढक्कायां परिकीर्तिताः ।
षोडशाङ्गुलदीर्घा स्यान्मुखे चाष्टाङ्गुलान्तरा ॥ ७४३ ॥

मध्यप्रदेशे[17] कर्तव्या षोडशाङ्गुलवेष्टना ।
शेषं लक्ष्म[18] हुडुक्काव[19]त्का[20]ला(कण्ठा) र्गलविवर्जितम् ॥ ७४४ ॥

पाटाक्षरं हुडुक्कावन्म[21]ण्डीढक्कासु कल्पितम् ।
मण्डलीमध्यरज्जुं च वामहस्तेन पीडयेत् ॥ ७४५ ॥

[22]सव्यहस्तगतं वक्त्रं सव्यहस्तेन वादयेत् ।
शक्तिदैवतपूजायां चर्या[23]गानविधौ तथा ॥ ७४६ ॥

वादनीया प्रयत्नेन मण्डीढक्काविचक्षणैः ।
विंशत्यङ्गुलदीर्घा स्यात्सप्ताङ्गुलमिता मुखे ॥ ७४७ ॥

---

१. D. स । २. D. द्ध । ३. A. का । ४. A. तद्दर । ५. D. सन्ध्यायावंङ्गुष्ठाय । ६. D. मवनाकेन । ७. D. चा । ८. D. ट । ९. A. च परंवधि । १०. A. हुहुडुकानो । ११. A. रू । १२. D. त्रय । १३. D. रव्यो । १४. D. स्याधस्तपादेन जायते । १५. A. श्वडुपोद्भवाः । १६. D. प । १७. D. श । १८. A. क्षमा । १९. D. चे । २०. A. त्कठर्गला । २१. D. मडी । २२. D. सर्वे । २३ D. मा ।

Dr. Urmila Sharma Collection, Varanasi

मुष्टिप्रविष्टमध्या सा त्रिवली [1]लोहमण्डली ।
कवलानद्धवदना सप्तरन्ध्रैः सुयन्त्रिता ॥ ७४८ ॥

मध्ये च वेष्टिता रज्ज्वा सूत्रनिर्मितया दृढ(ढा)म् ।
कक्षा(क्षां) स्कन्धे [2]निधायैषा सव्यदक्षिणपाणिना ॥ ७४९ ॥

[3]दंददोंद(दा)क्षरैः पादैः वा(दैर्वा) दनीया विचक्षणैः ।
मधुपानप्रमत्तानां योषितां लास्यनर्तने ॥ ७५० ॥

वादनीया विशेषेण [4]रुलोदो(दों)ध्वनिसंयुता ।
अष्टादशाङ्गुला दैर्घ्या (दैर्घ्ये) [5]रज्वा (रुन्जा) दृढतरा समा ॥ ७५१ ॥

एकादशाङ्गुले[6] वक्त्रे कवलानद्धकुण्डले ।
वामतुन्दे प्रकर्तव्यं तद[7]न्ते कुण्डलीद्व[8]यं ॥ ७५२ ॥

तन्त्रीभिर्धारितं सम्य[9]क्कुरु(रुं)कारार्थं तु वादकैः ।
रुंकारो (र) मुख्य(मुख्या) रुंकारो [10]बहुलो वादने भवेत् ॥ ७५३ ॥

रुंकाररंजि(रञ्जि)ता यस्मा[11]त्तस्मा[12]त् गुंजा(द्रुरुञ्जा) प्रकीर्तिता ।
षड्विंशत्यंगु(त्यङ्गु)लायामा त्रिंशदङ्गुलवेष्टना[13] ॥ ७५४ ॥

समाङ्गा सेल्लुका प्रोक्ता बीजदा[14]रुविनिर्मिता ।
तर्जनीमात्रके कुर्याद्वल्लीमण्डल[15]के दृढे ॥ ७५५ ॥

उद्दलीचर्मणा नध्दे द्वादशाङ्गुलविस्त[16](स्तृ)ते ।
षड्रन्ध्रे रज्जुभिर्बद्धे वामत[17]न्त्रीसुगर्भितम् ॥ ७५६ ॥

वामास्यं वामहस्तेन स[18]व्यं कोणेन वादयेत् ।
[19]धि(धिं)कारो दक्षिणे तुण्डे झिं(झें)कारो वामवक्त्रके ॥ ७५७ ॥

देवतानर्तने [20]यस्या वादनं परिकीर्तितम् ।
एकविंशाङ्गुलायामा सप्ताङ्गुलमिता मुखे ॥ ७५८ ॥

---

१. A. जो । २. D. वि. । ३. D. तदहोदा । ४. D. उरुलो । ५. A. डुंजा दड । ६. D. लादैर्घ्ये वक्त्रे संनद्धकुंडले । ७. A. दंतः । ८. A. घ । ९. A. करु । १० A. जंकारो वहुलो भवेत् । ११. A. यस्मो । १२. A. स्मा जा । १३. A. नी । १४. D. दोर । १५. D. लिके । १६. D. श्रु । १७. D. तंत्रि । १८. D. संध्य । १९. A. किंधारो दक्षिणे रुंझिकारो नामसु तुवक्त्रके । २०. D. यत्स्यात् वादनं ।

CC0. In Public Domain, Digitizagtion by eGangotri

बीजदारुमयी कार्या समाङ्गी[1] मुखमध्ययोः ।
[2]संहतत्र्यङ्गुलां पीने वलये वल्लिनिर्मिते ॥ ७५९ ॥

नवाङ्गुलान्तरे वृत्ते सप्तरन्ध्रसमन्विते ।
कवलेन[3] पिनद्धास्ये स्थूलतंत्री (तन्त्री)सुयंत्रि(यन्त्रि)ते ॥ ७६० ॥

[4]मच(द)नालिप्तकोणाभ्यां [5]कटुवां (कुडुवां) वादयेत्सुधीः ।
केङ्कारस्त्वत्र [6]मुख्यः स्याद्देवतास्तोत्रहेतवे ॥ ७६१ ॥

अन्ये पाटाः[7] प्रयोक्तव्याः पटहे ये प्र[8]कीर्तिताः ।
वितस्तिमात्रः[9] कर्तव्यः सोऽष्टाङ्गुलमुखद्वयः[10] ॥ ७६२ ॥

त्रिवलीवन्मनाक् क्षा[11]मो मध्ये डमरुको भवेत् ।
मुखयो[12]श्चर्मणा नद्धो[13] मण्डली[14]द्वयमण्डितः[15] ॥ ७६३ ॥

बद्धः[16] सूत्रगणैर्गाढं[17] मध्ये चैव निपीडितम् (तः) ।
अष्टाङ्गुलायतावन्यौ कार्यौ वचन(मदन)गोलकौ ॥ ७६४ ॥

मध्ये वि[18]धार्य हस्ताभ्यां वाद्यो डवडवाक्षरैः ।
चत्वारिंशाङ्गुलावेष्टा सैकविंशाङ्गुलायता ॥ ७६५ ॥

द्वादशाङ्गुलवक्त्रा च बीजवृक्षोद्भवा समा ।
[19]वलये [20]कवलः कर्तव्यः (कार्यो)लोहजे सूत्रवेष्टिते ॥ ७६६ ॥

तयोर्वेष्टनमुद्दिष्टं त्रिचत्त्वारिंशदङ्गुलम् ।
कर[21]टास्ये विधातव्या तिस्र[22]स्तंत्र्यः (स्तन्त्र्यः)समावृता(:)॥ ७६७॥

वलये कवलच्छन्ने मुखयोरुभयो [23]र्न्यसेत् ।
रन्ध्राणि तत्र कुर्वीत समभागे[24] चतुर्दश ॥ ७६८ ॥

विज्ञि(ग्नि)के तत्र संयोज्ये रन्ध्रेष्वेकान्तरेषु च ।
संमुखे तेन[25] बध्नीयात्[26] मध्ये मत्स्याकृति[27]र्भवेत् ॥ ७६९ ॥

---

१. D. मांगिसुख । २. D. संहतं त्र्यंगुला । ३. A. नापिनध्देन । ४. A. मंच । ५. A. कटुकां । ६. A. ख्याद्देवतास्तोभहेतवे । ७. D. दाः । ८. D. त्र । ९. D. त्रका । १०. A. या । ११. A. क्ष्या । १२. A. यो च । १३. D. द्धं । १४. D. लि । १५. D. तं । १६. A. द्ध । १७. A. टं । १८. A. विवाधार्य । १९. A. व । २०. A. तव कर्तव्यो हजे सूत्रवेष्टिते । २१. D. व्यास्प्र । २२. D. स्त्रत्र्यंश । २३. D. न्य । २४. A. गैश्चतुर्दिशं । २५. A. नि । २६. A. न्नू । २७. A. र्यथा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कच्छया वेष्टयेत्प्रान्तं शेषं [1]स्कन्धि(न्धे) कटौ न्यसेत् ।
करटा सा[2] विनिर्दिष्टा वक्त्रद्वयनिवादिभिः ॥ ७७० ॥

ककारश्च [3]टकारश्च रिकारो रेफमस्तकः ।
उत्सवे च विवाहे च यात्रायां नृपमन्दिरे ॥ ७७१ ॥

इत्यादि सर्वकार्येषु करटा विनियुज्यते ।
दन्तजा शृङ्गजा वापि लोह[4]वक्त्रद्वयान्विता ॥ ७७२ ॥

पञ्चाङ्गुलायता श्लक्ष्णा मुखे च चतुर[5]ङ्गुला ।
मेषा(षो)द[6]लिकया नद्धा पञ्चर[7]न्ध्रसुयन्त्रिता ॥ ७७३ ॥

मध्ये[8] सूत्रेण संवेष्ट्य नातिगूढं न च श्लथम् ।
अनामिकां [9]मध्यसूत्रे निधाय वदने पुनः ॥ ७७४ ॥

तर्जनीमध्यमाङ्गुल्यो[10](ल्यौ) वि[11]वृते च क्रियागते ।
अङ्गुष्ठमन्यचक्रे तु कृत्वै[12]काञ्चनिकां ततः ॥ ७७५ ॥

वादयेच्च[13]ञ्चुनादेन[14] डक्कली[15]यं प्रकीर्तिता ।
सुपक्वं च घनं श्लक्ष्ण[16]मल्पवक्त्रं मनोहरम् ॥ ७७६ ॥

चर्मणा नद्धवदनं पाणिभ्यां वादयेद्[17]घटम् ।
वितस्तिद्वयदैर्घ्या सा[18] (र्घ्योऽसौ) द्वादशाङ्गुलव[19]क्त्रका (कः)
॥ ७७७ ॥

[20]षट्त्रिंशत्परीणाहो वल्ली[21]वल्लयवेष्टितः[22] ।
कवलानद्धवदनः सप्तरन्ध्रनियन्त्रितः[23] ॥ ७७८ ॥

सूत्ररज्ज्वा दृढं[24] बद्धो दक्षिणे[25] [26]कुटुपाहतः ।
वामे वामकराघात[27](:) स्कन्धकक्षासमन्वितः ॥ ७७९ ॥

---

१. D. स्कंधिकयै । २. D. स्याद्वि । ३. A. टि । ४. A. च । ५. A. रां । ६. D. द । ७. A. यंत्र । ८. A. ध्ये । ९. A. का । १०. A. ल्यैं । ११. A. वि– संते च क्रियापदे । १२. A. त्वे । १३. A. चंचु । १४. A. देनदेन । १५. A. टकुली । १६. D. क्ष्णंअ । १७. D. तृ । १८. A. स्फो । १९. A. चक्रकः । २०. A. षड्विंशति । २१. A. वल्लंवलयवेल्लि । २२. D. ता । २३. D. ता । २४. D. ढ । २५. D. णः । २६. A. कटु । २७. D. तं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

डक्कारबहुलो वाद्ये डमरः[1] परिकीर्तितः ।
अस्मादप्यधिका[2] ढक्का टेंका[3] (ढेङ्का)रवहुला यतः[4] ॥ ७८० ॥

ततोऽधिका भवेद्[5] भेरी भूरिगम्भीरनिःस्वना ।
सूतभूजात(चूतद्रुजाति)सञ्जातो महाकायो महारवः॥७८१॥

कांस्यभाजन[6]गर्भोऽसौ वल[7]याभ्यां विवर्जितः ।
चर्मणा नद्धवदनो वध्रैर्बद्ध (द्धः) समन्ततः ॥ ७८२ ॥

सारङ्ग[8]श्रृङ्गदण्डेन [9]वाद्यते दुन्दुभिर्दृढ[10]म् ।
मेघध्वनिसमो नादे जयमङ्गलकादि[11]षु ॥ ७८३ ॥

उत्सवे देवतागारे वादनीयो महाबलः[12] ।
एकवक्त्रं[13] ताम्रकृप्तं अ(प्रम)धोह्रस्वं मुखे बृहत् ॥ ७८४ ॥

खरचर्मनिबद्धास्यं वध्रीबध्दं समन्ततः ।
[14]निःसाण इति विख्यातं[15] महानादं भयङ्करम् ॥ ७८५ ॥

चर्मणा कृतदण्डेन वाद्यते परि[16]भीषणम् ।
एवंविधा च [17]या लघ्वी [18]टम्मकी (तम्बकी) सा प्रकीर्तिता ॥७८६॥

एवमानद्धवाद्यानां क्रियाभेदो निरूपितः[19] ।
अङ्गुष्ठपार्श्वमाक्रम्य तर्जनीमूलमादरात् ॥ ७८७ ॥

प्रसारिता समा सर्वा किञ्चिद्विर[20]लिता[21] द्रुता[22] ।
करशाखा लगन्त्यन्तर्वर्जयित्वा तलं यदा ॥ ७८८ ॥

[23]तदा कर्तरिसंज्ञोऽसौ[24] हस्तपाटो[25] विधीयते ।
हस्तद्वयेन सञ्जातः[26] समकर्तरिसंज्ञकः ॥ ७८९ ॥

---

१. A. सः । २. A. कां । ३. D. टेक्का । ४. A. त । ५. D. तू । ६. A. नर्भों । ७. A. लभ्यां । ८. D. मृग । ९. A. व । १०. A. ढी । ११. D. रि । १२. D. ले । १३. A. कत्रांताङ्कसं अधो । १४. A. निसार । १५. A. नं । १६. A. र । १७. D. मा । १८. A. टंबकी । १९. A. तमू । २०. A. रु । २१. A. त । २२. D. ता । २३. D. कर्तरी नाम संज्ञो सौ । २४. A. सो । २५. D. दौ । २६. D. त ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यत्ययेन भवेदस्य संज्ञा विषमकर्तरिः[१] ।
[२]अङ्गुल्यः संहताः सर्वाः सांगु(साङ्गु)ष्ठाश्च प्रसारिता:(ः) ॥ ७९० ॥

यदा लगन्ति वेगेन तदासौ समपाणिकः ।
अङ्गुल्यः संहताग्राश्चेदङ्गुष्ठ[३]श्च प्रसारिताः (तः) ॥ ७९१ ॥

पृथग्लग[४]न्ति करयोः स स्यादुभय (विषम)पाणिकः ।
अङ्गुल्यो विरलाः सर्वाः साङ्गुष्ठा[५]स्ताडयन्ति [६]चेत् ॥ ७९२ ॥

पाणिहस्त इति ख्यातो हस्तपाटो मनीषिभिः ।
तलघातस्तथाङ्गुष्ठः[७] करशाखाक्रमेण [८]चेत् ॥ ७९३ ॥

लगन्ति सममानेन तदा [९]पाटः स सङ्ग्र(मग्र)हः ।
[१०]एकैकपाणि[११]रित्थंचेत्पर्यायेण लगेत्पुटे[१२] ॥ ७९४ ॥

तदावघटनामासौ करपाटः प्रकीर्तितः ।
अभिवादप्रकारौ[१३] तु यदैकस्मिन्पुटे करौ[१४] ॥ ७९५ ॥

लगतः स तु विख्यातो[१५] [१६]वशिको (स्वस्तिको) नामतो बुधैः ।
वामो दक्षिणवक्त्रे चेद्दक्षिणा (णो) वाममण्डले ॥ ७९६ ॥

[१७]यदा तूर्यस्य गतिना गाढ(नाग)बन्ध(न्धः) प्रकीर्तितः ।
मध्यमाक्रम्य तर्जन्या हन्यते पटहादिकम् ॥ ७९७ ॥

[१८]अङ्गुष्ठतलवक्त्रादिकरशाखाभिताडनम् ।
द्रुतमानेन पर्यायाद्विविधैः[१९] पातनक्रमैः ॥ ७९८ ॥

वाद्यते तु यदा तज्ज्ञै[२०]र्घेटि(स्ताट)वादः प्रकीर्तितः ।
[२१]दे(दें)कार(रः) पटहस्यादौ हुडुक्कायां [२२]तु झेक्रु(झेंक्रु)तिः ॥
॥ ७९९ ॥

---

१. D. री । २. A. drops this stanga ३. A. ष्टश्च D. ष्टस्य । ४. A. ग्लांतिक करयोः । ५. A. ष्टा । ६. A. वै । ७. A. ष्टः D. ष्ठक । ८. D. च । ९. A. पदः । १०. A. एकक D. एकैकः । ११. D. रंध्रे । १२. D. टैः । १३. D. रे । १४. D. रे । १५. A. तः । १६. A. ससिको । १७. D. यदा कुर्यादस्य गत्या मागधः परिकीर्तितः । १८. A. अगुष्ट । १९. A. वै D. घौ । २०. A. घोंटनादः । २१. A. देकापटह । २२. A. तुलेंकृति D. रुझेत्कृतिः ।

Dr. Urmila Sharma Collection, Varanasi

[1]ढक्कायां चैव [2]ॐकारः [3]थोंकारो मर्दले तथा ।
[4]दोंकारस्त्रिवलीवाद्ये करटायां च दें[5] (टें)कृतिः ॥ ८०० ॥

प्रथमं वाद्यते यत्र स्मृता वोल्लावणी तु सा ।
[6]चार्यतेऽनन्तरं[7] यत्तु[8] पाटैः कर्तरि[9]कादिभिः ॥ ८०१ ॥

चातुः (रु) श्रवणिका नाम[10] सां(सा)प्रोक्ता वाद्यवेदिभिः ।
[11]कर्तरीसमपाणिभ्यां वाद्यते च घडने (ऽवघटेन) च ॥ ८०२ ॥

परिश्रव(णि)का नाम प्रोक्ता वाद्यविचारकैः (शारदैः) ।
खुकारबहुलं वाद्यं नादो यत्र न सुच्यते ॥ ८०३ ॥

कुचुंब[12](चुम्बि)णीति नाम स्या[13]दुद्दल्या पिहिते मुखे ।
केवलैर्हस्तपा[14]टैस्तु विविधैर्यत्र वाद्यते ॥ ८०४ ॥

[15]करचा(वा)रणका सा स्यात् कोणे(णैः) कुडुपवा[16]रणा ।
हस्तद्वयेन यत्रैकः पाटो निष्पत्ति[17]माप्नुयात् ॥ ८०५ ॥

[18]ऋजुपातो दक्षिणे [19]चेद्दण्डहस्तः स कीर्ति[20]तः ।
विहाय कुण्डलीस्पर्शं[21] वाद्यते [22]कुडुपेन तु ॥ ८०६ ॥

अलगो(ग्नो) नाम विख्यातः पाठ(टः)कोणो(णा)[23]भिताडने ।
दक्षिणे[24] लुलितो घातः कुडु[25]पेन विधीयते ॥ ८०७ ॥

वामेन तलघात[26]श्चेदुदरं(दुडवो)नाम तद्भ(सो भ)वेत् ।
उभाभ्यामथ चैकेन विविधैः पा[27]टकल्पनैः[28] ॥ ८०८ ॥

निरन्तरलसन्नादो भवेद्दा[29]न(द्धन) रवाभिधः ।
वाद्यप्रका[30]राः पाटाश्च वादकानां गुणागुणाः[31] ॥ ८०९ ॥

---

१. A. ट । २ A. रुं । ३. A. थुं । ४. दो । ५. A. द्रे । ६. D. वा । ७. A. रे । ८. A. तु । ९. A. र्क । १०. ममोप्रोक्ता D. मप्रोक्तावाद्य– विचारकैः । ११. D. drops this stanza । १२. A. व । १३. A. दंगुल्या । १४. A. टैः स्तु । १५. A. करसंचारणा तस्यात् । १६. A. चारण । १७. A. ति । १८. A. सजु । १९. A. चैव । २०. A D. र्त्ति । २१. A. र्शं । २२. D. पटहेन । २३. D. ना । २४. A. णो । २५. A. ड D. ट । २६. A. तःश्चेदुदरं D. तांश्च दुर्दुरं । २७. D. प । २८. A. ने । २९. A. द्दानरं D. दान । ३०. D. क । ३१. A. णा ।

CC0. In Public Domain, Digitizagtion by eGangotri

कथिताः साम्प्रतं वक्ष्ये प्रबन्धान् वाद्यसङ्गतान् ।
कालछन्दः(च्छन्द) प्रब[1]न्धो(न्धे)यो विरामो वानिरन्तरः ॥ ८१० ॥

[2]यतिर्निगद्यते सा नु (तु) प्रबन्धे वाद्यकर्तृभिः ।
तालपा[3]तसमानैर्या पाटवर्णैः प्रकल्पिता[4] ॥ ८११ ॥

उत्ता[5]ना नाम सा ख्याता कैश्चित्केदार उच्यते ।
उद्ग्रा[6]हद्वितयं यत्र वारमेकं तथा ध्रुवः ॥ ८१२ ॥

पुनर्ग्राहेण मोक्षश्चेदवच्छेदः स कीर्तितः ।
द्विवारमेकवारं वा[7] यत्रोद्ग्राहो विधीयते ॥ ८१३ ॥

ध्रुवो (व) नामा[8]भिधो यत्र मलय(प)न्तं प्रचक्षते ।
[9]मलयं (पं) वादयित्वा तु तदङ्गम्प्रतीतस्त(प्रतातिस्त)था ॥८१४॥

पुनर्मलय(प)वादेन मलया(पा)ङ्गमुदीरितम् ।
विषमै[10](ः)पाटवर्गैश्च मलयः[11](पः) क्रियते यदि ॥ ८१५ ॥

प्रोक्तो[12] मलपपाटो[13]ऽसौ वा[14]द्यविद्याविचक्षणः(णैः) ।
प्रस्तुतस्यानुसारेण गीतवाद्यस्य सन्धितः ॥ ८१६ ॥

भाने[15]न वाद्यते यत्तु[16](स्तु)स भवेदन्तराभिधः ।
उपर्युपरि पाटैस्तु[17] क्रियते यच्च लाघ[18]वम् ॥ ८१७ ॥

[19]खोज्जो नाम स च ज्ञेयो निवडः(बिडः) पाठ(ट) वर्णकैः ।
खण्डपाटै[20]ः(टः) प्रकर्तव्यो यतिभिश्चात्र खण्डकैः ॥ ८१८ ॥

एवं निरन्तरं वाद्यं तत्ख[21]ण्डयति कथ्यते ।
वादयित्वा यतिं[22] पूर्वं पाटेनान्ते विमुच्यते ॥ ८१९ ॥

वाद्यप्रबन्धमध्ये तत्पदमित्युच्यते बुधैः ।
प्राञ्जलैः पाट[23]वर्णैश्च निबिडै[24]र्वाद्यते यतिः ॥ ८२० ॥

---

१. D. बंधा । २. D. येतं । ३. A. ला । ४. A. ताः । ५. A. ताना D. उत्ताना मानु । ६. A. द्रा D. द्धा । ७. D. च । ८. A. नाविधो । ९. D. drops this stanza । १०. D. मे । ११. D. यं । १२. A. क्ता D. क्ते । १३. A. टौ । १४. A. वाद्यविचक्षणः । १५. A. नो । १६. A. तु । १७. D. दें । १८. A. प । १९. D. खोजातो मनसिवित् ज्ञेयो मिविडवर्णकैः । २०. A. डैः । २१. A. त्सं । २२. A. तिः । २३. A. द । २४. A. डे ।

Dr. Urmila Sharma Collection, Varanasi

अङ्गुपाटः स विज्ञेयो [1]वाद(द्य)विद्याविशारदैः।
तालपातप्रमाणेन यतिश्चेत्खण्डिता[2] भवेत् ॥ ८२१ ॥

स खण्डक इति ख्यातः प्रबन्धः पूर्वसूरिभिः।
[3]छित्त्वा छित्त्वा तु यद्वाद्यं विकृतं यत्र वाद्यते ॥ ८२२ ॥

वृत्तै[4](द्रुतै)र्हस्ततलाघातैः स च्छेद इति कीर्तितः।
यत्स्रोतोगतया [5]यत्या कृतं तत् खण्डहुल्लकम् ॥ ८२३ ॥

युक्तच्छेदेन [6]व्यक्तस्थे (श्चेत्) खण्डच्छेदो[7]ऽभिधीयते।
[8]द्विरुद्ग्राहो ध्रुवाभोगो (गौ) ध्रुवश्चेदङ्गरूपकम् ॥ ८२४ ॥

गीतनु(नृ)त्तसमं [9]क्लृप्तं समं [10]तत्किल कथ्यते।
उद्ग्राहध्रुवकाभोगाः पुनरुद्ग्राह[11]को भवेत् ॥ ८२५ ॥

हुडुक्क इति वाद्येषु कथितः सोम [12]भूभुजा।
एकवारं [13]गृ(ग्र) कृत्वा द्विःकुर्यान्मधुकं(द्ध्रुवकं) यदि[14] ॥८२६॥

ध्रुवको नाम स[15] ख्यातः प्रबन्धेषु मनीषिभिः।
आतोद्यानि समस्तानि वाद्यन्ते च पृथ[16]क् पृथक् ॥ ८२७ ॥

खण्डे खण्डे यदा तज्ज्ञै(ः) पै[17]सारः स तु कथ्यते।
एवं प्रबन्धा विविधा गीतनृत्तो[18]पयोगिनः[19] ॥ ८२८ ॥

मार्गदेश्यनुसारेण कथितः(ताः)सोम भू[20]भुजा।
वदने त्र्यङ्गुलं कार्यं मध्यं निम्नं सुवर्तुलम् ॥ ८२९ ॥

तत्राङ्गुलमितं पिण्ड[21](ण्डं) विस्तारेणाङ्गुलद्वयम्।
कांस्येन घटितं श्लक्ष्णं कर्तव्यं तालकद्वयम् ॥ ८३० ॥

एकरूपप्रमाणं च घनं[22] छिद्रेण संयुतम्।
नाना पद्यं च (वस्त्राग्र)लाग्राणि तच्छिद्रे रज्जुवत् क्षिपेत् ॥८३१॥

---

१. A. वाद्याविशारदैः। २. A. तो। ३. D. drops one छित्वा। ४. A. तौ। ५. A. यत्पा। D. पत्या। ६. D. वक्तृस्थे। ७. A. द इतिकीर्तितः and the whole stanza repeated again। ८. A. यत्स्रोतोगतया यत्पाकृतं वश्चे देगरूपकं। ९. A क्लृ। १०. D. ता। ११. A. ह उच्यते। १२. A. भूजा। १३. A. गृहे। १४. A. दिः। १५. A. drops this। १६. A. थक्पृथक्। १७. A. यैः सरः। १८. D. त्यो। १९. न। २०. A. भूजा। २१. A. खण्ड। २२. A. न।

CC0. In Public Domain, Digitizagtion by eGangotri

कुहराभ्यन्तरे कुर्याद् ग्रन्थिबन्धमनोहरम् ।
आवे[1]ष्ट्य तर्जनी (नीं) वामामङ्गुष्ठेन[2] प्रपीडयेत् ॥ ८३२ ॥

तिर्यङ्मुखो विधातव्यस्तालमध्ये विचक्षणैः ।
कनिष्ठा[3]नामिकामध्याः[4] करशाखाः प्रसारयेत् ॥ ८३३ ॥

ताभिर्विधारयेन्नादं कल्पना सा प्रकीर्तिता ।
तलमध्ये [5]तलं कृत्वा लम्बितं दक्षिणे करे ॥ ८३४ ॥

विन्यस्योपरि तर्जन्या[6] अङ्गुष्ठाग्रेण पीडयेत् ।
तेन तालाग्रभागेन मध्ये [7]चालं (तालं) प्रपीडयेत् ॥ ८३५ ॥

वादयेद्विविधैर्मानैर्लघुद्रुतगुरुप्लुतैः ।
सावधानो[8] दृढमतिः[9] कल्पनापातकोविदः ॥ ८३६ ॥

तालमानप्रगल्भैश्च [10]श्रेष्ठ(ष्ठ)स्तालधरः स्मृतः ।
न तालेन विना गीतं न वाद्यं तालव[11]र्जितम् ॥ ८३७ ॥

न नृत्यं तालहीनं स्यादतस्तालोऽत्र कारणम् ।
गीतं वाद्यं तथा नृत्यं त्रितयं येन लभ्यते ॥ ८३८ ॥

तेन ताल इति ख्यातः सोमेश्वरमहीभुजा ।
चतुर[12]स्त्रा(स्रा)स्तथा शस्त्रा(त्र्यस्रा) मिश्राः खण्डा भवन्ति हि ॥८३९॥

एवं चतुवि(र्वि)धास्तालास्तेऽन[13]न्ताः परिकीर्तिताः ।
चत्वारो गुरवो यत्र गुरुद्वितयवर्धि[11]ताः ॥ ८४० ॥

हीना वा[12] गुरुयुग्मेन तालास्ते चतुरस्रकाः ।
गुरुत्रयं भवेद्यस्मिन् षड्भिः षड्भिर्विवर्धि[11]तम् ॥ ८४१ ॥

त्र(त्र्य)स्रः स तालो विज्ञेयः प्रस्तारेषु बहुष्वपि ।
चतुरस्रे[14] गुरुर्यत्र[15] त्र्यस्रे च गुरुयुग्मकम् ॥ ८४२ ॥

---

१. A. वि । २. A ष्टे । ३. A. ष्टा । ४. A. ध्या । ५. A. त । ६. D. चात्र । ७. D. ना । ८. D. वेष्टधरधरः स्मृतः । ९. D. स्तालविषया । १०. A. नंतीः । ११. D. र्जि । १२. D. श्च । १३. A. र्धितः । १४. A. स्रोर्गु । १५. A. र्यत्रस्रो च D. र्यत्रत्रसे च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रवेश्यते स बोद्धव्यस्तालो मिश्रसमाख्यया ।
त्र्य[1]स्रे वा चतुरस्रे वा भे[2]द्यते गुरुलक्षणम् ॥ ८४३ ॥

यत्र तालः स विज्ञेयः खण्डनामाङ्कितो बुधैः ।
[3]ऋजुर्भवेल्लघो[4]र्लेखा गुरुर्वक्रोभयाननः[5] ॥ ८४४ ॥

गुरु(रो)र्लेखा शिखायुक्ता प्लुतस्य परिलिख्यते ।
द्रुतस्य वर्तुला [6]लेखा [7]बिन्दुःस्या[8]द्द्रुतकस्य च ॥ ८४५ ॥

प्रस्तारलेखानामानि वर्णितानि महीभृता ।
ह्रस्व[9]पञ्चाक्षरो[10] वर्गो[11] वेगादुच्चा[12]र्यते यदा ॥ ८४६ ॥

मात्राभिधः स कालः स्यात्स एव लघुरुच्यते ।
एकमात्रो लघुः प्रोक्तो द्विमात्रो गुरुरुच्यते ॥ ८४७ ॥

त्रिमात्रस्तु प्लुतो ज्ञेयो [13]द्रुतः स्य(स्या)दर्धमात्रिकः[14] ।
द्रुतार्धको भवेद्यस्तु बिन्दु(:)स्याद्[15] द्रुतकाभिधः ॥ ८४८ ॥

इति तालगतः[16] कालः सोमभूपेन भाषितः ।
एक एव ततस्तालो गीतवाद्यानुसारतः ॥ ८४९ ॥

कदाचिच्छीघ्रतां याति विलंबं[17](लम्बं) याति कर्हिचित् ।
[18]वार्तिकं दक्षिणं चित्रं तुर्यं[19] चित्रतरं तथा ॥ ८५० ॥

एवं [20]चतुर्विधं मानं तालपाते प्रकीर्तितम् ।
य[21]द्वर्तते निजं मानं वार्तिकं तत्प्रकीर्तितम् ॥ ८५१ ॥

वि(वि)लम्बितेन मानेन दक्षिणं परिकीर्तितम् ।
शीघ्रमानेन चित्रं स्याद[22]तिशीघ्रं तदेव चेत् ॥ ८५२ ॥

प्राहु[23]श्चित्रतरं मानमिति मानविनिर्णयः ।
अविरामो लघुर्योसावेकपातनियोजितः ॥ ८५३ ॥

---

१. A. त्र्यं । २. A. भज्यतेवासवं गुरुं । ३. A. रुजुं । ४. D. घु । ५. A. ना । ६. A. रे । ७. A. विदुः । ८. D. स्यात् द्रु । ९. D. स्त्रायं । १०. D. रा । ११. D. र्गां । १२. A. चा । १३. A. द्द । १४. A. काः । १५. D. त् । १६. D. प्रकारोयं । १७. A. ल्यं । १८. D. कर्तिकं । १९. A. र्यं । २०. A. चु । २१. D. drcps this stanza । २२. D. त् द्रुतिः । २३. A द्रुत्रतरं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आदितालः स विज्ञेयस्तालानामुद्भवो [1]यतः ।
द्रुतकत्रितयं यत्र तत्रा[2]द्यः कल्पनायुतः ॥ ८५४ ॥

शोभितो यस्त्रिभिः पातैः सोऽपि स्यादादितालकः[3] ००ह १ ।
आदौ [4]द्रुतद्वयं यत्र[5] लघुरन्ते प्रयुज्यते ॥ ८५५ ॥

तालो[6] द्विती[7]यको नाम पातत्रयविराजितः[8] । ००ल २
प्रथमो [9]द्रुत एकः[10]स्याल्लघु[11]द्वयमतः परम् ॥ ८५६ ॥

ईदृशः प्रतितालः स्यात्पात[12]त्रयविराजितः[13] ।
भवेतां गुरुणी[14] पूर्वं लघुः[15]स्यात्तदनन्तरम् ॥ ८५७ ॥

समकङ्कालना[16]माऽयं पातत्रयविभूषितः[17] ॥ ५ ॥ ऽऽ । ४ ।
लघुरादौ गुरुः पश्चात्कङ्काले विषमाभिधे ॥ ८५८ ॥

पातत्रयं भवेद्यस्य [18]तूर्यत्रयविधिं प्रति[19] ॥ ६ ॥ ऽऽ । ० ॥ ऽ ।
[20]द्रुतद्वयं गुरुद्वन्द्वं खण्ड[21]कङ्कालसंज्ञिते ॥ ८५९ ॥

ताले पातचतुष्कं स्याद्[22] गीतवाद्य[23]क्रियादिषु[24] ॥ ०० ऽऽ ० ।
आदौ [25]द्रुतचतुष्कं स्याद्[26] गुरुरन्ते ततो लघुः[27] ॥ ८६० ॥

[28]पातषट्कं भवेत्ताले [29]पूर्णकङ्काल[30]संज्ञिते । ००० ऽ ॥ ।
[31]द्रुतत्रयं लघुश्चैकस्ताले गारुगि[32]संज्ञिते ॥ ८६१ ॥

पाताश्चत्त्वार एते[33]स्युर्निर्णीताः सोमभूभुजा ॥ ९ ॥ ००० ॥
चत्त्वारो लघवः पूर्वं धृतनादास्ततो गुरुः ॥ ८६२ ॥

लघु[34]नी बद्ध(मण्ठ)तालेऽस्मिन् सप्तपाताः सुशोभनाः[35] ॥१०॥ ऽ॥
लघुद्वयं गुरुश्चैकस्तालेऽस्मिन् पाशमन्द्रके[36] ॥ ८६३ ॥

---

१. A. यत् । २. D. द्य । ३. A. कः हर । ४. A. द्रुत्त । ५. A. त्रघुरं । ६. D. ल । ७. D. त । ८. A. तः लर । ९. A. द । १०. A. क । ११. A. यु । १२. D. त्रं । १३. A. तः छ३ D. तः ॥ ४ । ० । ३ ।१४. D. णा । १५. A. घु । १६. A. मायानं । १७. A. तं ॥ ऽऽ ॥ ४ ॥ । १८. A. तु । १९. A. ॥ ऽऽ छ ऽ ॥ । २०. A. दतद्वय । २१. A. काकास । २२. D. त् । २३. A. द्यं । २४. A. ॥ ०० ऽऽ छ ॥ । २५. A. द्व । २६. D. त् । २७. A. घु । २८. A. णनतषङ्कं २९. D. वं । ३०. A. संज्ञि ५३ ॥ ०००० ऽ ॥ । ३१. A. द । ३२. D. गिससंज्ञिते A. गिसंजिते । ३३. A. ता । ३४. A. घूनि च द्वितस्त । ३५. A. omits this । ३६. D. मर्द्दके ।

Dr. Urmila Sharma Collection, Varanasi

पातत्रयं भवे[1]द्द्रयो गीतवाद्यानुसारतः ॥ ११ ॥ ऽ[2] ।
द्रुतकद्वितयं पूर्वं तत्रा[3]द्यः कल्पितो[4] भवेत् ॥ ८६४ ॥

त[5]तः परं लघुद्वन्द्वं तालोऽयं यतिसंज्ञकः । ॥ ०० ।
द्रुतद्वयं भवेदादौ लघु[6]नीं(नी) तदनन्तरम् ॥ ८६५ ॥

स ताल(:) [7]कुद्रको नाम चतुःपा(ष्पा)तः[8] प्रवर्तते[9] ॥ ५८ ॥ ०० ॥ ।
लघुरेको भवेदादौ[10] द्रुतद्वयमतः परम् ॥ ८६६ ॥

तालस्तृती[11]यको नाम त्रिभिः[12] पातैर्विराजितः[13] ॥ १४ ॥ ०० ॥ ।
द्रुत एको लघुश्चैकः[14] पातद्वयसम[15]न्वितः ॥ ८६७ ॥

नि(:)सा[16]रुर्नाम तालोऽयं विलम्बेनाऽपि भण्यते[17] ६० ० ।
द्रुतत्रयं भवेत्त[18]स्य यस्यान्त्यः सविरामकः ॥ ८६८ ॥

तालोऽयमन्तरक्रीडः[19] पातत्रयविभूषितः[20] १६ ॥ ००० ।
[21]द्रुतमेकं नव(भवे)दादौ ततोऽपि द्रुतकद्वयम् ॥ ८६९ ॥

सपा(म)तालः स विज्ञेयः पातत्रयसमन्वित(:) ६२ । ००० ॥
एक एव द्रुतो यस्मिन् पूज्यमानो निरन्तरः[22] ॥ ८७० ॥

एकतालः स विख्यातः पातेनैकेन भूषितः[23] ६३ । ० ।
द्रुतकद्वितयं यस्मि[24]न्नन्त्यश्च विधृतध्वनिः[25] ॥ ८७१ ॥

एकतालीति विख्यातस्ताल(:)पातलयान्वितः[26] १८ । ०० ।
द्रुता[27] द्वादश यत्र स्युस्तूर्ये(स्तुर्यः) [28]सूर्यो(स्तुर्यो) विरामवान् ॥ ८७२ ॥

प्लुतो गुरु[29]र्द्रुतद्वन्द्वं गुरुरेको लघुद्वयम् ।
गुरुरन्ते भवेद्यस्य पातविंशतिसंयुतः[30] ॥ ८७३ ॥

---

१. D. वेत्भू । २.A. omits this । ३. D. त्रथा । ४. D. ता । ५. D. तत्तद्वयं लयं-द्वंद्वं तोलोयं मतिमद्वकं ॥ १२ । ०० ॥ ६. D. घूनि । ७. D. द्रुतको । ८. D. ते ॥ ९. D. ते ॥.१३ । ०० । १०. A. द्यो । ११. A. तीयको । D. तीयकं । १२. D. भिः । १३. A. तै ५९ ॥ ०० ॥ १४. D. को । १५. A. मा । १६. D. शा । १७. D. ॥ १५ ॥ १८. A. त्तस्यान्त्यः सविरामकः । १९. D. डा । २०. A. ६१००॥ छ । २१. D. drops this stanza । २७. D. रम् । २३. D. ॥ १७॥ ० । २४. D. स्मिन् अंतश्च । २५. D. नि । २६. A. त । २७. A. त । २८. A. स्तुर्यें । २९. A. रुर्द D. रुद्रु । ३०. D. तं ।

'तुर्यतालोऽयमाख्यातस्तालवर्णनकोविदैः[1] ॥२०॥ ०००००००००० ॥
ऽ ०० ऽ ॥ ऽ ।

चत्त्वारो लघवः पूर्वं गुरुद्वयमतः परम् ॥ ८७४ ॥

द्रुतमे[3]कं सप्तपातो वर्णतालो परैः[4] स्मृतः[5] २१ ॥ ऽऽ० ।
आदौ लघु(ः)द्रुतद्व[6]न्द्वं लघुरेको गुरुद्वयम् ॥ ८७५ ॥

द्वौ द्रुतावष्टपातोऽयं व[7]र्णतालाभि[8]धोऽपरः[9] ।४। ०० ॥ ऽऽ ०० ॥ छ
दश द्रुता भवन्त्यस्मिन् ल(स्मिंल्ल)घुरन्ते प्रयुज्यते ॥ ८७६ ॥
प्रथमश्च चतुर्थ[10]श्च सप्तमश्च सकल्पना (नः) ।
रुद्रसङ्ख्यान्वितैः[11] पातैस्ताल[12]श्छन्दं सु(न्दश्च)चचरि (चरी) ॥८७७॥
वसन्तस्योत्सवे तज्ज्ञै[13]र्गातव्या[14]सा हि च[15]त्वरि[16](चरी) ॥ २४ ॥
००००० ऽ ।

प्रथमं लघुनी[17] यत्र तयोर्मध्ये[18] गुरुं[19] न्यसेत् ॥ ८७८ ॥
उमात्रि(उन्मातृ)कश्चतुष्पातः[20] सोऽन्तेप्लुत समन्वितः[21] ऽ।ऽ।छ।
[22]लघुरेको गुरुश्चैको लघुयुग्मं[23] [24]द्रुतत्रयम् ॥ ८७९ ॥

प्लु[25]तान्तः सप्तपाता[26]श्च जयतालः स कीर्तितः[27] ॥ २६ ॥ ऽ ॥ ०० ।
गुरुरेकः प्लुतश्चैकस्ततो [28]गुरुलघुप्लुताः ॥ ८८० ॥
पञ्चपातः[29] समाख्यातो राजतालो मनीषिभिः[30] ॥ ७३ ॥ ऽ ऽ' ऽ । ऽ' ॥
आदौ गुरु[31]र्लघुः पश्चात् प्लुतत्रयमतः परम् ॥ ८८१ ॥
गुरुरन्यः[32] प्लुतश्चान्यो द्रुतत्रयमनन्तरम् ।
दशसङ्ख्या समोपेते (त) पातमालाविराजितः[33] ॥ ८८२ ॥
[34]लयतालः समाख्यातो रिपूणां लयकारणः[35] ॥ ७५ ॥ ऽ ।
ऽ'ऽ'ऽ'ऽऽ' ००० ॥

गुरुत्रयं लघुः पश्चा[36]त् प्लुत एको गुरुद्रुतौ ॥ ८८३ ॥

---

१. A. तूर्यं । २. A. ००००' ०००' ०००' ।' ऽऽ०० ॥ छ । ३. D. के । ४. A. रै । ५. A. त ॥ ऽऽ ० छ ॥ ६. A. द्वद्वं । ७. A. र्णः क । ८. A. घिधो D. मिदो । ९. D. रः ॥२२॥ ०० ॥ ऽऽ ०० । १०. A. र्थ्यं । ११. A. तै । १२. D. लंछंदं सुचत्वरि । १३. A. ज्ञा । १४. D. स । १५ A. व । १६. A. री ०००' ०००' ००० । १७. D. ना । १८. D. ध्य । १९. D. रुर्न्यं । २० A. नः । २१. D. ॥ २५ ॥ ऽ । । २२. A. ज । २३. A. ग्मे । २४. A. द । २५. D. तातः । २६. D. ताश्च । २७. A. तः ७२ ॥ ऽ ॥ ०० ऽ' । २८. D. लघुगुरुप्लुताः । २९. D. त । ३०. D. मिः ॥ २७ ॥ ऽ । ३१. D. ल । ३२. D. न्य । ३३. D. ता । ३४. D. यत । ३५. D. णः । ३६. ऽ'ऽ'ऽ'ऽऽ' ००० ॥ । ३७. A. श्च ।

CC0. In Public Domain, Digitizagtion by eGangotri

पार्वतीलोचनो[1] नाम पातैर्नवभिरायतः[2] । ऽऽऽ। ऽ'ऽऽ००। छ।
चत्त्वारो[3] ला(ल)घवो यस्मिनं(न्न)न्त्यश्च ध(धृ)तनादकः ॥८८४॥

गजलीलेति तालोऽयं चतुःपातैः प्रयुज्यते । ० ॥ ।
चत्वारो द्रुतका यत्र तत्रान्त्यः कल्पितो[4] भवेत् ॥ ८८५ ॥

[5]तनुपातसमाख्यातो नाम्ना तुरगलीलकः[6] ००००'।
लघुः[7] प्लुतो गुरुश्चैको लघुप्लुत[8]मतः परम् ॥ ८८६ ॥

पञ्चपातान्वितो[9] नित्यं कीर्तितालः प्रकीर्तितः[10] ऽ'ऽ। ऽ'।
गुरुश्चैको[11] लघुश्चैको(कः) प्लुतश्चैको भवेत्क्रमात्[12] ॥ ८८७ ॥

कोकिलाप्रियनामासौ [13]पातैस्त्रिभिरलङ्कृतः[14] ऽ। ऽ'।
एवं [15]केचित्समादिष्टा [16]नामलक्षणलक्षिताः ॥ ८८८ ॥

ताला[17](लाः) प्रस्तारसंयुक्ताः सोमेश्वरमहीभुजा ।
त्रयोदशाङ्गुला[18](लः) कार्या[19](र्यः) कांस्यताल[20](लः)तनु-
र्महान् ॥ ८८९ ॥

लघुताल[21]समाकारश्छिद्रं[22](रश्छिद्र) रज्जुसमन्वितः ।
वामहस्तक्रियायोगा(गो) दक्षिणेनापि धार्यते ॥ ८९० ॥

[23]तस्य पाटा रुणकटा वाद्यमार्गविधौ बुधैः ।
सार्धं डमरुढक्काभ्यां कड[24](कुडु) वा सेलु(ल्ल)सङ्गताः ॥ ८९१ ॥

घडसे च त्रिवल्यां च [25]करि(र)टामण्डिवढक्कयोः(मण्डिडक्कयोः)।
सङ्गतो वाद्यते तज्ज्ञैर्यतिमान[26]प्रदर्शकः ॥ ८९२ ॥
अन्यैरपि महावाद्यैर्जयघण्टा हि वाद्यते ।
[27]संभारि(गम्भारी) दारुघटितश्चतुरस्रा[28]यतो दृढः[29] ॥ ८९३ ॥

---

१. A. नं । २. D. तः ॥ ३० ॥ ऽऽऽ । ऽऽऽ०० । ३. D. drops this stanza । ४. D. ता । ५. A. सतु पातः । ६. D. कः । ॥ ३१ । ०००० । ७. A. घु । ८. A. तंम । ९. D. ते । १०. D. तः ॥ ३२ ॥ ऽऽ । ऽ' । ११. A. कोप्लुतश्चैकोभवेक्रमात् । १२. A. न् । १३. D. याते । १४. D. तः ॥ ३३ ॥ ऽ ॥ । १५. A. केश्चि । १६. A. नामदिष्टानामलक्षणलक्षिताः । १७. D. ल । १८. A. लं । १९. A. र्यं । २०. A. तांकतनुर्महान् । २१. D. ले । २२. A. द्रे । २३. A. तस्यां पाटा रुणंकं च वाद्यामार्गविदोवुद्धैः । २४. D. कवसेतत्रसंगता । २५. D. मंद्वितं-प्रौढढक्कयोः । २६. D. वर्तकः । २७. A. शंभारी । २८. D. श्चा । २९. A. दढः D. दृढ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यादेकहस्तविस्तारः[1] सार्धहस्ता[2]यतो भवेत् ।
अङ्गुलद्वयमुत्सृज्य परितो मध्यत[3]स्तनुः[4] ॥ ८९४ ॥

अधोभागे विधातव्यो निम्नोऽसावङ्गुलद्वयम् ।
[5]सार्धयुग्माङ्गुलघनः समन्तात्पट्टको भवेत् ॥ ८९५ ॥

[6]पृष्ठदेशे तथा कायः[7](र्यः) श्लक्ष्ण[8]सिक्त(क्थ)कलेपितः[9] ।
[10]तनूकृतेषु स्थानेषु शिष्यतेङ्गुलमीहितम् ॥ ८९६ ॥

शलाका लोहजा तत्र कि(ङ्कि)णीग्रथिना(ता) भवेत् ।
अधोभागे तथा तिर्यक् नव सप्त दशा[11]थवा ॥ ८९७ ॥

अङ्गुष्ठमध्यमाकर्षा[12]द्वाद्यते पट्टवाद्यकम् ।
धुरु [13]खुरु [14]तररटखराधडव[15]णे(र्णे)न संयुताः ॥ ८९८ ॥

पाट[16]वर्णा इमे[17]प्रोक्ताः[18] [19]पट्टवाद्यविशारदैः ।
द्वादशाङ्गुलविस्तारश्चतुरस्रो घनः पटः ॥ ८९९ ॥

अङ्गुष्ठतर्जनीयोगादुपान्ते[20]ऽसौ[21] विधार्यते ।
करयो[22]र्मध्यतः कृत्वा वाद्यते पट्ट[23]वाद्यकम् ॥ ९०० ॥

[24]द्रुतं खटपटाशब्दो यथातालानुगो भवेत् ।
सुपकाश्च (च) [25]घना कम्रा द्वादशाङ्गुलदीर्घिका[26] ॥ ९०१ ॥

विस्तारे ब्यङ्गुला कार्या[27] पिण्डे चार्धा[28]ङ्गुला मता[29] ।
[30]किञ्चिच्छिथि[31]लिते धार्ये[32] परस्परसमं गते ॥ ९०२ ॥

[33]एकैकस्मिन्करे [34]कम्रे द्वे द्वे वाद्ये विचक्षणैः ।
मणिबन्धप्रकम्पेन वाद्यन्ते कम्रिका [35]घना (:) ॥ ९०३ ॥

---

१. D. र । २. D. स्तो । ३. A. ति । ४. D. नु । ५. A. साधुयुग्मांगुलंमानः समंतान्पट्टकोभवेत् । ६. A. प्र । ७. D. र्यें । ८. D. सछक । ९. D. सः । १०. D. drops this stanza । ११. D. शस्तथा । १२. A. र्षवा । १३. A. बु । १४. A. तरटखरा । १५. A. घ । १६. A. ठ । १७. A. म । १८. A. क्ता । १९. A. द । २०. D. पाः ते । २१. A. सो । २२. A. मतः । २३. A. द । २४. A. drops this line । २५. A. यनाः । २६. A. र्घका: । २७. A. प्रोक्ताः । २८. D. र्द्धं । २९. A. ताः । ३०. A. किचि । ३१. A. धिलि । D. थिल । ३२. A. परसमंमते । ३३. D. पाके । ३४. A. कक्षे । ३५. A. धमा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किरिकिट्टा[1]क्षरैः पाटैः[2] कम्रावाद्यं विधीयते।
यद्वा दक्षिणहस्तेन कृत्वानामिकयान्तरम् ॥ ९०४ ॥
वामाङ्गुष्ठ[3]प्रघ[4]र्षेण वादये[5]त्तलताडनैः।
निम्नां[6] लोहमयीं[7] शुक्तिं[8] स्ति(ति)र्य[9]ग्रेखा[10]भिराजिताम् ॥ ९०५ ॥
एणशृङ्ग[11]सरूपेण लोहकोणेन घर्षयेत्।
किरि[12]किद्य(ट्य)क्षरोपेतं[13] यक्षाणामतिवल्लभम् ॥ ९०६ ॥
शुक्तिवाद्यमिदं प्रोक्तं यतिमात्रावबोधकम्।
इत्येवं घनवाद्य[14]स्य क्रियायोगो निरूपितः ॥ ९०७ ॥
पाटवर्णप्रभेदश्च कथितः सोमभूभुजा।
पञ्चाङ्गुला[15]त्समारभ्य यावद[16]ष्टादशाङ्गुलम् ॥ ९०८ ॥
फूत्कारः(र) सुषिरस्याधः[17] ता(धस्ता)ररन्ध्रस्य पूर्वतः।
अङ्गुलानामियं सङ्ख्या सुसङ्ख्याता पृथक् [18]पृथक् ॥ ९०९ ॥
ताररन्ध्राणि कुर्वीत [19]वंशेऽष्टौ समभागतः।
पञ्चाङ्गुलो भवेद्वंशः षोडशाङ्गुलमायतः ॥ ९१० ॥
फूत्काररन्ध्रादारभ्य गणना तत्र कीर्तिता।
स[20]मभागाष्ट[21]रन्ध्रेषु सार्धभागं समुत्सृजेत् ॥ ९११ ॥
एवं [22]वंशेषु सर्वेषु सुषिराणि प्रकल्पयेत्।
फूत्कार[23]रन्ध्रादूर्ध्वं स्याच्चतुस्त्रिद्व्यङ्गुलं क्रमात् ॥ ९१२ ॥
सर्ववंशेषु कुर्वीत यथाशोभं यथारुचि[24]।
पञ्चाङ्गुलात्समार[25]भ्य यावदष्टादशाङ्गुलम् ॥ ९१३ ॥
अङ्गुलं[26] क्रमतो वृद्धिं (द्धिः)वंशानां दीर्घता मता।
फूत्काररन्ध्रं कर्तव्य[27]मङ्गुष्ठा[28]ग्रप्रवेश[29]नम् ॥ ९१४ ॥

---

१. A. द्य। २. A. दै। ३. A. ष्ट। ४. A. क। ५. A. यॆंत्त D. येत। ६. A. म्ना। ७. A. यी। ८. A. क्तिं। ९. D. क्रे। १०. A. स्वाभि धीयते। ११. D. म। १२. D. किंन्न। १३. A. पोतं D. तत् यक्षा। १४. A. द। १५. A. ल्स। १६. A. ष्टदशाङ्गुलः। १७. A. रमुखिर स्पाधे। १८. A. drops one पृथक्। १९. A. शेष्यै D. शोष्टौ। २०. A. मा। २१. D. करन्ध्रेणार्ध। २२. A. वंसे। २३. A. रं। २४. A. चिं। २५. A. मारभ्य। २६. A. लः। २७. D. व्यग्रं। २८. A. ष्टा। २९. A. क।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किञ्चिदाय[1]तवृत्तं स्यात्सर्वव[2]शेष्वयं विधिः ।
कर्क[3]न्धुबीजवाहीनि तार[4]रन्ध्राणि कल्पयेत् ॥ ९१५ ॥

कनिष्ठा[5]ङ्गुलिमानेन वंश[6]रन्ध्रं विधीयते ।
त्रयोदशाङ्गुलं वर्ज्यं तथा पञ्चदशाङ्गुलम्[7] ॥ ९१६ ॥

वंशभेदेषु सर्वेषु तथा सप्तदशाङ्गुलम् ।
अशोभनमनायुष्यं वंशत्रयमिदं[8] यतः ॥ ९१७ ॥

तस्मात्तत्क[9]र्तृभिर्वर्ज्यं वादकैश्च विशेषतः[10] ।
फूत्कारो यमलस्तोक [11]स्ख(स्व)लित[12]स्तन्तवस्त(न्तुवत्त)था
॥ ९१८ ॥

एते निन्द्या(:) समाख्याता वंशविद्याविशारदैः ।
[13]वहणिः (नं) शिरसः कम्पः स्वस्वास्थानाप्ति(स्थानानाप्ति)
रेव च ॥ ९१९ ॥

वृथाप्रयोगबाहुल्यमज्ञता गीतवादने ।
एते दोषा महानिन्द्या वांशिकस्य विशेषतः ॥ ९२० ॥

वर्जनीयाः समाख्याता वंशविद्याविशारदैः ।
सुरसत्त्वं निबिडता [14]समत्वं फूत्कृते[15]र्गुणाः ॥ ९२१ ॥

अमुक्तिरर्धमुक्तिश्च मुक्तिश्चेद[16]ङ्गुलीवहा ।
गमकानाञ्च सप्ताना[17]मङ्गुली[18]सारणा[19]क्रिया ॥ ९२२ ॥

सुस्थानत्वं सुरागत्वं वांशि[20]कस्य गुणास्त्व[21]मी ।
गीतवादन[22]दक्षत्वं रा[23]गरागाङ्गवेदिता ॥ ९२३ ॥

क्रियाभाषाविभा[24]षासु कौशलं वांशिके गुणाः ।
सु(स्व)स्थाने चा[25]प्यवस्थाने रागनिर्माणनैपुणम् ॥ ९२४ ॥

---

१. A. यु । २. A. शेविधिः । ३. A. र्कन्धू । ४. A. रः । ५. A. ष्टा । ६. A. शं । ७. A ल । ८. A. दंशत्रयमिदं यतः । ९. D. त्कर्म । १०. A. कः । ११. A. स्स । १२. A. तस्तूत्कत । १३. A. drops these two slokas । १४. D. गुरुत्वं । १५. A. गुणः । १६. A. त्यंगु । १७. D. नांअं । १८. D. लि । १९. A. णे । २०. D. शी । २१. A. त्व । २२. D. व । २३. A. गा । २४. A. भासु । २५. A.. थवा ।

Dr. Urmila Sharma Collection, Varanasi

व[1]र्णिता वांशिकस्यैते गुणा गीतविचक्षणैः ।
एवं लक्षणसंयुक्ता वांशि[2]काः शोभना मताः ॥ १२५ ॥

[3]गा[4]तृ(तॄ)णां स्थानदातारस्तेषां दोषवि(पि)धायकाः ।
मुहुरस्य[5](खमस्याः) विषाणं वा दारुजं वा प्रकल्पयेत् ॥ १२६ ॥

अष्टाविंशतिरङ्गुल्यस्तस्य दैर्घ्यं विधीयते ।
मुखरन्ध्रं [6]च तस्य स्यादाढकीबीजवाहि च ॥ १२७ ॥

[7]अग्रतो व्यङ्गुलं छिद्रं कर्तव्यं काहलाकृति[8] ।
चतुरङ्गुलदीर्घा तु [9]सुतन्वी ताम्रनालिका ॥ १२८ ॥

मुख[10]रन्ध्रे ससूत्रा स्यात्क्षे(सा क्षे)प्तव्या यवमात्रकम् ।
ऊ[11]र्ध्वं तस्याः पि(वि)धातव्या व्यङ्गुला [12]शुक्तिच[13]क्रिका ॥ १२९ ॥

दन्तजा वा विधातव्या मध्यरन्ध्रसमन्विता ।
देवनालकृ[14]ता शुक्ति(क्तिः) काशपुष्पसमाकृतिः ॥ १३० ॥

क्षीरपा[15]कमृदू[16]भूतां चक्ररन्ध्रे निगो[17]जयेत् ।
[18]शृङ्गे रन्ध्राणि कुर्वीत विहाय [19]चतुरङ्गुलम् ॥ १३१ ॥

द्वादशाङ्गुल[20]वंशस्य प्रमाणेन वि[21]चक्षणः ।
शृङ्गवक्त्रादधोदेशो रन्ध्रदेशादधस्तथा ॥ १३२ ॥

छिद्रमन्यत्प्रकर्तव्यमेवं मुहुरिका भवेत् ।
अङ्गुली वं(वं)शमार्गेण छिद्रास्येषु विधारयेत् ॥ १३३ ॥

अध[22]श्छिद्रं पि[23]धातव्यं वामाङ्गुष्ठमुखेन तु ।
वितस्तिमात्रिका [24]पावी स्थौल्येनाङ्गुष्ठमात्रिका ॥ १३४ ॥

वैणवी सा प्रकर्तव्या कनिष्ठा[25]ग्रप्रवेशिनी ।
मुखर[26]न्ध्रं भवेदेकं [27]स्वरार्थं रन्ध्रपञ्चकम् ॥ १३५ ॥

---

१. A. र्ण्यते । २ D. शीका । ३. D. मा । ४. A. तृहाणां । ५. D. ख्व । ६. A. व । ७. A. अतो । ८. A तिः । ९. A. सुवत्तन्वी । १०. A. रंससूत्रा स्याक्षेप्तयाथवमात्रकं । ११. A. र्ध्वं । १२. A. सू । १३. D. क । १४. A. तांकोशां विकासिकुसुमाकृति । १५. A. कां D. कान् । १६. A. दु D. दद्भुतान् । १७. A. जयोजयेत् । १८. A. शृंग । १९. A. धतुरंगुली । २०. A. वर्ण । २१. A. पि । २२. D. धः छि । २३. A. वि । २४. D. वापि । २५. A. ष्टा । २६. A. रंध्रे । २७. A. ख ।

CC0. In Public Domain, Digitizagtion by eGangotri

वक्षो[1]देशे वा[2]हनीया नादेनो[3]च्चतरा हि सा ।
नवाङ्गुलप्रमाणेन कर्त[4]व्यः पावसंज्ञकः ॥ १३६ ॥

ताररन्ध्रप्रमाणेन मुखरन्ध्रं प्रकल्पयेत् ।
ग्रन्थिस्तस्य न भेत्त[5]व्यो मुख[6]रन्ध्राय धीमता ॥ १३७ ॥

स्वल्पध्वनिनिविष्टोऽयं [7]पावः कर्णसुखावहः ।
हस्तद्वया[8]धिका दीर्घा ताररन्ध्रचतुष्टया ॥ १३८ ॥

मुखरन्ध्रेण संयुक्ता सु[9]चुलि(मुरली) श्रुतिशोभना ।
शङ्खं नि[10]र्दोषमादाय नाभि(भिं) तस्य समुद्धरेत् ॥ १३९ ॥

एकादशाङ्गुलायामं कर्तव्यं शिखरं ततः ।
क्रमशो हीयमानं च धातुसि[11]क्ष(क्थ)कनिर्मितम् ॥ १४० ॥

अर्धाङ्गुलं मुखे रन्ध्रमन्तरा माषमात्रकम् ।
विधार्य करयुग्मेन श्वासेनापूरितोदरः ॥ १४१ ॥

[12]बद्धः कराक्षरैः[13] पाटैर्हुं[14]भुं पा[15]टसमन्वितैः ।
धत्तूरपुष्पवदना [16]रन्ध्रदण्डा सुदीर्घिका ॥ १४२ ॥

कार्या ता[17]म्रमयी रौप्यसुवर्णघटिताथवा ।
काहला नाम सा प्रोक्ता[18] वु(चु)क्का दीर्घतरा भवेत् ॥ १४३ ॥

तित्ती(त्ति)री यमला ह्रस्वा[19] तथैव च निरूपिता ।
शृङ्गं च माहिषं श्लक्ष्णं सर्वदोषविवर्जितम् ॥ १४४ ॥

फूत्कार [20]सुरसं क्षिप्तदन्तिदन्तोपशोभितम् ।
धोकारना[21]दगम्भीरं [22]तुतुकारविराजितम् ॥ १४५ ॥

कृष्णेन निर्मितं वाद्यं शृङ्गं गोपालवल्लभम् ।
हस्ताङ्गुल[23]प्रमाणेन तूर्यव[24]त्कथितं पुरा[25] ॥ १४६ ॥

---

१. A. क्ष । २. A. द । ३. A. च्चदेतराहिसा । ४. D. व्यं । ५. A. तं । ६. A. खं । ७. D. यावत्क । ८. A. द्व । ९. A. वुली । १०. D. र्घो । ११. A. क्थ । १२. A. वंधः । १३. A. रे । १४. A. भुं । १५. A. द । १६. A. रंध्रं । १७. D. साम्रन्मयी । १८. A. क्कादीर्घतरा-भवेत् । १९. A. खा तथैचेयं । २०. A. सुचिर । २१. A. मादरं । २२. D. तत्रु । २३. D. ली । २४. D. वित् । २५. A. राः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाट[1]वर्णाश्च ये तत्र त[2]त्र ये वाद्यकोविदाः ।
ताना[3]हूय महीपालः[4] सुसन्तुष्टः[5] प्रियावृतः ॥ ९४७ ॥

उत्सवे वा[6] तथोद्याने कुर्याद्वाद्यविनोदनम् ।
इति वाद्यविनो[7]दोऽयं लक्ष्यलक्षणसंयुत[8](तः) ॥ ९४८ ॥

भूलोकमल्लदेवेन विस्तरेण निरूपितः ।

इति वाद्यविनोदः ।

चतुःप्रकारभिन्नस्य लक्ष्म वाद्यस्य वर्णितम् ॥ ९४९ ॥

साम्प्रतं वर्णयिष्यामि नृत्यं[9] लक्षणसंयुतम् ।
उत्सवे विजये हर्षे कामे त्यागे[10] विलासके ॥ ९५० ॥

विवादेऽथ[11] परीक्षायां कार्यं नृत्यविनोदनम्[12] ।
विवाहपुत्रजन्मादिभूतमातृ[13]वसन्तकम् ॥ ९५१ ॥

एवमादि[14]निमितो(त्तो)त्था जनैरुत्सवसंज्ञिताः[15] ।
जयश्च प्राप्यते यत्र द्यूताह्वयरणादिषु ॥ ९५२ ॥

सन्तोषजनकः सम्यग्वि[16]जयः परिकीर्तितः ।
मिष्टान्नपान[17]भोगाश्च(च) दुप्रा(दुष्प्रा)प्यप्रापणेन च ॥ ९५३ ॥

गीतवाद्य[18]रवाच्चेतोविकासो हर्ष उच्यते ।
उद्दीपनार्थं चित्तस्य प्रत्यङ्गोपाङ्गवीक्षणम् ॥ ९५४ ॥

रूपयौवनयुक्तानां[19] काम इत्युच्यते बुधैः ।
इ(ई)दृग्विधं ममास्ती[20]ति स्त्रीरत्नं यत्प्रदृश्यते ॥ ९५५ ॥

[21]नर्तकी पररूपाणां विला[22]सः स तु कथ्यते ।
आ(अ)मर्षस्तु समापन्नो नृत्यविद्याविशारदैः ॥ ९५६ ॥

नृत्त........पेक्षौ वि(विद्याजयापेक्षैर्वि)वादः स तु कथ्यते ।
[23]नृत्यं(त्य) विद्यागमे सम्यक् प्रावि(वी)ण्यं विद्यते न वा ॥९५७॥

---

१. D. त । २. A. drops this तत्र । ३. A. नू । ४. A. ल । ५. A. ष्ट । ६. A. चा । ७. D. मे । ८. D. तं । ९. A. त्य । १०. A. ग । ११. D. च । १२. A. ने । १३. D. त्र । १४. D. विनोदो । १५. A. सिः । १६. D. क्वि । १७. D. संभोगतृप्तिकारणमेवच । १८. A. रद्दा । १९. D. यां । २०. A. सी । २१. D. नृत्तकी । २२. D. शालः । २३. A. वृतंविद्यागतः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रियालोको हि तस्यैतत् परीक्षा सा प्रकीर्तिता ।
नानादेशसमायातयाच[1]काश्चारणादयः ॥ ९५८ ॥

तेषां दानार्थमालोक[2]स्त्याग इत्यभिधीयते ।
नाट्यं लास्यं [3]ताण्डवं च लाघवं विषमं तथा ॥ ९५९ ॥

[4]विकटं चेति निर्दिष्टं नर्त्तकं(नं) षट्प्रकारकम् ।
[5]आहार्यैर्वा[6]चिकैश्चैव सात्विकैराङ्गिकै रसाः[7] ॥ ९६० ॥

[8]व्यज्यन्तेऽभिनयैर्नृत्यैस्तन्नाट्यमिति कथ्यते ।
पादपाट[9]विहीनश्च करणाभिनयोझि (ज्झि)तम् ॥ ९६१ ॥

ललितैरङ्गहा[10]यैश्च तल्लास्यं परिकीर्तितम् ।
तन्न(त्र)व्यक्तमुदारश्च लालित्येन विवर्जितम् ॥ ९६२ ॥

पुरुषैः[12] प्रायशः क्लृप्तं [13]नृ(त्यं)ताण्डवमीरितम् ।
स्वस्तिकैः करणैर्युक्तमचि(ञ्चि)ताद्यैरलङ्कृतम् ॥ ९६३ ॥

कौतुकोल्लासजननं लघु नृत्यं[14] तदिष्यते ।
विचित्रैः पदपाठै(टै)श्च नानाभङ्गिविव[15]र्जितैः ॥ ९६४ ॥

भ्रमणोत्क्षेपविक्षे[16]पकम्पाद्यैर्विषमं भवेत् ।
विकृतैर्मु[17]खहस्तैश्च जठराङ्घ्रिविलोचनैः ॥ ९६५ ॥

विरूपं नृत्यते यत्तु[18] विकटं तत्प्रचक्षते ।
नर्तकाः षट्[19]प्रकाराः स्युर्नर्तकी नटनर्तकौ ॥ ९६६ ॥
वै[20]तालिकाश्चारणाश्च तथा कोल्लटिका अपि ।
[21]सुरूपा त[22]रुणी तन्वी श्या[23]मा चारु[24]पयोधरा ॥ ९६७ ॥

प्रगल्भा सरसा चित्ते[25] नर्तकी सा प्रशस्यते ।
पाठको बहुभाषासु बहुभावविशारदः ॥ ९६८ ॥

---

१. A. व । २. A. क्य । ३. A. नाड । ४. A. बि । ५. A. आहायो D. अहार्यै । ६. A. वींचि D. वचि । ७. A. सा । ८. D. वाद्यंते । ९. A. ठ । १०. A. रैर्यतालास्यं । ११. A. स्तब्धं । १२. A. षै । १३. A. नृताण्डव D. तत्ताण्डवमुदीरितम् । १४. D. त्तं । १५. A. राजि । १६. D. ज्ञेयं । १७. D. र्मुय । १८. A. तु । १९. A. ड् । २०. A. वे । २१. A. सू । २२. A. रुह । २३. A. श्य D. स्या । २४. A. रू । २५. A. तैं ।

Dr. Urmila Sharma Collection, Varanasi

रसाभिनयविज्ञाता[१] नटो वाऽथ नटी[२] [३]वरा ।
[४]स्वभ्यस्तः पदपाटेषु[५] हस्तपाट[६]विचक्षणः ॥ १६९ ॥

शि[७]क्षको नृत्यविद्यायां सुरेखो[८] [९]नर्तको वरः[१०] ।
बहुभाषाप्रगल्भो यः परि[११]हासविचक्षणः[१२] ॥ १७० ॥

परि[१३]वादपरो नृत्ये[१४] सम्यग्[१५] वैतालिको वरः ।
किङ्किणीचालने दक्षो[१६] गीतधा[१७]रणकोविदः ॥ १७१ ॥

हास्य[१८]वाक्यप्रगल्भश्च सुस्वरश्चारणो वरः ।
[१९]क्षुरिकां [२०]वञ्चयत्यङ्गै [२१]मृद्वङ्गैः परिवर्तते ॥ १७२ ॥

लघुप्लवो भारसहो [२२]नृत्य(त्ये) कोलटिको वरः ।
नर्तकाः कथितास्त्वेवं नृत्यभेदो (ऽ)भि[२३]धीयते ॥ १७३ ॥

अङ्गै[२४]रुपाङ्गैः प्रत्यङ्गैर्व्यक्तं [२५]यत्प्रतिपाद्यते ।
शिरःस्क[२६]न्धस्तथा वक्षो जठरं पार्श्वयुग्मकम् ॥ १७४ ॥

कटिश्चेति भवन्त्यत्र [२७]षडेवाङ्गानि [२८]मुख्यता (तः) ।
भ्रुवौ नेत्रे तथा नासा कपो[२९]लोष्ठं[३०] हनू[३१]स्तथा ॥ १७५ ॥

[३२]दन्ता जिह्वा भवन्त्यष्टा[३३]व(वु)पाङ्गानि मते[३४] मम ।
[३५]बाहु(हू) च मणि[३६]बन्धौ च करशाखा[३७]स्तथैव च ॥ १७६ ॥

जानुजङ्घे पदा[३८]ङ्गुल्यः प्रत्यङ्गानि षडेव च ।
अङ्गान्यु[३९]पाङ्गान्युक्तानि प्रत्यङ्गसहितानि च ॥ १७७ ॥

[४०]क्रियास्तेषां प्रवक्ष्यामि विनियोगेन संयुताः ।
आकम्पितं च विधुरं (कम्पितं च) द्रुतं विध्रर(धुत)मेव च ॥१७८॥

---

१. A. ना। २. A. दी। ३. D. नरः। ४. A. सा। ५. D. ठे। ६. D. द। ७. D. वीक्ष। ८. A. को ९. A. नृत्त। १०. A. चः। ११. A. री। १२. A. णा। १३. A. र। १४. D. त्तैः। १५ D. क्। १६. A. क्षौ। १७. A. वा। १८. वां। १९. D. क्ष। २०. A. का। २१. A. द्वंगौ। २२. D. लाटिको नृत्यको वरः। २३. D. वि। २४. A. र। २५. D. यः प्र। २६. A. स्कंधेस्त। २७. D. खंडेवां। २८. A. मुच्यते। २९. D. पा। ३०. D. ष्ठौ। ३१. A. नूत। ३२. A. दंत। ३३. D. एउ। ३४. A. धतेमम। D. मतेर्मम। ३५. A. हौ। ३६. D. बंधे। ३७. A. खत। ३८. D. दागुल्फः। ३९. A. न्यपांगयु। ४०. D. drops this stanza।

अवधूतं [1]तथा धूतमञ्चितं न्यञ्चितं तथा।
परिवाहिं[2] परावृत्तमुत्क्षिप्तकमधोगतम् ॥ ९७९ ॥

[3]लोलितं [4]चेति विज्ञेयं त्रयोदशविधं [5]शिरः।
अधश्चोर्ध्वं शनैः कम्पाद्भवेदाकम्पितं शिरः ॥ ९८० ॥

तथैव कम्पितं शीघ्रं बहुशः कम्पितं [6]शिरः।
पृछो(च्छो)पदेशसंज्ञा[7]सु निर्दे[8]शे भाषणे तथा ॥ ९८१ ॥

आवाहने च निर्दिष्टं तज्ज्ञैराकम्पितं शिरः।
वितर्के तर्जने कोपे[9] विज्ञाने च निवारणे ॥ ९८२ ॥

तथा सातिशय[10]प्रश्ने कम्पितं विनियुज्यते।
शिरस्तु[11] [12]परितस्तिर्यग् धूतं विधुतमुच्यते ॥ ९८३ ॥

तदेव यदि मन्दं स्याद् द्रुतमित्युच्यते तदा।
पाता(ना)वसाने शीतार्ते [13]स्वा(श्वा)सिते ज्वरिते तथा ॥ ९८४ ॥

भीते चैव[14] प्रयोक्तव्यं तज्ज्ञैस्तु विधु[15]तं शिरः।
[16]अनीप्सिता (ते) विस्मये च विषादे प्रत्यये तथा ॥ ९८५ ॥

नास्तीति वचने चैव प्रतिषेधे धू(द्रु)तं शिरः।
शिरोधः सकृदाक्षिप्तमवधूतमुदाहृतम् ॥ ९८६ ॥

[17]तिर्यग्गू(गू)र्ध्वं समुत्क्षि[18]प्तमाधू[19]तं शिर उच्यते।
आवाहने च सन्देश[20]श्रवणे श्रावणे तथा ॥ ९८७ ॥

संज्ञाप्रदर्शने चैव शिरः[21] स्यादवधूतकम्।
अमर्षे च तथा गर्वे विस्मये हर्षणेऽपि च ॥ ९८८ ॥

स्मृता[22]वपि प्रयोक्तव्यं शीर्षमाधूतसंज्ञकम्।
हस्त[23]पार्श्वे[24] तथा (नत)ग्रीवं शिरो विज्ञेयमञ्चितम् ॥ ९८९ ॥

---

१. A. gives तथा धूतं twice। २. A. हपराव्रृत्तमुक्षि। ३. A. ला। ४. A. वे। ५. A. सि। ६. A. तं शितं शिरः। ७. D. ज्ञाः सु। ८. D. शे। ९. A. शा। १०. D. ये। ११. D. स्तू। १२. A. पतितं तिर्थं श्चूतं। १३. A. त्रा। १४. D. नै। १५. A. धुरं। D. धृतं। १६. A. drops this verse। १७. A. तिर्यंग्र। १८. A. क्षि। १९. D. धु। २०. A. शे। २१. A. रस्यादवधूभकम्। २२. A. वा। २३. A. स्तं। २४. A. श्वं।

बाहुमूर्धनि संसक्तं [1]न्यञ्चितं परि[2]चक्षते ।
प्रसन्ने व्याधिते भीते मूर्च्छि[3]ते दुःखिते तथा ॥ ९९० ॥

चिन्तानिमग्नके [4]दैवे कार्ये स्यादञ्चितं शिरः ।
विलास(से)ललिते गर्वे [5]विब्बोके(व्वोके) कि[6]लकिञ्चिते ॥९९१॥

(मोट्टायिते कुट्टमिते) माने स्तम्भे च न्यञ्चितम् ।
[7]नानाभावरसे वर्णे(र्ण्ये) परि[8]वाहितमुच्यते ॥ ९९२ ॥

पराङ्मुखं भवेद्यत्तु तत्परावृत्त[9]मुच्यते ।
विषा[10]दे साधने हर्षे विचारे स्मरणे तथा ॥ ९९३ ॥

विह्व[11]तामर्षली[12]लासु परिवाहितमिष्यते ।
[13]पु(पृ)छ्वद्धे [14]तु विक्षिप्य(प्तं) बाणाहरण[15]कर्मणि ॥ ९९४ ॥

[16]पाश्चात्यवी[17]क्षणे [18]चैव तथा कम्पनहेतुके ।
(मुखापहरणे चैव परावृत्तं शिरः स्मृतम्) ॥ ९९५ ॥

अवाङ्मुखं शिरो य(त्स्या)त्तदधोमुखमिष्यते ।
(उत्क्षिप्तं चापि विज्ञेयमुन्मुखावस्थितं शिरः) ॥ ९९६ ॥

प्र[19]णामे चैव लज्जायां दुःखे [20]चिन्तोपता[21]पयोः ।
निम्नस्थव[22]स्तुवीक्षायां जायते[23]ऽवनतं शिरः ॥ ९९७ ॥

[24]यत्किञ्चिदुत्तरं वस्तु यदा नभसि संस्थितम् ।
तस्य संवीक्षणे कुर्याच्छिरः[25] प्र[26](र उ)त्क्षिप्तसंज्ञकं(कम्) ॥९९८॥

(सर्वतो लोलनाच्चापि शिरः स्यात्परिलोलितम्)
मदवैकल्यरोगेषु ग्रहावेशे नियुज्यते ॥ ९९९ ॥

उच्छ्रितः[27] स्वस्त(स्रस्त) एकान्तः [28]संलग्नो लोल एव च ।
स्कन्धः पञ्चविधः प्रोक्तो नृत्ये[29] नाट्ये च कोविदैः[30] ॥ १००० ॥

---

१. A. नंचि । २. A. व । ३. D. छि । ४. A. चैव । ५. A. द्विविद्यो । ६. A लि । ७. A. drops नानाभावरसेवर्णे । ८. A. रवाहितदुच्यते । ९. A. त । १०. A. साये । ११. A. दि । १२. D. ला । १३. D. प्र । १४. A. तु क्षिप्त वाणा । १५. A. णा । १६. A. पश्चाश्चात्य । १७. A. वि । १८. A. वैव आवाङ्मुखं शिरो—यतदाहुरधोमुखं । १९. A. र । २०. D. चित्तो । २१ A. ना । २२. A. स्थ । २३. A. शिरः प्रक्षिप्तसंज्ञकः । २४. A. D put this stanza before the preceding one । D. किंचिच्च उत्तरं वस्तु । २५. A. स्थिरः । २६. D. क्षिप्तसंज्ञकं । २७. A. तं । २८. A. संळज्जो । २९. A. ते । ३०. A. दै ।

CC0. In Public Domain, Digitizagtion by eGangotri

मदात्समुन्नतः[1] स्कन्ध उच्छ्रितः परिकीर्तितः ।
अधोगतो[2] भवेत्स्क[3]न्धः (स्रस्तः) (श्लेषे संलग्न उच्यते) ॥१००१॥

(क्रोधात्समुच्छ्रितः स्कन्ध एकान्तः परिकीर्तितः) ।
स्कन्धः प्रचलिते(तः) ख्यातो लोल[4] इत्याभिसंज्ञया ॥ १००२ ॥

क्षवथावभिमाने च सम्मदे च विशेषतः[5] ।
उच्छ्रितो[6] विनियोक्तव्यः[7] स्कन्धो नाट्यविशारदैः ॥ १००३ ॥

[8]शमे मदे च मूर्च्छायां दुःखे स्रस्तः प्रयुज्यते ।
मुष्टिप्रहारे कुन्ते च[9] (एकान्तो विनियुज्यते) ॥ १००४ ॥

हुडुक्कावादने हासे विट्टनृभ्ये च लोतके (विटनृत्ये च लोलकः) ।
अ(आ)भुग्नं चै[10]व निर्भुग्नं व्याकम्पितमथापि वा ॥ १००५ ॥

उत्प्रसारि समं [11]चेति वक्षः [12]पञ्चविधं स्मृतम् ।
आभुग्नमुन्नते पृष्ठे[13] निर्भुग्ने[14] (ग्नं) निम्नपृष्ठके ॥ १००६ ॥

[15]उरः कम्पसमायुक्तं व्याकम्पितमुदीरितम् ।
[16]हृच्छल्यकर्षणे शीते लज्जायां वेदने भये[17] ॥ १००७ ॥

विषा[18]दमूर्च्छाशोकेषु वक्ष आभुग्नमुच्यते ।
स्तम्भे सुनामश्रवणे सत्ये[19] शीताभिवाञ्छने ॥ १००८ ॥

वञ्चने पृष्ठ[20] घातस्य [21]गर्व(र्वे) निर्भुग्न[22]मीर्यते ।
दीर्घोच्छ्वासे च [23]कुम्भे च तुङ्गवस्तुविलोकने ॥ १००९ ॥

उत्प्रसारितकं कार्यं समं सौष्ठव[24]कर्मणि ।
क्षामं [25]खलं (ल्लं) तथा पूर्णं रिक्तं [26]पूरं तथैव च ॥ १०१० ॥

एवं चतुर्विधं प्रोक्तं जठरं नाट्यवेदिभिः ।
ईषन्नतं भवे[27]त्क्षामं खल्लं[28] स्यात्पृष्ठभागतः[29] ॥ १०११ ॥

---

१. A. त । २. A तौ । ३. A स्कंधः प्रचलितः ख्यातो लोल इत्यभिसंज्ञया । D. भवेचैव... । ४. D. व । ५. A. त । ६. A. ता । ७. A. व्यं । ८. A. शांमामादे । ९. A. च हुडुक्कावादने तथा । D. च... । १०. A. वनिर्भुग्नं । ११. A. वे । १२. A. पंचं । १३. A. ष्टे । १४. D. ग्ने । A. ग्न । १५. A. रकंप । १६. A. हृवल्य । १७ A. वे । १८. A. शा । १९. D. त्य । २०. A ष्ट । २१. D. प्रवनीर्भुग्न । २२. A. भुग्न । २३. D. लंभे । २४. A. ष्ट । २५. A. लक्षं । २६. D. पूर्ण । २७. A. द्वाम । २८. D. लं । २९. A. त ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]क्षामं स्याज्जृम्भणे (हासे)क्षुधि (क्षुधार्ते खल्लमिष्यते)
[2]खल्लं स्यात्प्रेतवेताल[3]चण्डिकाभिनयेषु च ॥ १०१२ ॥

तुन्दिलाभिनये गर्भे[4] तथा[5] श्वासनिरोधने ।
जलोदरे चात्य[6]शने पूर्णं जठरमिष्यते ॥ १०१३ ॥

[7]उदाने विकृते कोपे श्रमे स्वासे (श्वासे) तथैव च ।
रिक्तपूरं प्रयोक्तव्यं जठरं नाट्यवेदिभिः ॥ १०१४ ॥

नतं समुन्नतं चैव प्रसारितविवर्तितम् ।
तथा [8]प्रसृतमित्येवं पञ्चधा पार्श्वमुच्यते ॥ १०१५ ॥

[9]किञ्चिद् वक्रं ततः (नतं) पार्श्वमुच्छ्रितं स्यात्समुन्नतम् ।
त्रिकस्य च(चा)लनात्तिर्यग् विवर्तितमुदा[10]हृतम् ॥ १०१६ ॥

तदेवान्तर्यदा पृष्ठं तदा प्रसृतमुच्यते ।
उपसर्पे त्वधोवेधे[11] पार्श्वतोऽभो निरीक्षणे ॥ १०१७ ॥

त्रासे च विनियोक्तव्यं नतं पार्श्वं[12] प्रयोक्तृभिः ।
ऊर्ध्वं[13]वध्येऽग्नितापे च पार्श्वकण्डूयने तथा ॥ १०१८ ॥

प्रियगात्रोपसंस्पर्शे पार्श्वं[14] योज्यं समुन्नतम् ।
ऊर्ध्वस्थानां[15]पदार्थां[16]नां [17]कर्षणेबाहुयुग्मतः ॥ १०१९ ॥

जलावतरणे पार्श्वं[18] कर्तव्यं स्यात्प्रसारितम् ।
परिवृत्ताव[19]ग(ङ्ग)मोटे[20] विवर्तितमुदाहृत[21]म् ॥ १०२० ॥

परिवृत्यापसारे च कुर्यादपसृतं बुधः ।
छिन्ना विवृत्ता च तथा रेचितान्दोलितापि च ॥ १०२१ ॥

उद्वाहिता चेति कटी[22] पञ्चधा परिकीर्तिता ।
तिर्यग्विनिर्गता छिन्ना विवृत्ता चलिता भवेत् ॥ १०२२ ॥

---

१. D. drops this line । २ A. लं । ३. D. लश्चंडिका । ४. A. र्तें । ५. D. थोच्छ्वा । ६. A. न्य । ७. D. drops these stanzas । ८. A शीस्क । ९. D. drops this line । १०. A. दापृष्ट ... तमुच्यते । ११. A. धो । १२. D. र्श्वं । १३. A. र्ध्वंव्यधो । १४. A. र्श्वं । १५. A. न । १६. A. र्थाना । १७. D. कंकणे । १८. D. र्श्वं । १९. A. वंग । २०. A. डे । २१. A. नं । २२. A. टि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकम्पनक्रियायुक्ता रेचिता परिकीर्तिता[1] ।
शनैस्तिर्यक् प्रचलिता भवेदान्दोलिता कटिः[2] ॥ १०२३ ॥

क्रमात्पक्ष[3]द्वयोत्क्षिप्ता कटिरुद्वाहिता मता ।
वक्रस्याभिनये छिन्ना विकारे च [4]नियुज्यते ॥ १०२४ ॥

पश्चाद[5]धोविलोके च[6] विवृ[7]ता कटिरिष्यते ।
[8]नृत्ये तु रेचिता योज्या कुब्ज[9]वामनखञ्जयोः ॥ १०२५ ॥

गमनाभिनये[10] काया[11] (र्या) बुधैरान्दोलिता कटिः[12] ।
स्थूलानां[13] गमने योज्या स्त्रीणां लीलागतावपि ॥ १०२६ ॥

उद्वाहिता प्रयोक्तव्या कटिर्नाट्यविशारदैः ।
अङ्गानां लक्षणं नाम विनियोगश्च कीर्तितः ॥ १०२७ ॥

उपाङ्गभेदो(दः) सर्वोऽपि वक्ष्यते विस्तरेण च[14] ।
उत्क्षि[15]प्ता पतिता चैव भ्रुक्(भ्रूः कु)व्या सहिता तथा ॥ १०२८ ॥

चतुराकुञ्चनोपेता स्फुरिता सहजापि च ।
पृथग्वा युगपद्वापि प्रोन्नता भ्रू[16] (भ्रूः) भवेद्यदि ॥ १०२९ ॥

उत्क्षिप्ता सा समाख्याता साधश्चेतत्पतिता तथा ।
भ्रुवोर्मूल[17] समुत्क्षेपाद् भ्रूकुटिः सा निगद्यते ॥ १०३० ॥

[18]अपाङ्गोन्नतिसंयुक्ता चतुरा परिकीर्तिता ।
एकस्या उभयोर्वापि वक्रतायां[19] निकुञ्चिता ॥ १०३१ ॥

एकैव ललितो[20]त्कम्पा स्फुरिता भ्रूरुदाहृता ।
निजस्थानस्थिता प्रोक्ता(ता) सह[21]जेत्यभिधीयते ॥ १०३२ ॥

भ्रुवो[22]र्लक्षणमित्युक्तं विनियोगो निगद्यते ।
[23]वितर्कामर्षहेलासु निकटश्रवणेऽपि च ॥ १०३३ ॥

---

१. A. ताः । २. D. वटी । ३. A. व्य द्वयोः । ४. D. वि । ५. A. द्वा । ६. A. न । ७. D. कृ । ८. A. वृत्ते । ९. A. ञ्जा । १०. D. यः । ११. D. र्ये । १२. A. टि । १३. A. ना । १४. A. हि । १५. D. चिक्ष्र । १६. A. भू । १७. A. लें । १८. A. अगांगो । १९. A. र्या । २०. A. ता । २१. A. हाजे । D. सज्जे । २२. A. वांल २३. A. चितका ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एको[1]क्षिप्ता प्रयोक्तव्या भ्रूलता नाट्यकोविदैः ।
ऊर्ध्वस्थवीक्षणे हर्षे विस्मये दूरदर्शने ॥ १०३४ ॥

उत्क्षिप्ते द्वे[2] प्रयोक्तव्ये प्रयोग[3]निपुणौ[4] भ्रुवौ (णैर्भ्रुवौ) ।
हासे घ्राणे जुगु[5]प्सायामसूयायामथाऽपि वा ॥ १०३५ ॥

भ्रूलते[6] पतिते योज्ये सर्वदाभिनये बुधैः ।
सूक्ष्म[7]रन्ध्रावलोके च[8] सूर्य[9]विद्युन्निरीक्षणे ॥ १०३६ ॥

अतिक्रोधे प्रयोक्तव्ये भ्रु(भ्रू)कुटीसञ्जिते[10] भ्रुवौ ।
शृङ्गारे ललिते सौम्ये दर्शने चतुरा भवेत् ॥ १०३७ ॥

[11]सो(मो)ट्टायिते कुट्टु(ट्ट)मिते विलासे स्यान्निकुञ्चिता ।
एतेष्वेव[12] प्रयोक्तव्या स्फुरिता भ्रूलता बुधैः ॥ १०३८ ॥

रसाभि[13]नयहीनेषु[14] भावेषु सहजा मता ।
कान्ता भयान[15]का चैव हास्या च[16] करुणा तथा ॥ १०३९ ॥

अद्भुता च तथा रौद्री वीरा बीभत्सया सह ।
एता रसाश्र[17]याश्चाष्टौ दृष्टयः परिकीर्तिताः ॥ १०४० ॥

भावाश्रया निगद्यन्ते तथैवाष्टौ मयाऽधुना ।
[18]स्निग्धा हृष्टा च क्रूरा च[19] क्रुता (दीना) दृप्ता भयान्विता ॥१०४१॥

जुगुप्सिता विस्मिता च स्थायीभावाश्रया [20]इमाः ।
शून्या च मलिना श्रान्ता सलज्जा ग्लानिसंयुता[21] ॥ १०४२ ॥

शङ्किता च विषण्णा[22] च मुकुलाकुञ्चितापि च ।
अभितप्ता च जिह्मा[23] च [24]म(ल)लितान्यवितर्किता[25] ॥ १०४३ ॥

तथार्ध[26]मुकुला श्रान्ता विप्लुता केकरापि च ।
विकोशा त्राससंयुक्ता [27]मदिरा चेति दृष्टयः ॥ १०४४ ॥

---

१. A. क्रा । २. A. द्वा । ३. A. गेः । ४. A. ण । ५. A. हु । ६. A. तेज्ये । ७. A. रंध्रवि । ८. A. व । ९. D. द्युति । १०. A. तो । ११. A. drops this line । १२. A. वं । १३. A. वि । १४. D. हीनेषु । १५. A. निकांश्चै । १६. A. व । १७. A. वत्रा । १८. D. स्निग्धा च हृष्टा च । १९. A. क्रुता दप्ता । D. क्रुदप्ता । २०. A. द्वामाद्रमाः । २१. A. drops this ता । २२. A. णा । २३. A. ह्रा । २४. D. चा । २५. D. का । २६. D. कुंडलीभ्वंता । २७. . मं ।

Dr. Urmila Sharma Collection, Varanasi

षट्[1]त्रिंशन्नामतः प्रोक्तास्तासां वक्ष्यामि लक्षणम् ।
सह[2]र्षा च[3] प्रसन्ना च सका[4]मापाङ्ग सङ्गता ॥ १०४५ ॥
कान्ता दृष्टिस्तु सम्भोगशृङ्गारे विनियुज्यते ।
स्फुरदुद्धृ[5]त्ततारा च स्तब्धोद्वृत्तपुटद्वया ॥ १०४६ ॥
दृष्टिर्भयानका योज्या भयोत्पादनकर्मणि ।
क्रमशः [6]कुञ्चितपुटा विश्रान्ता स्वल्पतारका[7] ॥ १०४७ ॥
हास्या[8] दृष्टिः प्रयोक्तव्या [9]कुतुके हास्यकर्मणि ।
मन्दमन्थरतारा च पतितोर्ध्वपुटा तथा ॥ १०४८ ॥
घोणाग्र[10]दायिनी दृष्टि : करुणा कर(रु)णे रसे ।
समाकुञ्चितपक्ष्माग्रा मनागुद्धृत्ततारका ॥ १०४९ ॥
सौ[11]म्या विक[12]सितप्रान्ता सा[13]द्भुता दृष्टिरद्भुते[14] ।
[15]रूक्षा क्रूरारुणोद्वृत्ता नि[16]ष्टब्धा(निष्टब्ध) पुटता[17]रका ॥ १०५० ॥
रौद्री[18] दृष्टिः प्रयोक्तव्या रसे[19] रौद्रे विचक्षणैः ।
क्षुब्धा [20]विकसिता दीप्ता गम्भीरा मध्य[21]तारका ॥ १०५१ ॥
उत्फुल्लो[22]त्फुल्लदृष्टिस्तु वीरा वीररसे स्मृता ।
नि[23]कुञ्चितपुटप्रान्ता [24]घ्राणा[25]विष्कृततारका ॥ १०५२ ॥
सरुद्ध[26]पक्ष्मा बीभत्सा बीभत्से[27] विनियुज्यते ।
हृष्टा प्रफुल्ला मधुरा स्मेरदा[28](ता)राभिकाङ्क्षिणी ॥ १०५३ ॥
स्निग्धेयं[29] कथिता [30]दृष्टि(ष्टी) रतिभावसमाश्रया ।
हासगर्भा विश[31]त्तारा चञ्चला च निमेषिणी ॥ १०५४ ॥
हासे विकुञ्चिता दृष्टि[32]र्हृष्टा हास्ये[33] नियुज्यते ।
अर्धस्रस्तोत्तरपुटा मनाक् संरुद्धतारका ॥ १०५५ ॥

---

१. D. ड्वि । २. A. द । ३. D. चसन्ना च । ४. A. कां । ५. D. द्धृत । ६. A. कुचि । ७. D. ता । ८. A. स्य । ९. A. कटुके । १०. A. ग्र । ११. D. सौमा । १२. A. सत । D. सिता । १३. A. स । १४. A ता । १५. D. रु । १६. A. निटब्ध । १७. A. त । १८. A. द्र । १९. D. सैरोद्र । २०. A. पि । २१. A. त्त । २२. D. क्षमध्या । २३. A. न । २४. A. घृ । २५. D. विकृत । २६. D. द्र पक्ष्मा । २७. A. त्सेति विनियुज्यंत । २८. A. चा । २९. A. वं । ३०. A. दष्टिरभाव । ३१. A. शात्ताचंचला । ३२. A. ष्टिहृ । ३३. D. से ।

CC0. In Public Domain, Digitizagtion by eGangotri

सबा[1]ष्पा मन्दसञ्चारा दीना शोकेऽभिनीयते ।
स्थिरोद्वृत्तपुटा रूक्षा संस्त[2]ब्धोद्वृत्ततारका ॥ १०५६ ॥

इयमेवं[3]विधा [4]दृष्टिः क्रुद्धा क्रोधे[5] विधी[6]यते ।
स्थिरतारा[7] समुत्फुल्ला प्रसादगुणशालिनी ॥ १०५७ ॥

हृष्टा दृष्टिः प्रयोक्तव्या [8]भाव उत्साहनामनि[9] ।
विस्फारितपुटद्वन्द्वा त्रासचञ्चलतारका ॥ १०५८ ॥

निष्क्रा[10]न्तमध्या [11]दृष्टिस्तु भय[12]भावे भयान्विता ।
सङ्कोचित[13]पुटव्यामो(व्यामा)[14]दृष्टिः पिहिततारका[15] ॥ १०५९ ॥

लक्ष्या विलोकनोद्विग्ना दृष्टिर्भा[16]वे जुगुप्सिता ।
उन्नम्य तारकामग्न[17]पुटद्वन्द्वा विकासि[18]नी ॥ १०६० ॥

समा[19]दृष्टिः समाख्याता[20] विस्मये विस्मिताभिधा ।
रसभावाश्रयाः[21] प्रोक्ता अष्टावष्टौ पृथग्द (ग्दृ)शः ॥ १०६१ ॥

सञ्चारिभावसम्बन्धाः कथ्यन्ते दृष्टयोऽधुना ।
निष्कम्पी (म्पा) समतारा च बाह्यार्थग्राहिणी च या ॥ १०६२॥

शून्या दृष्टिः[22]समाख्याता[23] चिता(न्ता)यां व्यभिचारिणी ।
ईषदस्पृ[24]ष्टपक्ष्माग्रा किञ्चिद्दर्शिततारका ॥ १०६३ ॥

निर्वे[25]दे वाथ वैवर्ण्ये मलिनेयम्प्रयुज्यते ।
सशै[26]थिल्याञ्चितपुटा क्षामा पतिततारका ॥ १०६४ ॥

श्रान्ता दृष्टिः प्रक[27]र्तव्या श्रमाभि[28]नयकर्मणि ।
किञ्चिदञ्चितपक्ष्मा[29]ग्रा पतितोर्ध्व[30]पुटा च या ॥ १०६५ ॥

व्रीडाऽधोगततारा च व्रीडायां लज्जिता भवेत् ।
श्लथकर्मपुटा मन्दा क्रमस्याभिनयं प्रति ॥ १०६६ ॥

---

१. D. वारव्या । २. D. दध्व । ३. D. व । ४. A. दष्टि । ५. D. धा । ६. A. ही । ७. D. रामुत्फु । ८. D. A. ता । ९. A. नी । १०. A. निक्रांत । D. निक्रान्तः । ११. A. द । १२. D. या । १३. D. पटव्यामा । १४. A. द । १५. A. काः । १६. D. भाग । १७. A. मं । १८. D. शि । १९. A. म । २०. A. ता विस्मिताभिधा । २१. D. या तारा बाह्यार्थग्राहिणी च या । २२. A. ष्टि । २३. D. ता ख्याता या व्यभिचारिणी । २४. D. स्प । २५. D. वेंवाथ । २६. D. शिथि । २७. A. व । २८. D. सि । २९. A. क्षांता । ३०. D. र्धं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उन्नता चञ्चला किञ्चिदूर्ध्वं[1] चकितता[2]रका ।
शङ्किता दृष्टिराख्याता शङ्कायां सा प्रयुज्यते ॥ १०६७ ॥

मनाग्[3] निष्टब्धतारा या त्रस्तापा[4]ङ्गा निमेषिणी ।
विषा[5]दविस्तीर्णपुटा विषादे सा[6] विषादिनी ॥ १०६८ ॥

चलदाश्लिष्टपक्ष्मान्ता मुकुलोर्ध्व[7]पुटाञ्चिता ।
सुखामीलि[8]ततारा च [9]मुकुला गन्धसम्मदे ॥ १०६९ ॥

[10]किञ्चित्कुञ्चितपक्ष्माग्रा [11]कुञ्चत्तारापुटान्विता ।
कुञ्चिता दृष्टिराख्याता चक्षु(क्षू) रोगे प्रयुज्यते ॥ १०७० ॥

मनागलसतारा य[12](या) चलितैश्च पुटैर्युता ।
निर्वेदे चाभितापे[13] च कार्या दृष्टिरुपप्लुता ॥ १०७१ ॥

प्रलम्बाकुञ्चितपुटा तिरश्ची रूक्षदर्शना ।
गूढतारा निगूढा च जिष्णा(ज्ञा) सूया[14](सोर्यो)पयोगिनी ॥१०७२॥

ईषदाकुञ्चितप्रान्ता मधुरा च समन्मथा ।
सस्मिता ललिता दृष्टि[15]र्ललिते[16]ऽर्थे प्रयुज्यते ॥ १०७३ ॥

उद्वर्त्ति(र्ति)तपुटद्वन्द्वा तथैवोत्फुल्लतारका ।
[17]अधोविकासा दृष्टिः स्यात् (द्)वितर्के तु वितर्किता ॥ १०७४ ॥

अर्धसम्फुल्लतारा च युक्तार्धमुकुलैः पुटैः ।
गन्धस्पर्शरसास्वादे योज्यार्धमुकुला बुधैः ॥ १०७५ ॥

[18]चलत्पुटा[19] चलत्तारा[20] विवृता मध्यभागतः ।
आवेशे[21] सम्भ्रमे[22]भ्रान्तौ [23]विभ्रान्ता दृष्टिरीरिता ॥ १०७६ ॥

प्रस्फुरत्त(त्स्त)म्भितपुटा विच्छायो[24]द्वृत्ततारका ।
[25]चापलोन्माददुःखार्तिमरणे विप्लु[26]ता भवेत् ॥ १०७७ ॥

---

१. A. र्ध्वं । २. D. ताशंकिता । ३. A. म्रिष्टश्च । D. क्निःस्तब्ध । ४. D. यागो । ५. D. वा । ६. A. परिकीर्त्तिता । ७. A. र्धं । ८. A. जि । ९. D. कुमुला । १०. A. किंचि । ११. D. कुंचिता । १२. D. च । १३. A. पेतापेच । १४. A. र्यो । १५. A. र्लतेर्थे । १६. D. तोर्ध्वे । १७. A. सा दृष्टिःस्याद्वितर्के तु प्रोक्ता दृष्टिवितार्किता । १८. A. व । १९. A. टाराचल । २०. A. रा विवृत्ताविवृताम । २१. D. श । २२. D. भ्रांतो । २३. A. भ्रांतदृष्टिःसमीरिता । २४. D. योद्धतारका । २५. A. वाप । D. चोप । २६. A. प्लु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आकुञ्चितपुटप्रान्तसङ्गतार्धनिमेषिणी ।
मुहुर्व्यावृत्त[1]तारा च लोकेषु केकरा स्मृता ॥ १०७८ ॥

विकासितपुटद्वन्द्वा निमेषपरिवर्जिता ।
चलत्तारा विकोशा स्याद्[2] विव्वोकेऽमर्षगर्वयोः[3] ॥ १०७९ ॥

[4]उद्धूतवर्त्म(उद्धृत्तवर्त्मा) या दृष्टिस्तथो[5]त्कम्पिततारका ।
प्रस्फुरत्फुल्लमध्या च त्रस्ना त्रासे प्रयुज्यते ॥ १०८० ॥

दृष्टिर्विकसित[6]प्रान्ता क्षमान्ता घूर्णतारका[7] ।
तथा विकसितापा[8]ङ्गा मदिरा तरुणे मदे[9]॥ १०८१ ॥

चलत्तारापुटा किञ्चिदनवस्थितिदर्शना ।
इयं मध्यमदे योज्या मदिरा दृष्टिकोविदैः ॥ १०८२ ॥

कदाचिदनिमेषा या कदाचिच्च निमेषिणी ।
अधोनिरीक्षणपरा मदिरोक्ताधमे मदे ॥ १०८३ ॥

षड्(ट्)[10]त्रिंश[11]द् दृष्टयः प्रोक्ताः सोपयोगाः[12] सलक्षणाः[13] ।
भूलोकमल्लदेवेन[14] सार्वभौमेन धीमता ॥ १०८४ ॥

नता मन्या विकृष्टा च [15]स्वेच्छसा(सोच्छ्वासा) च विकूणिता ।
खा(स्वा)भाविकी चेति बुधैः [16]षड्विधा नासिका स्मृता ॥१०८५॥

अत्यर्थ[17]संश्लिष्टपुटा नासिका कथिता [18]नता
[19]उच्छेदने रोदने(ऽ)स्या[20]विनियोगः प्रकीर्तितः ॥ १०८६ ॥

ईषल्लग्नपुटा नासा मन्दा च परिकीर्तिता ।
निर्वेदचिन्ताशोकेषु प्रयोक्तव्या मनीषिभिः ॥ १०८७ ॥

[21]अत्यन्तसम्फुल्लपुटा[22] विकृष्टा नासिका मता ।
कोपे हर्षे च कामे च बहलो[23]च्छ्वास इष्यते ॥ १०८८ ॥

---

१. A. त्तारा च उक्ता लोकेषु केकरा । २. D. त् विव्वोके । ३. D. या । ४. D. उधतामर्ष । ५. D. यो । ६. D. ता क्षामा क्षमांता तद्‌तारिका । ७. A. ताः । ८. A. पंगा । ९. A. omits the following two slokes । १०. D. ट्विं । ११. A. शा । १२. D. गा । १३. D. णा । १४. A त । १५. A. व साध्वसाव । १६. D. षट्विधा । १७. A. र्थं । १८. D. मता । १९. A. उच्छिद्यते । २०. D. स्यात् । २१. A. अन्यंत । २२. A. सिकृष्टो नाम नासिका । २३. A. छ्वा ।

Dr. Urmila Sharma Collection, Varanasi

सो[1]च्छ्वासा नाम नासा स्या[2]त्(न्) मनाक्(ग्) वक्रितसम्पुटा ।
घ्राणे सुरभिगन्धीनां दीर्घोच्छ्वा[3]से च युज्यते ॥ १०८९ ॥
[4]सङ्कोचितपुटा नासा नाम्ना सा स्याद्विवर्णिता(कूणिता) ।
वेदनायां च हासे च नियोक्तव्या नियोक्तृभिः ॥ १०९० ॥
विकाररहिता घो[5]णा [6]भवेत्स्वाभाविकी समा ।
उक्तादन्यत्र सर्वत्र प्रयोक्तव्या विचक्षणैः ॥ १०९१ ॥
क्षाम[7] उत्फुल्ल[8]पूर्णौ च कम्पितः कुञ्चितः समः ।
इति गण्डाः [9]षड्डुदिष्टास्तेषां वक्ष्यामि लक्षणम् ॥ १०९२ ॥
क्षामस्त्ववनतो ज्ञेयो दुःखेषु स नियुज्यते ।
[10]उत्फुल्लः स्यात्वि(द्वि)कसितः प्रहर्षे स तु युज्यते ॥ १०९३ ॥
पूर्णः समुन्नतो ज्ञेय[11] उत्साहे स[12] नियुज्यते ।
[13]स्फुरितः कम्पितो [14]गण्डो रोम[15]हर्षे [16]स युज्यते ॥ १०९४ ॥
सङ्कोचितः [17]कुञ्चितः [18]स्याच्छीतस्पर्शो[19] भये[20] ज्वरे ।
समः स्यात्प्रा[21]कृतो गण्ड उक्तादन्यत्र[22] युज्यते ॥ १०९५ ॥
मुकुलः [23]क(कू)णितोद्वृत्तौ [24]रेचितः कम्पितायतौ ।
[25]सन्दष्टश्च विकासी च प्र[26]सारितनिगूहितौ ॥ १०९६ ॥
इत्यष्टा[27] (त्योष्ठौ) दशधा प्रोक्तौ[28] नामतो लक्ष्म[29] वक्ष्यते ।
विनियोगस्तथा तेषां [30]नाट्याभिनयनं प्रति ॥ १०९७ ॥
निष्क्रा[31]न्तौ मिलितौ[32] [33]चोष्ठौ मुकुलौ परिकीर्तितौ ।
फूत्कृते चुम्बने [34]दुःखे विनियोगस्तयोर्मतः[35] ॥ १०९८ ॥

---

१. A. च्छ्वा । २. A. स्यान्मनागुत्फुल्लसंपुटा । घ्राणे सुरभिसं । ३. A. च्छ्वा । ४. A. drops this stanza । ५. D. drops this घोणा । ६. A. भा । ७. D मा । ८. A. ल्लसंपूर्णः । ९. D. ष‍्‌ड । १०. A. drops this line । ११. D. यो । १२. A. सं । १३. A. स्फरित । १४. D. गंडे । १५. A. षे । १६. D. स हि युज्यते । A. स योज्यते । १७. A. कुंचित कुंचितः । १८. D स्यात् शी । A. स्याच्छिद्म । १९. A. र्शे । २०. A. यो । D. वे ज्वरः । २१. A. त्प्र । २२. D. त्र स युज्यते । २३. D. क । २४. D. र । २५. A. सद्दष्टमश्च । D. सद्स । २६. D. कासि । २७. D. ष्ट । २८. A.D. क्ता । २९. D. द्यतोपिवा । ३०. D. माधा । ३१. A. ष्कांता । ३२. A. ता । ३३. D. ञ्च । ३४. D. वक्त्रे । ३५. D. adds the following here नानाभावप्रकारे च तथैव च विलासके । हावभावकलायां च प्रसिद्धसुखगायने ॥ हस्तयोर्लाघवं कुर्याद् येन प्रीणाति भूपतिः ॥

CC0. In Public Domain, Digitizagtion by eGangotri

मुकुलौ तिर्यगावृत्तौ चूणि(कूणि) तौ गदितौ बुधैः।
अमर्षे रोदने स्त्रीणां विनियु[1]क्तिस्तयोर्मता ॥ १०९९ ॥

अधरः[2] पीडितो य[3]स्तु नासासंलग्न उद्धृतः।
[4]औष्ठौ[5] यत्र च संलग्नौ सृक्(क्क) देशे[6] प्रसारितौ ॥ ११०० ॥

आयतौ तौ तु विज्ञेयौ विनियोगस्तथा स्मिते।
अधरो द्द(द)श्यते दन्तैः[7] सन्द[8]ष्टः स[9]प्रकीर्तितः ॥ ११०१ ॥

तस्याभिनयमिच्छन्ति कोपे मन्मथवे(चे)ष्टिते।
उर्ध्वपङ्क्तिस्थदन्तानां विकासी[10] दर्शनाद्[11] भवेत् ॥ ११०२ ॥

[12]प्रियसन्दर्शने हासे प्रयोग[13]स्तस्य वर्ण्य[14]ते।
अधरोष्ठौ[15] विनि[16]ष्क्रान्तः प्रसारित उदाहृतः ॥ ११०३ ॥

रतौ रागवि[17]लेपे च वदनं क्षतवीक्षणे[18]।
आकृष्टौ [19]द्वावपि मुखे कथितौ तौ निगूहितौ ॥ ११०४ ॥

शोके[20] दुःखे च कर्तव्यौ[21] प्रयोगनिपुणैरिमौ।
इत्यष्टौ[22] च(त्योष्ठौ) दशधा प्रोक्तौ[23] नामलक्ष्मप्रयोगतः ॥११०५॥

भूलोकमल्लदेवेन निर्जितारातिभूभुजा।
व्या[24]दीर्घा शिथिला वक्रा नानाभावसमन्विता ॥ ११०६ ॥

प्रचला[25] प्रस्फुरा चैव[26] लोला चेत्यष्टधा हनुः।
व्यादी[27]र्घाभ्य(त्य)र्थविवृता [28]जृम्भायां भाषणे वमौ ॥ ११०७ ॥

स्थूलवस्तुनिरासे[29] च हनुस्तज्ज्ञैः प्रयुज्यते।
एकाङ्गुलमधःस्रस्ता शिथिला हनुरुच्यते ॥ ११०८ ॥

निद्रायां भोजने श्रान्ते युज्यतेऽद्भुतदर्शने।
हनुस्तिर्यग्गता वक्रा ग्रहावेशे[30]ऽर्दिते(ता)भवेत् ॥ ११०९ ॥

---

१. A. य। २. A. रोत्पा। ३. A. या। ४. D. ओ। ५. A. drops this stanza। ६. D. शं च प्रसारितौ। ७. D. दंते। ८. D. संदष्टः। ९. D. परिकीर्तितः। १०. D. शं। ११. D. त्। १२. D. विप्र। १३. D. युक्त। १४. A. र्ण। १५. A. ष्ट। D. ष्टौ। १६ D. निः। १७. D. लये। १८ D. णैः। १९. A. द्ववपिकथितौ। २०. A. क। २१. D. व्यः। २२. D. ष्टा। २३. D. क्ता। २४. A. drops this line। २५. A. ल। २६. A. चेवं। २७. A. र्णाल्यर्थं। २८. A. जंभायां। २९. D. शे। ३०. D. शोदिते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संहता[1] मिलिता मौने हनुस्तम्भे च [2]युज्यते।
[3]चलिता [4]लगिता या च[5] हनुः स्याच्चलसंहता ॥ ११९० ॥

स्त्रीभोगे[6] कवले योज्या वृद्धताम्बूलचर्वणे।
मुहुर्विकाससंरोधा[7]त्प्रब(च)ला हनुरीरिता ॥ ११११ ॥

कोपे प्रयुज्यते जल्पे शष्कुल्यादेश्च चर्वणे।
द्रुतप्रचलिता किञ्चिद्धि[8]का[9]सा प्रस्फुरा[9] हनुः ॥ १११२ ॥

शीते शीतज्वरे तस्याः प्रयोगः कथितो बुधैः।
तिर्यक्प्रचलिता तज्ज्ञैर्लोला नामोच्यते बुधैः ॥ १११३ ॥

[10]रोमन्त्वे(न्थे) कवलावृत्तौ गण्डूषे च प्रयुज्यते।
[11]मर्दनाः खण्डनाश्चैव कर्त्तना[12] धारणास्तथा ॥ १११४ ॥

निष्कर्षणाश्च विज्ञेया [13]दन्ता(:) पञ्चविधा बुधैः।
मर्दना[14] दलनाद्दन्ताश्चणकादिषु भक्षणे ॥ १११५ ॥

ताम्बूले ते समायोज्या अपूपादिषु खादने।
[15]छेदनात्खण्डनाः प्रोक्ता दन्ता योज्या विशारदैः ॥ १११६ ॥

[16]वीटिकाच्छेदने चैव मध्ये[17] चार्द्रकभक्षणे।
दंष्ट्रानिपीड[18]नाद्दन्ताः कर्त्त[19]नास्तान् नियोजयेत् ॥ १११७ ॥

[20]इक्षुत्वगपसारे च नलकास्थिविचक्षणैः(दारणे)।
समदन्तक्रियायोगाद(द्)शनाः स्युर्निकर्षणाः ॥ १११८ ॥

स्वल्पोद्धारे दन्तधावे योज्या मर्कटरोधने।
ग्रहणाद्धा(द्धा)रणाः प्रोक्ता दन्ता योज्या विशारदैः ॥ १११९ ॥

भयादङ्गुलिदंशे च तृणादीनां च चर्वणे।
[21]ऋज्वी वक्रा नता लोला प्रोन्नता वे(चे)ति पञ्चधा ॥ ११२० ॥

---

१. D. स्ता। २. A. यो। ३. A. वलिता। D. चलिते। ४. गलिता। ५. A. श्च। ६. A. ग। ७. A धाप्र। ८. A. कोंश। ९. A. रत्तनुः। १०. A. drops this stanza। ११. A. दलना। १२. D. व्या। १३. A. दता। १४. A नाद्द। D. लाद। १५. A. छेदनाः प्रोक्ता दंता योज्या विशारदैः। १६. D. व। १७. D. द्ये। १८. D. डितादंता। १९. A. र्त्तना। D. र्तव्या। २०. A. drops these five lines। २१. A. स।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जिह्वा प्रोक्ता[१] प्रवक्ष्यामि तस्या लक्ष्म मयो[२]दितम्।
[३]निष्क्रान्तदीर्घात्स(न्तिदैर्घ्याद्द)ज्वी स्याद् जिह्वा सा च[४] प्रयुज्यते ॥ ११२१ ॥
जिह्वा निर्लेखने ले[५]हे श्वापदश्रमदर्शने।
सृक्कलेहा[६]भ(द्भ)वेद्व[७]क्रा जिह्वा तस्याः प्रयोजनम् ॥ ११२२ ॥
कोपस्याभिनये चैव तथा 'मृ(भृ)ष्टस्य भक्षणे।
नता जिह्वा समाख्याता बुधैश्चिबुकचुम्बिनी[९] ॥ ११२३ ॥
अधर[१०] क्षतसंस्पर्शे[११] योज्या [१२]न मुखदर्शने।
अन्तर्भा[१३]गे भवेल्लोला जिह्वा[१४] सा तु प्रयोज्यते ॥ ११२४ ॥
[१५]दोलने बालमश्वस्य जिह्वायाः [१६]पतने तथा।
प्रोन्नता कथिता जिह्वा नासिकाभिमुखी[१७] बुधैः ॥ ११२५ ॥
श्रमे शोषे[१८] भये[१९] चैव सा प्रयोज्या प्रयोक्त[२०](क्तृ)भिः।
सहजश्च प्रस[२१]न्न(सन्न)श्च रक्तः श्यामस्तथैव च ॥ ११२६ ॥
मुखरागो[२२]ऽत्र कथितश्चतुर्धाभिनयं प्रति।
सहजो निज[२३]वर्णः स्यात्प्रसन्नः कान्तिभूषितः ॥ ११२७ ॥
रक्तः कोकनदच्छायः श्यामो नी[२४]लघनच्छविः।
सहजो विनियोक्तव्यः स्वभावाभिनयं प्रति ॥ ११२८ ॥
[२५]भयानके च बीभत्से रागः श्याममुखो भवे[२६]त्।
शृङ्गारहास्ययोः कार्यः[२७] प्रसन्नस्त्वद्भुते तथा ॥ ११२९ ॥
वीरे रौद्रे च[२८] करुणे मदादौ रक्त इष्य[२८]ते।
[२९]उपाङ्गान्येवमुक्तानि नामलक्ष्मप्रयोजनैः[३०] ॥ ११३० ॥

---

१. D. तु। २. A. यागतम्। ३. D. निशांते दीर्घऋज्वीस्यात्। ४. A. ध्रुपु। ५. D. लो। ६. A. हो। ७. A. वक्राद्वजिव्हा। ८. D. ओष्टस्य। ९. A मी। १०. D. रं। ११. D. र्श। १२. D. तन्मु। १३. A. र्भाता। १४. A. व्हारसातुनियु। १५. A. लो। १६. A. पा। १७. A. खैं। १८. D. के। १९. A. थे। २०. D. क्तृ। २१. D. शांत। २२. A, गे। २३. A. ज्वर्णस्पा। २४. D. ना। २५. A. drops this line here and takes it after वीरेरौद्रेवकरुणेमदादारक्त इयानके च। २६. D. gives the line उपांगान्येत्रमुक्तानि after this line। २७. A. यं। २८. A. यानके। २९. D. takes this line two lines above। ३०. D. ने।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]प्रत्यङ्गानि निरूप्यन्ते विस्तरेण मयाऽधुना ।
सरलः प्रोन्नतो न्यञ्चः[2] कुञ्चितो ललितस्तथा ॥ ११३१ ॥

लोलितोच[3]लितो बाहुः परावृत्तस्तथाष्टमः ।
पुरतः पा[4]र्श्वतो वाऽपि सरळः[5](लः) स्यात्प्रसारितः ॥ ११३२ ॥

पक्षानु[6]करणे माने स्पन्दनालिङ्गने भवेत् ।
ऊर्ध्वं[7] च प्रेरितो बाहुः प्रोन्नतः [8]सोङ्गमोट(ट्ट)ने ॥ ११३३ ॥

फलाद्याकर्षणे [9]चोर्ध्वं(र्ध्वे) वस्तूनां धारणे भवेत् ।
अधः प्रसारितो [10]न्यञ्चो बाहुः स्याद्भूमिवेधने ॥ ११३४ ॥

[11]श्रमे दुःखे मदे मोहे स्तम्भे च विनियुज्यते ।
[12]कुञ्चितः कम्पितो बाहुर्नामित[13]स्तीक्ष्णकूर्परः[14] ॥ ११३५ ॥

शस्त्रादिधा[15]रणे योज्यो प्रहारे [16]पानयो(भो)जने ।
ईषन्नि[17]म्नस्तु ललितः[18] स स्यान्मालादिधारणे ॥ ११३६ ॥

स्तवने याचने तोय[19]प्लवने च नियुज्यते ।
आन्दोलितो लोलितः स्यात्संयोज्यो बालरोदने ॥ ११३७ ॥

नृत्तवृश्चिकवं(दं)शे च नवनी[20]तावकर्षणे[21] ।
भ्रमितः कूर्परोद्देशे [22]चलितः [23]कर इष्यते ॥ ११३८ ॥

[24]खड्गादिभ्रामणे योज्यो[25] वृत्त(न्त)हस्तस्य मोचने ।
पश्चात्सारी[26] परावृत्तो बाणा[27]कर्षणकर्मणि ॥ ११३९ ॥

चूडिकाबन्धने योज्यो [28]वीटिकाग्रहणे तथा ।
आकुञ्चितो निकु[29]म्ब(ञ्च)श्च भ्रमितश्च सम[30]स्तथा ॥ ११४० ॥

---

१. D. त्येकंच । २. D. श्च । ३. A. च । ४. A. र्वं । ५. A. drops this लः । ६. D. तु । ७. A. र्ध्वप्रसारितो । ८. A. संग । ९. D. चारु । १०. D. वंधोनामितरतीक्ष्णकूर्परे । ११. D. drops this stanza । १२. A. कुंचि:त । १३. तःस्तीक्ष्ण । १४. D. रे । १५. D. ह्र । १६. A. ण । १७. A. म्नः स्तु ! १८. D. तं । १९. D. यं । २०. D. तस्यचर्वं । २१. A. र्ण । २२. A. च । २३. D. स्तु तथा परः । २४. A. ष । २५. D. ज्या । २६. D. रि । २७. A. ण । २८. D. वि । २९. D. कुंबि । ३०. D. ग ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुर्धा [1]मणिबन्धोऽथ[2] नामतः कथितो मया ।
[3]आकुचि(कुञ्चि)तो बहिर्वक्रः सोऽपसारे[4] नियुज्यते ॥ ११४१ ॥

[5]भ्रामणे भ्रमण (:) प्रोक्तः खड्गादेश्चारणे भवेत् ।
स्थूलश्चेत्सम(त्स समः) प्रोक्तो योज्यः पुस्तकधारणे ॥ ११४२ ॥

[6]बाहुश्च मणिबन्धश्च[7] प्रोक्तो लक्षणसंयुतः ।
असं[8]हतान्संहतांश्च नृत्तहस्तान्वदाम्यहम् ॥ ११४३ ॥

पता[9]का हंसपक्ष[10]श्च चतुरोऽहिफण[11]स्तथा ।
अर्धचन्द्रो मृगशिरास्त्रिपताकस्त[12]थैव च ॥ ११४४ ॥

कर्तरीमुखनामा च[13] पद्मकोशो[14]ह्यरालकः ।
शुकतुण्डकला[15](का)ङ्गूला(लौ)[16] लप्न(चाल)पद्मोर्णुनाभकैः
(कौ) ॥ ११४५ ॥

मुकुलो हंस[17]चक्रश्च भ्रमरः स्यात्करोऽपरः ।
[18]सन्दंशस्ताम्रचूडश्च मुष्टिः[19] शिखर एव च ॥ ११४६ ॥

कपित्थः[20] खटिकाचक्रः सूचीमुखसमाह्वयः ।
असंहताः[21] कराः प्रोक्ता[22]श्चतु[23]र्विंशतिसङ्ख्यया ॥ ११४७ ॥

अञ्जलिश्च कपोत[24]श्च कर्कटस्वस्तिकाव[25]पि ।
खटकावर्धमानश्च उत्सङ्गो नि[26]षधस्तथा ॥ ११४८ ॥

दो[27]ल(:) पुष्पपुटश्चैव तथा मकर एव च ।
गजदन्तावहित्थश्च (त्थौ च) वर्धमानस्तथैव च ॥ ११४९ ॥

इत्येते संहता हस्ता मया प्रोक्तास्त्रयोदश[28] ।
नृत्त[29]हस्तान् प्रवक्ष्यामि नामतः सप्तविंशतिः ॥ ११५० ॥

---

१. A. व । २. D. त्था । ३. D. आकृतो वहिवक्रश्च । ४. D. रैर्नि । ५. A. drpos this and up to श्चेत् समः प्रोक्तो of the next line । ६. D. वहु । ७. A. श्चं । ८. D. संगतान् संगतांश्च । ९. D. त । १०. A. क्षं । ११. A. णा । १२. A. का । १३. A. य । १४. D. सो । १५. A. लांगुल्यः । १६. A. वलपद्मोर्णनाभके । १७. D. व । १८. D. सदंश । १९. A. ष्टि । २०. D. त्थकटिका । २१. A. स्तः । २२. A. क्ताः च । २३. D. विं । २४. A. ति । २५. D. अ । २६. D. नै । २७. D. दा । २८. A. शां । २९. A. त्य ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुरस्रौ[1] तथो[2]द्वृत्तो (त्तौ) तथा तलमुखौ स्मृतौ ।
स्वस्तिकौ विप्रकी[3]र्णौ वा[4]प्यरालखटकामुखौ ॥ ११५१ ॥
आविद्धवक्रौ (क्त्रौ) सूच्यास्यौ रेचितावर्धरेचितौ ।
उत्ता[5]ना(न)वञ्चितौ [6]वापि पल्लवौ[7] च तथा करौ[8] ॥ ११५२ ॥
नितम्बौ[9] चापि विज्ञेयौ केशबन्धौ लताभिधौ ।
करिहस्तौ च विख्यातौ पक्षवञ्चितकौ[10] करौ ॥ ११५३ ॥
पक्ष[11]प्रद्योतक[12]श्चै(कौ चै)व तथा गरुडपक्षकौ ।
दण्डपक्षौ समाख्यातौ[13] ऊ(तावू)र्ध्वमण्डलिनौ तथा ॥ ११५४ ॥
पार्श्वमण्डलिनौ वापि वक्षोमण्डलिनौ तथा ।
तथा[14] करौ परौ प्रोक्तावुरःपार्श्वा[15]र्द्धमण्डलौ ॥ ११५५ ॥
स्वस्तिकौ [16]चापि नलिनीस[17]दृशौ पद्मकोशकौ ।
अल्ल[18]पल्लवधुन्वानौ नृत्तहस्ता इति स्मृताः ॥ ११५६ ॥
अ[19]संहता युग्महस्ता नृत्तहस्ता[20] त(स्त)थैव च ।
चतुःषष्टिकराः[21] प्रोक्ता नाट्यस्याभिनयं प्रति ॥ ११५७ ॥
संहता[22] ऋजवोऽङ्गुल्यस्तर्जनीमूलसंस्थितिः ।
अङ्गुष्ठो[23] यस्य न(च) ग्राह्यः[24] स पताकः करो मतः ॥ ११५८ ॥
छे[25]दाभिनयने गर्वे भुजास्फाले प्रहर्षणे ।
लताभिघाते कर्तव्यः पताकः संहताङ्गुलिः ॥ ११५९ ॥
केशानां [26]विचये चैव नोदने वह्निपा[27]तने ।
क्रि[28]यतेऽभयदाने च पताको विरलाङ्गुलिः ॥ ११६० ॥
[29]तडि(कटि)कम्पे निषेधे च स्यादूर्ध्व चल (र्ध्वश्चलि) ताङ्गुलि(:)
वृषे (वर्षे) च पुष्पवृत्तौ (ष्टौ) च कर्तव्योऽसावधोमुखः ॥११६१॥

---

१. A. स्रो । २. A. तो हस्तो । ३. D. क । ४ A. च प । ५. A. त्तना । ६. A. नौं । ७. A. वे । ८. A. रे । ९. A. तवे । १०. A. को वरौ । ११. A. प्रा D. प । १२. A. कोवे-तथा गरुड । १३. A. तैधूर्त । १४. A. पारौ करौ । १५. A. श्वं । १६. D. वा । १७. D. कथितौ । १८. D. लप्रत्वल । १९. A. स । २०. A. स्तथैवर्त च । २१. A. रा । २२. A. तात्सजवोगुल्यस्त D. ताऋजवाग्वल्य तर्ज । २३. A. ष्टो । २४. A. ह्यं । २५. A. दन्निन्न । २६. A. निचयो । २७. A. तापने । २८. D. याकर्ताभिदाने । २९. D. drops this line ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पताकस्यैव हस्तस्य यदोर्ध्वा स्यात्कनीयसी ।
हंसपक्षस्त[1]दाख्यातः प्रयोगस्तस्य कथ्यते ॥ ११६२ ॥
मुखरागविले[2]पे च कुन्तला(ल)स्यो[3]र्ध्वसंयमे ।
प्रतिग्रहा[4]दौ कर्तव्यो[5] हंस[6]पक्षो मनीषिभिः ॥ ११६३ ॥
अस्यैव हंसपक्षस्य मध्यमाङ्गुलिमूलगः[7] ।
अङ्गुष्ठ[8]श्चेत्कुञ्चितः स्यात्तदाऽसौ चतुरः करः ॥ ११६४ ॥
श्रोत्रियाभिनये स्वल्पे सन्देहे वेदभाषणे ।
हस्तोऽयं विनियोक्तव्य[9]श्चतुरश्चतुरैर्जनैः ॥ ११६५ ॥
पता[10]क[11]स्तु यदा[12] हस्तो भवेन्निम्नतलोदरः ।
विज्ञेयोऽहिफणा[13](णो) नाम कर्म चास्य [14]प्रचक्ष्यते ॥ ११६६ ॥
से[15]चने जलपा(दा)ने च प्रोक्ता[16]नो(नः) पावनो भवेत् ।
अधोमुखः स्यादास्फाले कुब्जादीनां प्रदर्शने ॥ ११६७ ॥
अभये सान्त्वने चैव सर्पयानप्रदर्शने ।
[17]ऊर्ध्वश्चाहिफणः कार्यो हस्तलक्षणकोविदैः ॥ ११६८ ॥
अहि[18]वक्त्रे यदाङ्गुष्ठो विवृतः स्यात्तदा भवेत् ।
अर्धचन्द्राभिधो हस्तो त[19]न्नियोगे(गो) निगद्यते ॥ ११६९ ॥
सम्मार्जने लोड[20]ने च नितम्बालम्बने तथा ।
अधोमुखस्तु कर्तव्यः शशि[21]लेखाकरो[22] बुधैः ॥ ११७० ॥
विस्मये वर्णने चैव चन्द्राभिनयसू[23]चने ।
अयमुत्तानितः[24] कार्य ऊर्ध्वश्चासो[25]र्ध्वसंज्ञिकः
(ऊर्ध्वश्चेदूर्ध्वसंज्ञकः) ॥ ११७१ ॥
सर्पशीर्षस्य हस्तस्य कनिष्ठाङ्गुष्ठकं तथा ।
[26]भवेदुन्नतसंस्थानं तदा मृगशिराः[27] करः ॥ ११७२ ॥

---

१. A. व । २. A. लो । ३. D. स्यार्ध । ४. A. ह । ५. A. व्यौ । ६. A. सक्षौमं मनिषिभिः । ७. A. यः । ८. A. ष्ठाः कुंचितश्चेत्स्यात्तदासौ । ९. A. व्यश्चतुरैर्जनैः । १०. D. ला । ११. A. का । १२. D. वाहस्ते । १३. A. णे । १४. A. पवक्ष्यते D. प्रचक्षते । १५. D. सवने । १६. A. क्तोमोयार्चनो । १७. D. उर्द्ध । १८. A. च । १९. A. न्न । २०. D. ट । २१. D. सलिलेभ्या । २२. A. रे । २३. A. चितो । २४. D. कं कार्यम् । २५. A. स्यो D. सोर्द्ध । २६. A. भा । २७. A. रः ।

Dr. Urmila Sharma Collection, Varanasi

स्वेदाप[1]नयना[2]ह्वाने सम्मुखातपवीक्षणे ।
अधोमुख(मृग)शिराः कार्य उत्तानस्त[3]प(स्त्व)क्षपातने ॥ ११७३ ॥
पादालक्तकर[4]जने(रागेण)लेख[5]ने स्यादधोमुखः ।
अङ्गुष्ठे[6]न सहाङ्गुल्यो विरला[7]कुञ्चितग्रहाः ॥ ११७४ ॥
[8]पद्मकोशः स विज्ञेय उन्मुखे(खो)ऽधोमुखोऽपि वा ।
कपित्थबिल्वग्रहणे बालानां हस्तदर्शने ॥ ११७५ ॥
मुखम्लानौ च योक्तव्यः पद्मकोश[9]ः करो बुधैः ।
[10]पद्मकोशस्य हस्तस्य तर्जनी प्रसृता यदि ॥ ११७६ ॥
अरालो नाम हस्तोऽयं तदा ज्ञेयो मनीषिभिः ।
आशीर्वादे वर्णने च [11]छत्राङ्कुशविधारणे ॥ ११७७ ॥
अद्भुतालोकने[12]वायमरालः परिकल्प्यते ।
अना[13]मा च यदा वक्रा स्यादरालकरे [14]तदा ॥ ११७८ ॥
शुकतुण्डो भवेद्धस्तः क्रिया तस्य प्रवक्ष्य[15]ते ।
नास्तीति वचने द्यूते[16] कपर्दकनिपातने ॥ ११७९ ॥
अव[17]ज्ञायां तिरस्कारे शुकतु[18]ण्डो विधीयते ।
अङ्गुष्ठतर्जनीमध्या [19]भिन्नास्ते[20] तमवस्तिता (त्रेतामवस्थिताः) ११८० ॥
वक्रानामा च ला(का)ङ्गूले योज्या चो[21]र्ध्वा कनीयसी ।
[22]फलप्रमाणे च तथा तथान्येषु लघुष्वपि ॥ ११८१ ॥
ला(का)ङ्गूलो[23] योज्यते हस्तो बालानां चिबुकग्रहे ।
पार्श्वागता विकीर्णाश्च[24] तलमध्यमुपागताः[25] ॥ ११८२ ॥
आवृ[26]त्तमध्याङ्गुलयस्तदा स्यादलपद्मकः ।
आत्मस्तुतौ निषेधे च [27]कस्य त्वमिति भाषणे ॥ ११८३ ॥

---

१. A. य । २. D. दा । ३. D. स्वक्ष । ४. A. चरने । ५. D. खान । ६. A. ष्टे । ७. A. लानांहस्तदर्शने । ८. A. drops these two lines । ९. A. श । १०. A. drops these two lines । ११. D. वंशांकुशव । १२. D. च्छाया । १३. D. निमाम । A. नामाव । १४. A. य । १५. A D. क्ष । १६. A. तकपर्दक पर्दकनिपातने । १७. A. वि । १८. A. तुंडो । १९. A. ह्नि । २०. D. तमिवस्थिता । २१. A. चोध्वा । D. वर्धा । २२. फलप्रमाणे तथान्येषु. .थुष्वपि । २३. D. ले । २४. D. चअंतर्म । २५. D. ता । २६. D. आवर्त । २७. D. कश्मलस्यच ।

CC0. In Public Domain, Digitizagtion by eGangotri

शून्योक्तौ तु[1] नियोज्यः स्यादलपद्मो मनीषीभि ।
पद्मकोशस्य [2]हस्तस्य यदाङ्गुल्यः प्रकुञ्चिताः ॥ ११८४ ॥

अङ्गुष्ठ[3]स्य(श्च) तदा तज्ज्ञैरू[4]र्णनाभः करः स्मृतः ।
[5]आदाने च सुवर्णादेः सिंहव्याघ्रनिरूपणे ॥ ११८५ ॥

शिरःकण्डूयने चैवमु(मू)र्णनाभः प्रकीर्तितः ।
अङ्गुष्ठ[6]स्य यदाङ्गुल्यश्चाग्रभागेन सङ्गताः ॥ ११८६ ॥

कदलीपुष्पसङ्काशा[7]स्तदासौ मुकुलः करः ।
सुवर्णगणने तिर्यगूर्ध्वो मुकुलदर्शने ॥ ११८७ ॥

देवपूजोपहारे च योज्योऽधो मुकु[8]लः करः ।
मुकुलं(ले)तु यदा मुक्तो(क्ता) भवेदूर्ध्वा कनीयसी ॥ ११८८ ॥

अनामा च तथा वक्रा हस्तो[9] हंसमुखस्तदा ।
श्लक्ष्णाल्पमृदुसंज्ञायां [10]प्रस्फुरः क्रियते बुधैः ॥ ११८९ ॥

पुष्पाघ्रा[11]णे स्थिरः स स्या[12]द्धंश(हंस)वक्त्राभिधः करः ।
मुकुलस्य यदानामा कनिष्ठा च प्रसारिता ॥ ११९० ॥

ऊर्ध्वा प्रदेशिनी वक्रा तदाऽसौ भ्रमरः करः ।
[13](ग्रहणे दीर्घनालानां पुष्पाणामयमिष्यते ॥ ११९१ ॥

कर्णपूरे तालपत्रे कण्टकोद्धरणादिषु) ।
अरालाङ्गुष्ठतर्जन्यौ लग्नाग्रे निम्नतां गतः ॥ ११९२ ॥

किञ्चिच्चेत्तलमध्यः स्यात्तदा सन्दंश उच्यते ।
स त्रेधा स्यादग्रजश्च मुखजः पार्श्वजः क्रमात् ॥ ११९३ ॥

प्राङ्मुखः सम्मुखः पार्श्वमुख इत्यस्य लक्षणम् ।
कण्टकोद्धरणे सूक्ष्मकुसुमावचयादिषु ॥ ११९४ ॥

---

१. D. तु । २. A. drops this हस्तस्य । ३. A. ष्ट । ४. A. सूर्पा । ५. A. drops this stanza । ६. A. ष्ठेन । ७. A. श । ८. A. क । ९. D. स्ते । १०. D. सस्फर । ११. D. ग्रेण स्थितः । १२. A. द्धंसः स्याद्धंसवक्त्राभिधः करः । १३. Taken from संगीत रत्नाकर as the portion is missing here.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रयोक्तव्योऽग्रसन्दंशो धिगित्युक्तौ तु रोषतः, ।
मृजायां यज्ञसूत्रस्य कर्पूराद्यवचूर्णने ॥ ११९५ ॥

[1]वीटिकाग्रहणे योज्यः[2] पार्श्वसन्दंश[3]कः करः ।
अलङ्ख्ये (आलेख्ये) भ्रूविनिर्माण(णे) मणौ गुणनिवेशने
॥ ११९६ ॥

रञ्जने ने[4]त्रयोर्वर्त्यां मुखसन्दंशकः करः ।
मुकु[5]लस्य यदा चोर्ध्वा कुञ्चिताग्रा प्रदेशिनी ॥ ११९७ ॥

तलेऽनामा कनिष्ठा[6] च ताम्रचूडः करो भवेत् ।
[7]बालविश्वासने शैघ्र्ये छोटिकाकरणे रणे ॥ ११९८ ॥

जृम्भणे च तथा राज्ञां ता(म्र) चूड (:) करो भवेत् ।
तलमध्यस्थिताः सर्वास्त्वङ्गुल्योऽङ्गुष्ठपीडिताः ॥ ११९९ ॥

अङ्गुल्योङ्गुष्ठ[8]गर्भा वा हस्तोऽसौ मुष्टिरिष्यते ।
[9]धावने च प्रहारे च खड्गचापविधारणे ॥ १२०० ॥

अङ्गुष्ठपीडितो मुष्टिः कर्तव्यो नाट्यवेदिभिः ।
दोहने मल्लयुद्धे च पार्श्वभागप्रताडने ॥ १२०१ ॥

मुष्टिरङ्गुष्ठगर्भः स्याद् द्विधैवं मुष्टिरीरिता ।
मुष्टिहस्ते यदाङ्गुष्ठ[10] [11]ऊर्ध्वश्च रु(ऋ)जुतां गतः ॥ १२०२ ॥

शिखरो नाम हस्तोऽयं तस्य वच्मि प्रयोजनम् ।
[12]घटा(ण्टा)नादेऽङ्गसंवाहे शक्तितोमरमोक्षणे ॥ १२०३ ॥

रश्मिवल्गाविदा(धा)रे च प्रयोज्यः शिखरः करः ।
शिखराख्य[13]स्य हस्तस्य तर्जन्यङ्गुष्ठ[14]पीडिता ॥ १२०४ ॥

बहिर्गता च वक्रा च कपित्थाख्य[15]स्तदा करः ।
घटते चि (चे)तिवाक्ये च तथा चक्रस्य मोक्षणे ॥ १२०५ ॥

---

१. D. वेष्टिका । २. D. ज्या । ३. A. श. करः । ४. A. नर्ध्वों । ५. A. कलस्ययदावो । ६. A. ष्टा । ७. D. drops this stanga । ८. A. ष्ठ । ९. D. वने चैव । १०. A. ष्ट । D. ष्ठं । ११. A. ऊर्ध्वश्चजु D. उर्ध्वश्चरु । १२. A. घंडावादें । १३. A. क्ष । १४. A. ष्टा । १५. A. ख्यं करं न्यसेत् and drops the following two lines ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्त्रमुद्राप्रयोगे च कपित्थाख्यं करं न्यसेत् ॥ ।
अनामा[1] च कनिष्ठा च वक्रा[2]चोत्क्षेपसंयुता ॥ १२०६ ॥

अस्यैव [3]तु कपित्थस्य तदाऽसौ खटि[4]कामुखः ।
छत्रचामरकुन्तानां धारणे दर्पणस्य च ॥ १२०७ ॥

केशपाशग्र[5]हे चैव योज्यते खटिकामुखः ।
मुष्टिहस्ते यदा चैका तर्जनी[6]निर्गता भवेत् ॥ १२०८ ॥

तदा सूचीमुखो हस्तो वक्रक[7]म्प(म्प्र)प्रसारितः ।
प्रयोगे व(श)स्त्र[8]वस्तूनां रोद[9](ध)ने वक्र इष्यते ॥ १२०९ ॥

सूच[10]ने तर्जने कार्यः[11] सूचिहस्तः प्रसारितः ।
कर्णकण्डूयने चैव [12]चक्रस्य भ्रामणे तथा ॥ १२१० ॥

साधुवादे च[13] झम्पायां [14]कम्प्रः(म्प्रः) सूचीमुखः करः ।
अङ्गुष्ठः करशाखाश्च करभाङ्गुष्ठ[15]मूलके ॥ १२११ ॥

संश्लिष्य यदि तिष्ठ[16]न्ति सर्पशीर्षकरद्वये ।
तदासावञ्जलिर्नाम करः[17] प्रोक्तो मनीषिभिः ॥ १२१२ ॥

देवतानां गुरूणां च प्रणामे विनियुज्यते ।
[18]पताकौ तु यदा हस्तौ सन्मुखौ तलसङ्गतौ ॥ १२१३ ॥

अङ्गुल्यस्तु[19]तदा लग्नाः[20] स कपोतः[21] करः[22] स्मृतः ।
[23]स्वामिविज्ञापने(ना)शीलो(ले) विनये विनियुज्यते ॥ १२१४ ॥

[24]हर्षणे [25]क्रु(वृ)द्धवाक्येषु ख(खि)दिराङ्गुलिमोक्षणे[26](ट्टने) ।
अङ्गुल्यः स्थ(ल्यस्त)लमध्ये वा [27]बहिर्वान्तरमिश्रिताः ॥ १२१५॥

कर्कटाख्यः स विज्ञेयश्चि[28]न्तायामन्तराङ्गुलिः ।
निद्रापगमजृम्भायां वाद्यशङ्खविधारणे ॥ १२१६ ॥

---

१. A.मिका । २. D. क्त्रा च्चेधो । ३. A. च । ४. A. ट । ५. A. गृ । ६. A. नीर्ग । ७. A. कंपः । ८. A. सु । ९. A. ड । १०. A. चि तं । ११ D. यें । १२. A. वस्यभ्रा । १३. A. वसंपा । १४. D. कपः । १५. A. ष्ट । १६. A. ष्ट । १७. A. र । १८. D. तारकौ । १९. D. श्च । २०. A. ग्नाज्ञाः । २१. D. त । २२. A. रस्मृता । २३. A. पतेमित्तौ विनये विनियुज्यते । २४. A. घ । २५. A. क्रु । २६ A. णात् अंगुल्यस्थ । २७. A. व । २८. A. श्चितामतरांगुलिः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आश्चर्ये[1] च नियोक्तव्यः कर्कटो बहिरङ्गुलि[2] (:)।
मणिबन्धे समाश्लिष्टावरालावू[3]र्ध्वतोमुखौ ॥ १२१७ ॥

हस्तः स्वस्तिकनामा स्याद्विनियोगोऽस्य वक्ष्यते ।
[4]स्वरादि[5]त्सो (सू)चनं व्योम तुङ्गं वि[6]स्तारि वस्तु[7]यत् ॥ १२१८ ॥

स्वस्तिकस्य तु विश्लेषात्त[8]त्सर्वमभिधीयते ।
खटकावदनौ[9] पाणी[10]सम्मुखौ चेत्परस्परम् ॥ १२१९ ॥

तदासौ कविभिः[11]प्रोक्तः खटकावर्धमानकः ।
नेपथ्यरचनायां तु[12] पुष्पाणां[13] ग्रथनेऽपि च ॥ १२२० ॥

सत्यवाक्ये प्रयोज्योऽसौ खटकावर्धमानकः ।
सर्पशीर्षौ[14] यदा हस्तौ[15] स्वस्तिकाकारसंस्थितौ ॥ १२२१ ॥

परिवृत्त[16]भुजे सक्तावु[17]त्सङ्गः स्यात्तदा करः ।
परिष्व[18]ङ्गे च कोपे च शी[19]ताभिनयनेऽपि च ॥ १२२२ ॥

व्रीडायां च तथा स्त्रीणा[20]मुत्स[21]ङ्गो विनियुज्यते ।
कपित्थेन यदा हस्तो[22](च हस्तेन) वेष्ट्यते मुकुलः करः ॥ १२२३ ॥

विज्ञेयो निष[23]धो नाम हस्तलक्षणपारगैः ।
सङ्ग्रहे च परिच्छेदे समये सत्यभाषणे ॥ १२२४ ॥

निष्पी[24]डिते नियोक्तव्यो[25] निष[26]धो ना[27]ट्यवेदिभिः ।
सरलौ[28] शिथिलांसौ च[29] पताकौ[30] लम्बितौ करौ ॥ १२२५ ॥

भवेतां यत्र विज्ञेयः स करो दो[31]लसंज्ञकः[32] ।
श्रमो वि[33]षादो मूर्च्छा[34] च म[35]दो दुःखं भयं तथा ॥ १२२६ ॥

---

१. A. यैं। २ D. ली। ३. A. ऊ D. क्रुद्ध। ४. D. ख। ५. D. दि शो। ६. A. सा। ७. A. यत् स्त्ररादित्सोचनं व्योम त्रुंग विसारिवस्तुयत्। ८. A. त त्स D. त्सर्वंतदा। ९. D. नो। १०. A.D. समु। ११. A. भि। १२. D. च। १३. D. णाग्रं। १४. D. र्षों। १५. D. स्तो। १६. A. त्य D. त्तानुजेशक्ता। १७. A. बुत्संग स्यात्। १८. A. ष्वंगें। १९. D. सि। २०. A. वीडायां णा उ D. णां उ। २१. D. त्संगे युज्यते सदा। २२. A. स्तौं। २३. A. षि। २४. A. प्पी। २५. A. व्यौं। २६. A. षे। २७. A. म। २८. D. लः। २९. A. व। ३० A. का। ३१. A. द ल। ३२. A. क। ३३. D. श्वासदोर्मू। ३४. A.D. च्छा। ३५. D. मंदो।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]एवमादिषु योक्तव्यः करो दोलाभिदो बुधैः।
सर्पशीर्षौ[2] यदा हस्तौ[3] कनिष्ठा[4]पार्श्वसङ्गतौ ॥ १२२७ ॥

तदा पुष्प[5]वटो नाम करः प्रोक्तो विचक्षणैः।
पुष्पधान्यजलादीना[6]मादाने याचनेऽपि च ॥ १२२८ ॥

देवतातर्पणे चैव योज्यः[7] पुष्पवटः करः।
मणिबन्धाग्रसंलग्नौ पताकौ भिन्नसम्मुखौ ॥ १२२९ ॥

स करो मकरो नाम रणे स्त्रीणां(?) [8]प्रयोजयेत्।
स एव मकरो हस्तः प्रोन्नतो विरला[9]ङ्गुलिः ॥ १२३० ॥

व्याकोशपद्माभिनये विन(नि)यो[10]गार्हतां व्रजेत्।
स एव मकरो हस्तो विश्लिष्टस्तिर्यगास्थितः ॥ १२३१ ॥

शिशुप्रणामाभिनये योज्यः[11] [12]खर्वे च वस्तुनि।
[13]पार्श्वभागे च संलग्नौ समाकुञ्चितकूर्परौ ॥ १२३२ ॥

सर्पशीर्षौ[14] करौ यस्य स भवे[15]द्गजदन्तकः।
[16]यानावतरणे स्त्रीणां शिशूनां ग्रहणे तथा ॥ १२३३ ॥

शिलो[17]त्पाटे च कर्त[18]व्यः करोऽयं गजदन्तकः।
शुकतुण्डौ यदा हस्तौ वक्षस्याभिमुखस्थितौ ॥ १२३४ ॥

शनैरधोमुखं[19] नीतावबहित्थ[20]स्तदा करः।
[21]तनोस्तनुत्वे रामायां सोत्कण्ठस्य निरूपणे ॥ १२३५ ॥

अवहित्थो नियोक्तव्यः करः करणकोविदैः।
मृगशीर्षौ[22] परा (गू) व[23]क्त्रो(क्त्रौ)वर्धमानो निगद्यते ॥ १२३६ ॥

[24]द्वारवातायनादीनामुद्घाटे विनियुज्यते।
युग्महस्ता मया प्रोक्ता नामलक्ष्मप्रयोगतः[25] ॥ १२३७ ॥

---

१. A. प। २. D. र्षों। ३. D, रतः। ४. A. ष्टा। ५. D. चयो। ६. D. नां आ। ७. A. ल्पः। ८. A. वियोजितः। ९. A जांगुलि। १०. D. ये गर्हतां व्रजेत्। ११. D. ज्याः। १२. D. सर्वे च। १३. A. प। १४. D. र्षः करो। १५. A. व D. वेत् ग। १६. A. यो। १७. A. जोत्पादे। १८. A. र्त्त। १९. A. रवीनीना। २०. A. छः स्त। D. त्छ। २१. A. नास्तनुचेदद्दारे। २२. D. र्षौ। २३. A. क्रो। २४. A. द्वौरवातनयाहीना। २५. A. drops this तः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नृत्त[1]हस्तान् प्रवक्ष्यामि यथावदनुपूर्वशः।
[2]अष्टाङ्गुलान्तरौ[3] यौ तु वक्षसः खटकामुखौ ॥ १२३८ ॥

स[4]मांसकूर्परौ हस्तौ चतुरस्रौ [5]पराङ्मुखौ।
हंसपक्षौ यदा हस्तौ [6]व्यावृत्तौ तालवृन्तवान्(वत्) ॥ १२३९ ॥

[7]उद्वृत्तावितिति विज्ञेयौ वक्षसः पुरतः स्थितौ।
उरसः पुरतो हस्तौ तिर्यगुत्ता[8]नसम्मुखौ ॥ १२४० ॥

हंसपक्षा[9]वधो वक्रौ [10]ज्ञेयौ तलमुखाविति।
मणिबन्धे च संश्लिष्टौ हंसपक्षौ [11]यदा करौ ॥ १२४१ ॥

उदग्रौ[12]नीचवक्त्रौ[13] वा स्वस्तिकावि[14]ति संज्ञितौ[15]।
स्तनाभ्यां पुरतो न्यस्तौ हंसपक्षौ पराङ्मुखौ ॥ १२४२ ॥

(नीचाग्रावुन्नताग्रौ वा विप्रकीर्णाविति स्मृतौ)।
उरसः पुरतो न्यस्तः[16] खटकास्य[17](:) पराङ्मुखः ॥ १२४३ ॥

किञ्चित्प्रसारितस्तिर्यगरालः प्रोन्नताननः।
सं(स्व)स्थानप्रत्यये[18]नैतौ प्रयोज्यौ तालमानतः ॥ १२४४ ॥

वामदक्षिणतः स्यातामरालखटकामुखौ।
[19]स्वस्थाने वा स्थितावेतौ [20]व्यत्ययेन प्रयोजितौ ॥ १२४५ ॥

तथापि नामतो ज्ञेया[21]वरालखटकामुखौ।
कूर्परां[22]साश्रवा(ग्रबा)हा[23]भिरराली चलितौ यदि[24] ॥ १२४६ ॥

अधोमुखं च विन्यस्तौ स्यातामाविद्धवक्र(क्त्र)कौ।
चतुरावेव हस्तौ तु यदा [25]तिर्यक् प्रसारितौ ॥ १२४७ ॥

---

१. D. त्य। २. D. takes this stanza after this। ३. A. रौतुव। ४. D. पां। ५. A. drops this पराङ्मुखौ। ६. A- व्यावृत्तवान्। ७. A. उद्वर्ताविति। ८. A. ता। ९. A क्षवक्रौ। १०. A. जे। ११. A. व्य। १२. A. ग्रो। १३. A. वक्रो। १४. A. चि। १५. A. तो। १६. D. स्तौ। १७. A.D. स्प। १८. A. योनतो। १९. A. स्वं। २०. A. वित। २१. D. यौ अ। २२. A. रशाश्र। २३. A. हापभि। २४. A. दा। २५. A. नि।

Dr. Urmila Sharma Collection, Varanasi

[1]सूच्यास्याविति विज्ञेयौ किञ्चित्कुञ्चित[2]कूर्परौ ।
हंसपक्षौ यदा हस्तौ [3]द्रुताव[4]तंस[5]मन्वितौ ॥ १२४८ ॥

रेचिताविति विख्यातौ पार्श्व[6]भागप्रसारितौ ।
एकतो[7] रेचितस्त्वेवं[8] चतु[9]रस्रोऽन्यतः स्थितः ॥ १२४९ ॥

खट[10]कास्यौ[11] यदा वृत्तौ[12] भवेतामर्धरेचितौ ।
[13]न्यञ्चितौ कूर्परांसौ तु [14]तिर्यग्भागविनिः[15]सृतौ ॥ १२५० ॥

नृ(त्रि)पताकौ करौ नृत्ये स्यातामुत्तानवञ्चितौ ।
तिर्यग्वा [16]पुरतो वापि प्रोन्नतौ[17] नमि[18]तावपि ॥ १२५१ ॥

शिथिलौ मणिबन्धे[19] तु पद्मकोशे(शौ) तु पल्लवौ ।
बाहुशीर्षाद्विनि[20]ष्क्रान्तौ हस्तकौ ध्वनि(कटि)रेचितौ ॥ १२५२ ॥

नि[21]तम्बा[22]वधि(विति) [23]विख्यातौ त्रिपताकौ करौ तु वै ।
[24]त्रिपताकौ यदा हस्तौ केशपार्श्वाद्विनिःसृतौ ॥ १२५३ ॥

तत्पार्श्वभ्रमणान्नीतौ केशबन्धाविति स्मृतौ ।
त्रिपताकौ यदा हस्तौ पार्श्वभागप्रसारितौ ॥ १२५४ ॥

[25]तत्रैव रेचितौ भूयात्स्या(यः स्या)तां हस्तौ लताभिधौ ।
त्रिपताको यदा हस्तः कर्णाभ्यर्णमुपागतः ॥ १२५५ ॥

(उन्नतः कुञ्चितो हस्तो रेचितः करिहस्तकः ॥)
त्रिपताकौ यदा हस्ता[26]वुत्तानौ कटिशीर्षकौ (के)
पक्षप्रद्योतकौ ज्ञेयौ हस्तलक्षणवेदिभिः ॥ १२५६ ॥

[27]उन्नतौ(तः) क्येंचि कुं(कुञ्चि)तौ(तो) हस्तौ(स्तो) रेचितौ(तः) कर(रि)हस्तकौ(कः) ।
नितम्बमस्तकन्यस्तौ त्रिपताकाकरौ यदा ॥ १२५७ ॥

---

१. D. स्तव्यासा । २. A. क । ३. D. दं । ४. A. तुं । ५. A. मा । ६. A. भागभागप्रसारितौ । ७. A. नो । ८. D. व । ९. A. तस्रोन्यतवस्थितः । १०. D. टि । ११ A. स्यो । १२. A. त्तो । १३. D. भेदितौ । १४. A. त्रि । १५. A. ने । १६. D. नु । १७. D. तो । १८. D. सितावति । १९. D. बंधौ । २०. A. निःक्रांतौ । २१. A. नं । २२. A. व । २३. A. ति । २४. D. drops these four stanzas । २५. A. तत्रैवरेचितौ तत्रैवरेचितौ भूया । २६. D. रतौ उ । २७. this line is wrongly put here in the ms. D.

पक्षवञ्चितकौ हस्तौ ज्ञेयौ हस्तप्रयोक्तु(क्तृ)भिः।
तिर्यक् प्रसारितौ हस्तौ त्रिपताकावधोमुखौ ॥ १२५८ ॥

ता[1]र्क्ष्यपक्षौ[2] समाख्यातौ[3] किञ्चित्कुञ्चितकूर्परौ।
[4]तिर्यक् प्रसारितौ हस्तौ हंसपक्षौ विवर्तितौ ॥ १२५९ ॥

[5]दण्डपक्षाविति ख्यातौ नृ[6]त्ये नृत्यविशारदैः।
अरालौ तु यदा हस्तौ शी[7]र्षस्योपरिसंस्थितौ ॥ १२६० ॥

ऊर्ध्वमण्डलितौ[8](नौ) ज्ञेयावा[9]वृत्तौ परिवर्ति[10]नौ।
तौ[11] यदा पार्श्वदेशे तु विव[12]र्तपरिवर्तनौ ॥ १२६१ ॥

[13]पार्श्वमण्डलिनौ[14] ज्ञेयौ नृत्त[15]विद्याविचक्षणैः[16]।
एक उद्वेष्टितौ (तो) हस्तौ (स्तो) द्वितीयश्चापवेष्टितः ॥ १२६२ ॥

व[17]र्तिनावुरः सं[18](रसः)स्थाने वक्षोमण्डलिनौ स्मृतौ।
अल[19]पद्मकरश्चैकः[20] करोऽन्योरालसं[21]ज्ञकः ॥ १२६३ ॥

उरः पार्श्वार्धभ्रमणादुरा(रः)पार्श्वार्धमण्डलौ।
खण्डकाख्यौ करौ वक्षे[22] कुञ्चितावञ्चितौ यदा[23] ॥१२६४॥

मणिब[24]न्धस्थितौ ज्ञेयौ मुष्टिक[25]स्वस्तिकौ तदा।
पद्मकोशो(शौ) यदा हस्तौ[26] जानुमस्तिष्कवर्ति[27]नौ ॥ १२६५ ॥

सकम्पं परि[28]वर्ताद्यो (र्ताढ्यौ) नलिनीपद्मकोशकौ।
[29]ऊर्ध्वं प्रसारितौ हस्ता[30] वलपद्मौ वि[31]वर्तिनौ ॥ १२६६ ॥

उल्बणाविति विज्ञेयौ नाट्यशास्त्रविशारदैः।
असङ्गताः कराः प्रोक्ता विंशतिश्चतुरुत्तरा(:) ॥ १२६७ ॥

---

१. D. र्क्ष। २. D. क्षः। ३. D. तः। ४. A. वितौक्ष्यापरिविख्यातौ हंसपक्षौ प्रकीर्तितौ। ५. A. दंसपक्ष्याविति। ६. A. नृत्तेवृत्त। ७. D. केशपार्श्वाद्विनिःस्मृतौ। ८. D. ता। ९. D. ववृत्त। १०. D. र्त। ११. D. तो। १२. D. र्त्त। १३. A. खंड। १४. A. तौ। १५. A. drops this विद्या। १६. A. णै। १७. A. र्त्तिता। १८. A. सि। १९. A. लं। २०. A. श्चैकरः। २१. A. मंज्ञकः। २२. A. क्षेसे। २३. A. दाः। २४. A. वंस्थितौ D. वंधे स्थितौ। २५. D. श्चस्वस्तिको यदा। २६. D. स्तो। २७. A.D. र्त्ति। २८. A. वृत्ता। २९. A. उर्ध्वं। ३०. D. स्तौ चलत्पद्मौ। ३१. A. पिवर्त्तिनौ।

CC0. In Public Domain, Digitizagtion by eGangotri

नामलक्ष्मक्रिया[1]युक्ता युग्महस्तास्त्रयोदश।
नाट्या[2]भिनयने त्वेते युज्य[3]न्ते रसभावतः ॥ १२६८ ॥

असंहतानां युग्मानां नियोगोऽस्मात्प्रकीर्तितः[4]।
नृत्तहस्तास्तथा प्रोक्ताः सप्तविंशतिसङ्ख्यया ॥ १२६९ ॥

नामतो लक्ष्मतश्चैव [5]नृत्तार्थे सोमभूभुजा।
एतेषां विनियोगे च नास्ति नृत्ये प्रयोजनम् ॥ १२७० ॥

लालित्यं दोलनादीनि कर्माण्येषां प्रयोजनम्।
एवं समासतः प्रोक्ताश्चतुःषष्टिः करा मया ॥ १२७१ ॥

अन्येपि चतुरै[6]र्योज्या [7]लोकवृत्तानुसारतः।
चतुर्विधा[8] (:) क्रियास्ते[9]षां हस्तानां [10]नर्तनं प्रति ॥ १२७२ ॥

आवेष्टितो[11]द्वेष्टिते द्वे [12]व्यावृत्तपरिवर्तने (र्तिते)।
अङ्गुल्यस्त्वन्तरावेष्टय[13] तर्जन्याद्या य[14]थाक्र[15]मम् ॥ १२७३ ॥

आवेष्टितास्त[16]तोद्दिष्टाः(तदोद्दिष्टा) क्रिया हस्तस्य कोविदैः।
बहिर्मुखा[17] यदाङ्गुल्यस्तर्जन्याद्या[18] विचेष्टिताः[19] ॥ १२७४ ॥

उद्वेष्टिता तदा ज्ञेया क्रिया हस्तस्य [20]नर्तकैः।
कनिष्ठा[21]द्या [22]यदाङ्गुल्यस्त्वन्तरावर्तितानना:[23] ॥ १२७५ ॥

व्यावर्ति[24]त(ता)क्रिया [25]मान्या प्रोक्ता नर्तनकोविदैः।
आवर्ति[26]ता [27]यदाङ्गुल्यः[28] कनिष्ठा[29]द्या बहिर्मुखाः[30] ॥ १२७६ ॥

[31]विज्ञेया [32]नृत्ततत्त्वज्ञैः क्रिया सा परिकी(व)र्तिता।
उत्तरं(न्नतं) च[33] नतं चैव कुञ्चितं चार्ध[34]कुञ्चितम् ॥ १२७७ ॥

---

१. D. यायुग्महस्तास्तेचत्रयोदश। २. A. प्रा। ३. A. ज्यते। ४. D. तिताः। ५. A. वृतार्थं। ६. D. रैयो। ७. A. लेख। ८. D. धा। ९. D. ते। १०. A. नर्तनं ति D. रेचनं प्रति। ११. D. तोवे। १२. A. व्यवर्त D. वावृत्ते। १३. A. विष्टयास्त। १४. A. दा। १५. A. मात्। १६. A. दोदिष्टा। १७. D. खंपदांगुल्यः। १८. A. द्य। १९. A. ता। २०. D. नृत्तकैः। २१. A. ष्टा। २२. A. पदां। २३. A. ना D. ताः। २४. A. ना। २५. A. ना। २६. A. र्त्तित। २७. A. प। २८. A. ल्य। २९. A. ष्टा। ३०. A. खा। ३१. A. व। ३२. A. नर्तानक्तत्वज्ञैः। ३३. A. चनतं चनर्तंचैव। ३४. D. र्द्धं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]संहतं विस्तृतं चैव (स मं चेति च सप्तमम्)।
कुञ्चिताकुञ्चितं जानु[2]त्वर्धाकुञ्चितमिष्यते ॥ १२७८ ॥
जानुद्वयस्य संश्लेषा[3]ज्जानु संहतमीरितम्।
जानुद्वय(यं)बहि[4]र्यातं तज्जानु विवृतं मतम् ॥ १२७९ ॥
स्वभावावस्थि[5]तं जानु सममित्यभिधीयते।
इति सप्तविधं[6] जानु कर्म चास्य निगद्यते ॥ १२८० ॥
गजाश्वपर्वतारोह उत्तरं(न्नतं) जानु यो[7]जयेत्।
[8]पातनं(ने) च प्रमाणेन(णामे च) नतं जानु समीरितम् ॥१२८१॥
आसने कुञ्चितं जानुं(नु) चलने त्वर्धकुञ्चितम्।
लज्जायां स्वीकृते भावे संहते(तं) जानु निर्दिशेत् ॥ १२८२ ॥
आरूढे(रोहे) च गजादीनां नृत्ये च विवृतं भवेत्।
स्तम्भे कार्यं समं जानु नाट्यस्याभिनये [9]बुधैः ॥ १२८३ ॥
निःसृता च परावृत्ता [10]तिरश्ची[11]ना च कम्पिता।
बहिः क्रान्ता च विज्ञेया जङ्घा पञ्चविधा[12] बुधैः ॥ १२८४ ॥
पुरतो निर्ग[13]ता जङ्घा निःसृते[14]त्यभिधीयते।
[15]पश्चाद्गता परावृत्ता तिरश्चीना तु पार्श्वगा ॥ १२८५ ।
रेचिता [16]कम्पिता ज्ञेया बहिः[17]क्रान्ता बहिर्गता।
एवं लक्षणमाख्यातं विनियोगोऽपि कथ्यते ॥ १२८६ ॥
क्षालने पादघाते च कार्या जङ्घा तु निः[18]सृता।
परावृत्ता तु[19] कार्या स्याद्गु[20]त्प्लुतौ [21]दर्दुरासने ॥ १२८७ ॥
तिरश्चीना[22] समाधौ स्यात्कम्पिता[23] शीतवे[24]पथौ।
[25]पङ्ग्वाद्यभिनये [26]कार्या बहिः[27]क्रान्ता विचक्षणैः[28] ॥ १२८८ ॥

१. D. drops this line। २. A. रर्धा। ३. D. तुनुज्ञातंहतमीरितं। ४. A. र्जातं। ५. A. सि। ६. D. धा। ७. A. निर्दिशेत्। ८. A. drops these three lines। ९. A. बै.। १०. A. मिरश्चिता। ११. D. नां। १२. A. drops this धा। १३. A. निगाता। १४. A. त्ये। १५. A. परिवृत्ता तिरश्चां न तु पार्श्वगा। १६. A. drops this word। १७. A. हिक्रांता। १८. D. विस्तृता। १९. A. तुः। २०. A. त्प। २१. A. दुर्धु। २२. D. नां। २३. A. ना। २४. A. य। २५. A. पंम्रा। २६. A. drops this word। २७. A. हिष्क्रांता। २८. A. णै।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घटितो घटितोत्सेधो मर्दिता(त)स्ताडि[1](स्त्राटि)ताग्रतः (गः)।
पार्ष्णिगः पार्श्वगः सूचि(:) निजा(जः) श्चेति [2]नवाङ्घ्रयः ॥१२८९॥

पार्ष्णिघाती भवेत्पादौ (दो) घटितौ च वि(तः स नि)युज्यते।
अश्वादिप्रेरणे भेदे ह[3]ढत्वापादने तथा ॥ १२९० ॥

भूमि[4]ष्ठमग्रमुन्न(न्य)स्य[5] यः पाष्ण्या हन्ति भूतलम्।
पादोऽयं घटितोत्सेधो नृत्यादौ विनियुज्यते ॥ १२९१ ॥

तिर्यक्[6]तलेन [7]मृद्ना(ना)ति भूमिं[8]यस्तु स मर्दितः।
म[9]र्दने पोषणे त्रासे योज्यो[10]ऽसावपसर्पणे ॥ १२९२ ॥

पाष्ण्या भूमिमवष्टभ्य पादाग्रेण निहन्ति यः।
पादः[11] स त्राटितो नाम [12]क्रोगर्वेण(क्रोपे गर्वे) नियुज्यते ॥१२९३॥

पुरतः सरणात्पाद[13]स्त्व[14]ग्रगः परिकीर्तितः।
पि[15]च्छ(च्छि)ले च [16]जलस्यान्तः पाषाणे च नियुज्यते ॥ १२९४ ॥

पाष्ण्यापसरणात्पादः पार्ष्णिगः[17] समुदाहृतः।
पश्चादपसृ[18]तस्त(तौ त)स्य विनियोगो निरूपितः ॥ १२९५ ॥

पाद(दः) पार्श्वे स्थितो गच्छन्वा म(स) पार्श्वगतो भवेत्।
आसने [19]कण्टकोत्पाटे सस्फुरो नृत्त इष्यते ॥ १२९६ ॥

अङ्गु[20]ष्ठाग्रस्थितः पादः सूची[21]नाम्ना प्रगीयते।
तुङ्गवस्तु समाकर्षे मुखचुम्बिजले [22]भवेत् ॥ १२९७ ॥

विकाररहितः पादो[23] भूमौ लग्नतलो[24] निजः।
स्थितौ [25]श्रमे विस्मये च चिन्तायां विनियु[26]ज्यते ॥ १२९८ ॥

अवक्षिप्तास्तथोत्क्षिप्ताः कुञ्चिताश्च प्रसारिताः।
पादाङ्गुल्यस्तथाङ्गुष्ठः[27] संलग्नाश्चेति पञ्चधा ॥ १२९९ ॥

---

१. A. डिग्रगः। २. A. निजाघ्रयः। ३. A. drops this ढ। ४. D. मिष्टनग्र। A. यिष्ट। ५. D. म्य। ६. A. ता D. का। ७. D. मंद्रादि। ८. D. मिर्य। ९. A.D. ई। १०. D. ज्यः सावरणे पर्णे। ११. A. दसंत्रादितो। १२. A. कांग। १३. D. दा। १४. A. स्व। १५. A. ष्ट। १६. D. व। १७. A. ग। १८. A. सृस्य यदा पार्श्वगोविनिरूपितः। १९. A. कंठ। २०. A. ष्टा। २१. A. च। २२. A. भवे। २३. D. दौ। २४. D. लेनतु। २५. A. श्रामे। २६. D. यो। २७. A. ष्ट।

Dr. Urmila Sharma Collection, Varanasi

मुहुर्मुहुरधः[1]क्षेपादवक्षिप्ताः प्रकीर्तिताः ।
पश्चात्कर्षे च संयोज्या विव्वोके[2] कि[3]लकिञ्चिते ॥ १३०० ॥

वारं वारं समुत्क्षेपादुत्क्षिप्ता गदिता बुधैः ।
अङ्गुल्यो विनियुज्यन्ते नवोढायास्त्रपा[4]भरे ॥ १३०१ ॥

सङ्कोचिता[5] यदाङ्गुल्यः कथिताः कुञ्चितास्तथा ।
त्रासे[6] ग्रहे च शीतार्ते नियुज्यन्ते च मू[7]र्छिति(र्छिते) ॥१३०२॥

रु(ऋ)ज्वः स्तब्धा[8] यदाङ्गुल्यस्तदा ख्याताः प्रसा[9]रिताः ।
[10]स्तम्भेग(ऽङ्ग)मोटने स्वापे [11]प्रयुज्यन्ते प्रयोक्तृभिः ॥ १३०३ ॥

अङ्गुलीभिः सहाङ्गुष्ठ[12] एको[13] वापि तथाविधः ।
तन्नाम(सूचीति)संज्ञितश्चायं नियोगोऽप्यस्य तद्विधः ॥ १३०४ ॥

अङ्गुष्ठे[14]न सहाङ्गुल्यः संहताश्चेत्परस्परम् ।
संलग्नाः कथितास्तासामाकर्षः स्यान्नियोजनम् ॥ १३०५ ॥

प्रत्यङ्गान्येवमुक्तानि नामलक्ष्मनियोजितम् ।
नाट्याभिनय[15]योगीनि यथायोगं नियोजयेत् ॥ १३०६ ॥

संहतं समपादं च स्वस्तिकं वर्धमानकम् ।
नन्द्यावर्तं चतुरस्रं पार्ष्णिविद्धं तथैव च ॥ १३०७ ॥

पार्ष्णिपार्श्वं(र्श्वे)गत(तं) स्थाने ए(नमे)कपार्श्वं[16]गतं तथा ।
[17]एकजानुम(ग)तं चैव परावृत्तं तथापरम् ॥ १३०८ ॥

पृष्ठो[18]त्तान(नं) तलस्थानमेकपादं तथैव च ।
ब्राह्मं च वैष्णवं शैवं गारुडं वृषभासनम् ॥ १३०९ ॥

समसूचिकमित्येकं तथा विषमसूचिकम् ।
खड्गसूचि[19]कमित्येवं स्थानकान्येकविंशतिः ॥ १३१० ॥

---

१. A. क्षिप्तादवेत्क्षिप्ताः । २. D. क । ३. A. लिर्किंचि । ४. D. रमे । ५. A. तपदां । ६. A. स । ७. D. र्तिते । ८. A. ब्धाप । ९. A. कीर्तिताः । १०. D. सभागयोटने । ११. A. प्रयुज्यसे । १२. A. ष्ट । १३. D. के । १४. A. ष्टे । १५. A. drops this य । १६. D. र्श्वे । १७. D एवं च जायते चैव । १८. A. ष्टो । १९. A. च ।

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गुष्ठोङ्गुष्ठसंश्लिष्टोऽङ्गुल्योऽङ्गुल्ये च [१]संहताः।
यत्र स्थित(ता)स्तदाख्यातं संहतं स्थानकं बुधैः ॥ १३११ ॥

समौ[२] [३]ऋ(मावृ)जुस्थितौ पादौ वितस्त्य[४]न्तरमायतौ ।
भवेतां [५]यत्र तत्स्थानं समपादमुदा[६]हृतम् ॥ १३१२ ॥

नूपुरस्थान[७]सम्बद्धं कनिष्ठा[८]द्वयसङ्गतम् ।
ईषदुच्च[९]तलं नाम्ना स्वस्तिकं स्थानकं विदुः ॥ १३१३ ॥

पादौ तिर्यङ्मुखौ यत्र पार्ष्णि[१०]भ्यां च सुसं[११]हतौ ।
वर्धमानं तदाख्यातं स्थानकं नृत्यकोविदैः ॥ १३१४ ॥

वर्धमानं [१२]यदा स्थानं [१३]वितरितं (वितस्त्यन्तरितं) भवेत् ।
[१४]नन्द्यावर्तं तदा प्रोक्तं नृत(त्य)विद्याविचक्षणै (:) ॥ १३१५ ॥

नन्द्यावर्तं यदा स्थानं त्रिवितस्त्यन्तरं भवेत् ।
स्थानकं चतुरस्रं तत्(ज्) ज्ञेयं [१५]नर्तनकौतुके (कोविदैः) ॥ १३१६ ॥

अङ्गुष्ठे[१६] पार्ष्णिसंश्लेषात्पार्ष्णिविद्धं[१७] तदीरितम् ।
अन्तः पार्श्वे[१८] गता पार्ष्णिः [१९]पार्ष्णिपार्श्वमुदाहृतम् ॥ १३१७ ॥

[२०]समः पादौ(दो) भवेदेकः किञ्चिदन्यः पुरोगमाः(मः) ।
तिर्यग्बहिः पार्श्वगतस्त्वेकपार्श्वं तदीरितम् ॥ १३१८ ॥

एकः [२१]समो द्वितीयश्च[२२]तिर्यक्कुञ्चितजानुकः ।
चतुरङ्गुलविश्लेषादेकजानुग[२३]तं म[२४]तम् ॥ १३१९ ॥

समानाङ्गुष्ठपार्ष्णिभ्यां समे पार्ष्णिकनिष्ठिके[२५] ।
परावृत्तं तु य[२६](त)त्स्थानं स्थानं(ख्यातं) लक्षणवेदिभिः ॥ १३२० ॥

---

१. D. संगता। २. D. मो रुजस्थितौ पादौ। ३. A. रुर्जु। D. रुज। ४. A. स्त्वै। ५. A. यत्र स्थानं। ६. A. दाखाहृतं। ७. D. कंत्र। ८. A. ष्टा। ९. D. च्चलं। १०. A. ष्णि। ११. D. हृ। १२. A. स। १३. D. विततं त भवेद्यदा। १४. D. drops this line। १५. A. नर्त्तन। D. नृत्यकक्कोविदैः। १६. A. ष्टः। १७. A. द्धं। १८. A. र्श्वं। १९. A. drops this पार्ष्णि D. र्ष्णि। २०. D. drops this stanza। २१. D. सो। २२. D. श्चैर्तिर्यक्कं। २३, A. न। २४. A. नं। २५. A, कौ। २६. A. त्तुथस्थानं लक्षण-वेदिभिः।

मा. २०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्गुली[1]पृष्ठ[2]संलग्नः पाश्चात्योऽङ्घ्रिर्यदा [3]भुवि ।
[4]पुरस्थः समपादश्चेत्पृष्ठोत्तानतलं भवेत् ॥ १३२१ ॥

समस्थानस्थितस्त्वेकः परस्तज्जानुमूर्धनि ।
बाह्यपार्श्वेन संलग्नः(ग्न) एकपादे(दं) तदीरितम् ॥ १३२२ ॥

[5]एकः समः स्थितः पादे द्वि(दो द्वि)तीयः कुञ्चितः[6] पुनः ।
जानु[7]सन्धिसमः पश्चा[8]द् ब्राह्मं स्थानमुदाहृतम् ॥ १३२३ ॥

पाद[9] एकः समो भूमौ द्वितीयः कुञ्चितो [10]मनाक् ।
अग्रे प्रसारितस्तिर्यग् वैष्णवं[11] स्थानकं हि तत् ॥ १३२४ ॥

समस्थितस्य पादस्य जानुमूर्ध[12] समोऽपरः ।
आकुञ्चितो [13]निरालम्बः स्थानकं शैवमुच्यते ॥ १३२५ ॥

पूर्वमा[14]कुञ्चितः पादः पाश्चात्यो[15] जानुना स्थितः ।
भूतले तु[16] यदा [17]त्वेवं तदा गारुडमीरितम् ॥ १३२६ ॥

जानुद्वयं यदा भूमौ संहतं विवृतं तु वा ।
स्थितं सौ[18]ष्ठवसंयुक्तं तदा स्याद् वृ[19]षभासन[20]म् ॥ १३२७ ॥

ति[21]र्यक् प्रसारितौ पादा[22]वूरुजङ्घम्(घं) सपार्ष्णिकम् ।
भूमिलग्नं तदास्थानं समसू[23]चीति सूचितम् ॥ १३२८ ॥

पुरः[24] [25]प्रसारितस्त्वेकः प[26]श्चादेकः[27] प्रसारितः ।
जानु[28]गुल्फेन भूलग्नो भवेद्विषमसूचि[29]कम् ॥ १३२९ ॥

एक[30]स्तु कुञ्चितः पादो द्वितीयस्तिर्यगायतः ।
[31]ऊरुपार्ष्णि[32]समालग्नो भुवि स्यात्खण्डसूचि[33]कम् ॥ १३३० ॥

---

१. A. लिः । २. A. ष्ट । ३. A. drops this भु । ४. D. drops this श्लोक । ५. A. पुरः स्थामः स्थितः । ६. D. त । ७. D. संधीसमा । ८. A. श्चाद्ब्रह्मस्थानमु । D. श्चात् वाह्यं । ९. A. द्याकः । १०. D. सनात् । ११. A. व । १२. D. र्धे । १३. A. निलंवः । १४. A. मंकुन्चि । १५. A. त्यौ । १६. D. न । १७. A. चे । १८. A. ए । १९. A. हृ । २०. A. नी । २१. A. र्षं । २२. D. दौ उ । २३. D. चितसूचकं । २४. A. रतः । २५. A. प्रा । २६. A. श्वा । २७. D. क । २८. A. न्वाङ्गुल्ये । २९. D. तः । ३०. A. कः स्तु । ३१. A. उरु । ३२. A. ष्णि । ३३. A. तं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चारी [1]सममथा(नखा)प्येका परा[2]नूपुर [3]विद्धिकाः(का) ।
तिर्यङ्मु[4]खा मरालाख्या कातरा च कुलीरिका ॥ १३३१ ॥

[5]रथचक्रा च विश्लिष्टा[6] [7]तथा स्यात्पार्ष्णिरेचिता ।
तलदर्शि[8]निभा(नीभ)हस्ता परावृत्ततला तथा ॥ १३३२ ॥

कु(ऊ)रुताडितनामा स्यादर्ध[9]मण्डलिकापरा[10] ।
स्तम्भक्रीडनिका चारी हरिणत्रासिका [11]तथा ॥ १३३३ ॥

उ(ऊ)रुवेणी तलोद्वृत्ता [12]भवेत्संसा(सञ्चा)रिका पुनः ।
स्फुरि[13]कालञ्जिता(ञ्जित)जङ्घा समघट्टा[14] मदालसा ॥ १३३४ ॥

उत्कुञ्चिता तथा [15]तिर्यक्कुञ्चिता [16]त्वपकुञ्चिता ।
एवं [17]षड्विंशतिः[18] प्रोक्ताश्चा[19]र्यो भूमिसमाश्रया(ः) ॥ १३३५ ॥

नाम्ना षोडश विख्याता ता(स्ता)सां वक्ष्यामि लक्षणम् ।
समपाद[20]स्थितौ पादौ यदा तिर्यक् प्रस[21]र्पतः ॥ १३३६ ॥

तदा समनखा [22]चारी [23]विज्ञेया च मनीषिभिः ।
स्वस्तिकस्थौ यदा पादौ पार्ष्णिप्रपदरेचितौ ॥ १३३७ ॥

तदा [24]नुपू(नूपु)र[25]विद्धेति चारीयं समुदाहृता ।
वर्धमान[26]स्थितौ पादौ वामदक्षिणतो यदा ॥ १३३८ ॥

सरतो द्रुतमानेन चारी तिर्यङ्[27]मुखा तथा ।
नन्द्यावर्त[28]स्थितौ [29]पादौ पर्ष्णिपादाग्ररेचनात् ॥ १३३९ ॥

पुरतः सर्पतो यस्याश्चा[30]री सा [31]स्यान्मरालिका ।
नन्द्यावर्तगतौ पादौ पश्चाच्चेदपसर्पतः ॥ १३४० ॥

---

१. A. चसमवाप्यका । २. A. र । ३. A. वर्द्धिका । ४. A. ग्मु D. क्मु । ५. D. रक्तवक्त्रा । ६. D. षा । ७. D. र । ८. A. शीनिभहरिता परावतलातथा । ९. A. घ । १०. A. रः । ११. A. drops this तथा । १२. A. त्ससारिभवका । १३. A. रजंघितजंघा । १४. A. दा । १५. A. नियंत्कं । १६. D. च तथान्विता । १७. D. षड्विं । १८. D. ति । १९. A. श्चा । २०. D. दे । २१. D. सारितः । २२. D. वारि । २३. A. विच्छेयानाख्ययोक्तृभिः । २४. A. न पुरु । २५. A. चि । २६. D. ना । २७. D. क्मु । २८. D. ग । २९. A. drops this पादौ । ३० D. स्वारि । ३१. D. स्याम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कातरा सा समा[1]ख्याता चारी भूतलसंश्रया ।
नन्द्यवर्ताश्रयौ पादौ यदि ति[2]र्यक् प्रस[3]र्पतः ॥ १३४१ ॥

कुलीरि[4]का तदा चारी विज्ञेया नाट्यकोविदैः ।
चतु[5]रस्रस्थितौ पादौ संलग्नावु[6]पसर्पतः ॥ १३४२ ॥

पश्चाद्वा सरतो यत्र रथचक्रेति सा स्मृता ।
पार्ष्णिविद्धाश्रयौ[7] पादौ विविच्य कुरुतो यदा[8] ॥ १३४३ ॥

उपस[9]र्पापसर्पा[10](र्पौ) सा विश्लिष्टा कथिता तदा ।
पार्ष्णिपार्श्वाभिधे स्थाने र(रे)चितौ यदि पार्ष्णिकौ ॥ १३४४ ॥

तदा भवति चारीयं नामतः पार्ष्णिरेचिता ।
संहतस्थौ यदा पादौ पृथ[11]क् चेत् तिर्यगायतौ ॥१ ३४५ ॥

स्पृशतो [12]बाह्यपार्श्वेन [13]भूमिं सा तलद[14]र्शिनी ।
संहत[15]स्थानगः पादः पार्श्वाभ्यां [16]घर्षणो(णे) भवेत् ॥ १३४६ ॥

यदा तदा समाख्याता करिहस्तेति सूरिभिः ।
पृष्ठोत्तानस्थितः[17] पादः[18] [19]परिवाह्य प्रसारितः ॥ १३४७ ॥

परावृत्ततला [20]नाम चारी ज्ञेया मनीषिभिः ।
एकपादे कृतस्थानो[21] भूमिस्थेन पदेन च ॥ १३४८ ॥

ता[22]डये[23]दूरुदेशं[24] तु सा भवे[25]दूरुताडिता ।
भूमि[26]घृष्ट(ष्टं)बहिः कृत्वा पादमावर्तयेच्छनैः ॥ १३४९ ॥

पर्यायेणा[27]पसर्पन्तं चारी स्यादर्धमण्डला[28] ।
तिर्यक् प्रसारिताङ्घ्रेस्तु तलेनान्यस्य पार्श्वकम् ॥ १३५० ॥

---

१. D. ना । २. A. र्थं । ३. A. पंत D. पिंतः । ४. A. टि । ५. A drops this र । ६. A. बु । ७. A. या । ८. D. था । ९. D. र्प्पा । १०. D. र्प्पौ । ११. A. कं । १२. A. वा । १३. A. भूंमी D. भूमिः । १४. A. दर्शमी D. मर्ह्दिनी । १५. A. तः । १६. A. हर्षणे । १७. D. ता । १८. D. दौ । १९. D. पादौ । २०. A. न । २१. D. ना. । २२. A र । २३. D. बुरु । २४. A. देदूरुदेशं । २५. D. दु । २६. D. पृष्ठं । २७. D. समाप्पंर्तं । २८. A. लाः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुहुर्मुहुश्च घटयेत्स्तम्भक्रीडनिका हि सा
कुञ्चित[1]स्वस्तिकाकारे चलिताङ्घ्रितलं[2] यदा । ॥ १३५१ ॥
संश्लिष्योत्प्लु[3]त्य[4] नियते (पतेत्) हरिणत्रासिका भवेत् ।
स्वस्तिकाकारपादाभ्यां पार्श्वसङ्घर्षणा[5]द्भुवि ॥ १३५२ ॥
उ(ऊ)रुद्वयस्य संश्लेषा[6]दूरुवेणीति वर्णिता ।
अङ्गुली[7]पृष्ठचारीभ्यां प्रप[8]दाभ्यां द्रुता गतिः॥ १३५३ ॥
पुरतः सरणा[9]चारी तलो[10]द्वृत्ता तु कीर्तिता ।
एकश्चा[11]कुञ्चितः[12] पाद उत्क्षिप्योत्क्षिप्य युज्यते ॥ १३५४ ॥
तिर्यगच्छे नलेनाद्यश्चारी(ग्गच्छेत्तलेनान्यश्चारी)[13]सञ्चारिता भवेत् ।
उभाभ्यां पादपार्श्वाभ्यां[14] पुरतः सरणाद्रु(द्रु)तम् ॥ १३५५ ॥
भूमिलग्ना यदा[15]चारी स्फुरिता[16] कीर्तिता तदा ।
खण्डसू[17]चिस्थि[18]तः पादः[19] शीघ्रमाकर्षि[20]तो यदा ॥ १३५६ ॥
लङ्घ्यते [21]येन पादेन [22]तदा लङ्घितजङ्घिका ।
पादौ विषमसूचि[23]स्थावुत्प्लुत्य[24] घटयेन्मु[25]हुः ॥ १३५७ ॥
चारी सङ्घट(ट्ट)ना नाम कथिता सोमभूभुजा ।
विकलौ तु यदा पादा[26]वन्य[27]स्थौ श्लेषितौ पुनः ॥ १३५८ ॥
इतश्चेतश्च निक्षिप्तौ यत्र सा तु मदा[28]लसा ।
उ[29]त्क्षिप्य कुञ्चितौ[30] पादौ[31] ए(दावे)कैकक्रमशो यदा ॥ १३५९ ॥
विक्षिप्ताः[32] (प्तौ) पुरतश्चारी तदाऽसौ[33] कु(सोत्कु)ञ्चिता मता[34] ।
यत्रैकं पादमाकुञ्च्य तिर्यक् प्रक्षेपणान्मुहुः ॥ १३६० ॥

---

१. A. तेस्वसि । २. A. लां । ३. D. त्प । ४. A. त्प । ५. A. ण D. णात् भु । ६. A. द्रु । ७. A. प्रथ । ८. A. पा । ९. D. णात्चारी । १०. A. लातृत्ता । ११. A. स्या । १२. A. दः । १३. A. drops this सञ्चारि । १४. A. omits this भ्यां । १५. A. ची । १६. D. का । १७. A. ची । १८. A. थि । १९. D. द । २०. D. र्ष । २१. D. ने । २२. A. पंनदा । २३. D. ची । २४. A. न्य । २५. A. न्मद्रु । २६. D. दौव । २७. A. न्यवरतौश्लथौ । २८. D. द्दा । २९. A. क्षि । ३०. A. ता । ३१. A. दा । ३२. D. प्त । ३३. D. तौ । ३४. A. ना ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सा तिर्यक्कुञ्चिता चारी[1] कथिता नाट्यकोविदैः ।
पादमाकुञ्च्य यत्रैकं गच्छे[2]त्पश्चात् क्रमाद्यदि ॥ १३६१ ॥

[3]सापकुञ्चितचारीति कथिता नाट्य[4]कोविदैः ।
पादं प्रसार्य पुरतः पश्चादाकुञ्चनान्मुहुः[5] ॥ १३६२ ॥

विक्षेपो[6] (पा)नाम सा ज्ञेया चारी व्योमसमाश्रया ।
आकुञ्चितस्य पादस्य सव्यं दक्षिणतोऽपि वा ॥ १३६३ ॥

[7]भ्रामराद्भ्र(भ्रमणाद्भ्र)मरी नाम व्योमचारी विवर्णिता ।
पादौ प्रसार्य चोत्प्लुत्य[8] पादयोस्तलताडनात् ॥ १३६४ ॥

आकाशे सा समाख्याता नामतस्त्वङ्घ्रिताडिता ।
पादं[9] प्रसार्य[10] पुरतो वेगेन भ्रमणाद्यदा ॥ १३६५ ॥

भ्रमरी नाम सा प्रोक्ता चारी नर्त[11]नकोविदैः ।
कुञ्चितं पादमुत्क्षिप्य पुरतः सम्प्रसारयेत् ॥ १३६६ ॥

यदा तदा समाख्याता पुरःक्षेपेति सूरिभिः ।
[12]ऊरुपृष्ठे[13] [14]पदं कृत्वा बहिः पार्श्वेन सङ्गतम् ॥ १३६७ ॥

नितम्बं यावदाकुञ्चेत्सापक्षेपा तदा स्मृता ।
अन्तर्भ्रमणादङ्घ्रे जा(र्जा)नुपृष्ठे[15] तलं न्यसेत् ॥ १३६८ ॥

बहिस्तु भ्रमणात्पार्श्वे जङ्घावर्त्तो[16] तदा स्मृता ।
कुञ्चितं पादमुत्क्षिप्य जानु[17]स्तनसमं यदा ॥ १३६९ ॥

विन्यस्य कम्पये[18]त्पादं [19]सार्ध (दमूर्ध्व) जानुरुदाहृत[20] (ता) ।
उ(ऊ)रोरुपरि विन्यस्य पादं पार्श्वेन सङ्गतम् ॥ १३७० ॥

प्रसारयेच्च तीक्ष्णाग्रं तदा सूचीति कीर्त्ति[21]ता ।
पश्चात्कुञ्चितपादस्तु [22]दोलितश्च पुनः पुनः ॥ १३७१ ॥

---

१. A. चारीति । २. D. च्छप । ३. A. सोयं । ४. A. योक्तभिः । ५. A. हु । ६. A. ज्ञेया । ७. D. भ्रामरींद्रुमरीनाम । ८. A. त्प । ९. A. द । १०. A. यं । ११. D. र्त्तक । १२. A. उरु D. कुरु । १३. A. ष्ठि D. ष्ठं । १४. D. यदा । १५. A. ष्टे । १६. D. र्त्ता । १७. D. नुं । १८. A. थे । १९. D. सर्वं । २०. A. तं । २१. A. र्त्तिना D. र्त्ति । २२. D. चा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चारी [1]सन्दोलिता नाम कथिता नाट्यपण्डितैः ।
स्वस्तिकस्य पुरः पादः[2] कुञ्चितान्दोलितो[3] मनाक् ॥ १३७२ ॥

व्योमचारी समाख्याता नाम्ना [4]विद्वा बुधोत्तमैः ।
तिर्यगाकुञ्चितं पादमितरेण विलङ्घयेत् ॥ १३७३ ॥

निरालम्बा(म्बं) तदा ज्ञेया जङ्घा लङ्घनचारिका ।
उत्क्षिप्तं पुरतः[5] पादं ता(भा)लस्योपरि भ्रामयेत् ॥ १३७४ ॥

विद्युद्भ्रान्तेति सा प्रोक्ता व्योमचारी विप[6]श्चिता ।
पृष्ठतः सारितं पादं लङ्घयित्वान्तराकृते ॥ १३७५ ॥

[7]अलाता नाम सा प्रोक्ता [8]चारी चारीविशारदैः ।
प्रसार्य पादा[9]वुत्प्लुत्य निपतेच्च मुहुर्मुहुः ॥ १३७६ ॥

कथिता नाट्यतत्त्वज्ञैः[10] सा चारी हरिण[11]प्लुता ।
स्वस्तिकं च समावर्त्य प्रोत्क्षेपात्तिर्यगूर्ध्वतः[12] ॥ १३७७ ॥

दण्डपादेति[13] सा [14]चारी कथिता व्योमजा बुधैः ।
भूमिजा व्योमजा[15]श्चार्यो लक्ष्य[16]लक्षणसंयुताः ॥ १३७८ ॥

[17]कथिताः सोमभूपेन [18]नाट्याभिनयकर्मणि ।
[19]अञ्चितं कर्तये[20]ञ्चितमेकपादा[21]ञ्चितं तथा ॥ १३७९ ॥

भैर[22]वाञ्चितमित्येव[23]मञ्चितं स्याच्चतुर्विधम् ।
अलग्नमन्तरालग्नमू[24]र्ध्व(र्ध्वा)लग्नं [25]तथैव च ॥ १३८० ॥

[26]त्रिप्रकारमिदं प्रोक्त[27]मलग्नं करणं बुधैः ।
[28]कपालस्पर्शनं नाम [29]नतपृष्ठाभिधं[30] तथा ॥ १३८१ ॥

---

१. A. संदा । २. D. द । ३. A. नो । ४. D. विंद्यात् । ५. A. तः वरमः पादं । ६. A. निश्चिता । ७. A. आ । ८. A. drops this चारी । ९. D. दमुत्पात्य नीयते च । १०. A. ज्ञे । ११. A. णा । १२. A. ता । १३. A. थ । १४. D. च । १५. D. चा । १६. D. क्ष । १७. D. सोमभूपेन कथिता । १८. A. नया । १९. D. अंचित । २०. A. र्त्तयेंचित D. त्तर्यंचित । २१. D. दाञ्चितं । २२. D. वाञ्चित । २३. D. मञ्चितं । २४. D. ध्रा । २५. A. तं । २६. D. त्रिः । २७. D. क्तं अ । २८. D. का । २९. D. ततः । ३०. D. धस्त ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्विः(द्वि)प्रकारमिदं ज्ञेयं कपालस्पर्शसंज्ञकम्।
एकपादादिभेदेन चतुर्धा[1] लोटितं भवेत् ॥ १३८२ ॥

दण्डप्रणतसंज्ञं च जलशय्या[2]भि[3]धं तथा।
एणप्लुतं च करणं तिर्यङ्करणमेव च ॥ १३८३ ॥

मत्स्यलोलितकं चेति दशाष्टौ करणानि तु।
उत्तानमुत्प्लुतं यत्र समपादं प्रक[4]ल्प्यते ॥ १३८४ ॥

[5]अञ्चितं नाम करणं तज्ज्ञेयं प्लुतिकोविदैः।
तदे[6]वं स्वस्तिका[7]ङ्घ्रिः(ङ्घ्रेः)स्यात्क[8]र्तर्यञ्चितमिष्यते ॥ १३८५ ॥

तथैवै[9]केन पादेन चैकपादाञ्चितं भवेत्।
कु(ऊ)रुपृष्ठ परिप्रा[10]प्ता(प्तो)यत्रैक(श्च)चरणो भवेत् ॥ १३८६ ॥

द्वितीयो भूमिसंलग्नस्तत्प्लुतं भैरवाञ्चि[11]त[12]म्।
अधोमुखं समुत्प्लुत्य [13]निपत्य पुरतः पुनः[14] ॥ १३८७ ॥

उत्क(कुक्कु)टेनोप[15]वेशाद्य(द्य)स्तदलग्नाभिधं मतम्।
तदेव नष्ट[16]संज्ञं(नतपृष्ठं) चेज्जङ्घयोर्मध्यतः शिरः ॥ १३८८ ॥

निरालम्बं भवेत्पश्चादन्तराल[17]ग्नकं तु तत्।
तथैव समपादाभ्यां पतते[18]श्चोर्ध्वतः स्थितिः ॥ १३८९ ॥

तदूर्ध्वा[19]लग्नकं[20] नाम करणं कीर्तितं बुधैः।
विन[21]म्य पुरतो भूमिं स्पृष्ट्वा [22]मुद्रेव(मूर्ध्नैव) यत्र तु ॥ १३९० ॥

उत्प्लुतं क्रियते यत्तु कपालस्पर्शनं तु [23]तत्।
अन्तरालग्नवद्य[24]त्र [25]कपालस्पर्शने स्थितिः ॥ १३९१ ॥

---

१. D. र्द्धा। २. A. य्य D. या। ३. D. भिधस्त A. सिधं। ४. D. ल्प्र। ५. AD. अचि। ६. D. दै। ७. A. कांघ्रे। ८. A. र्त्तव्यंचित। D. र्त्तर्यंचित। ९. D. चै। १०. A. प्रश्नो। ११. D. वाचि। १२. A. त। १३. D. नियम्ये। १४. A. पुरः। १५. D. पशापस्त तद A. पवेशाद्ययैस्त। १६. A. न। १७. D. लक्रमेव। १८. A. तेचोर्ध्वतः स्थितः D. तोर्ध्वं-स्थितिः क्रमात्। १९. A. दूर्ध्वं। २०. A. क। २१. D. न्यस्य। २२. A. मृद्रैव। २३. A. त्तत्। २४. A. घ। २५. D. drops this upto त्रिक्रमावर्त्य in the third line।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नतपृष्ठं तु करणं [1]तज्ज्ञेयं नाट्यकोविदैः[2] ।
उत्प्लुत्पा(त्या)लग्नवद्यत्र त्रिकर्मा(मा)वर्त्य[3] भूतले ॥ १३९२ ॥

तिर्यग् निप[4]तनं तत्तु लोटितं करणं विदुः ।
क[5]र्त्तर्यादिप्रभेदेन तदेवाश्रितवद्यदा ॥ १३९३ ॥

लोटितान्तानि नामानि तदा त्रीणि [6]भवन्ति च ।
[7]अत(ला)ले(ते)न समुत्प्लुत्य दण्डवन्निपतेद्यदा ॥ १३९४ ॥

दण्डप्रणतकं नाम करणं विषमं भवेत् ।
उत्प्लुत्याश्रितवद्य[8]त्र तिर्यक्पतनपूर्वकम् ॥ १३९५ ॥

जलशायीव [9]यत्रास्ते जलशय्याभिधं तु तत् ।
उत्प्लुत्य गगने[10] यत्र हस्तौ पादौ प्रसार्य च ॥ १३९६ ॥

ऊर्ध्वं[11]मुत्कटके वापि [12]पातादेणप्लुतं भवेत् ।
समुत्प्लुत्यैकपादेन तिर्यगन्येन [13]चाङ्घ्रिणा ॥ १३९७ ॥

यत्र तिष्ठति तत्प्रोक्तं तिर्यक्करणसंज्ञकम् ।
[14]एणप्लुतं तदु[15]त्प्लुत्य [16]मध्यमावर्तम(र्त्य त)त्र च ॥ १३९८ ॥

तिर्यग् निपतनं [17]यत्तु मत्स्य[18]लोलितकं विदुः ।
एवमष्टादश प्रोक्ताः[19] करणानां पृथक्[20] पृथक्[21] ॥ १३९९ ॥

नामलक्षणतो भेदाः श्रीमत्सोममहीभुजा ।
केनचि[22]त्किञ्चिदभ्यस्तमीदृग्लक्षणलक्षित[23]म् ॥ १४०० ॥

पश्येत्सभागतो भूयो नृत्यकौतुकहेतवे ।
स्वयं वा न[24]र्तनं कुर्याद्रसभावसमन्वितम् ॥ १४०१ ॥

---

१. A. ततज्ञे। २. A. दै। ३. A. र्त्यं D. र्तं। ४. A. पनं तत्तु। ५. A. र्त्तं D. र्त्तं। ६. A लभेत्तु तत्। ७. A. drops this stanza। ८. A. च्छ। ९. A. व्य। १०. D. नं। ११. A. र्ध्वंमुत्कु। १२. D. पत। १३. A. वां। १४. A. पण। १५. A. द। १६. A. तदप्लुत्य उत्पुपोत्प्लुत्यः यत्र नु। १७. A. तत्तुं। १८. A. त्स्यालां। १९. A. क्ता। २०. A. क। २१. A. क। २२. A. च्चिकिं। २३. A. तं। २४. A.D. र्त्तं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुरेखं विविधं रम्यं प्रेयसीचित्तरञ्जनम् ।
विकटं विषमं नृत्यं मृदङ्गकरणादिकम् ॥ १४०२ ॥

शृङ्गाररस्य विरुद्धं यत् तत्स्वयं वर्जयेन्नृपः ।
विश्वस्तान् सुजनान् प्रौढा[1]न् रसिकान्वात्मनो जनान् ॥ १४०३ ॥

नृत्यविद्याविशेषज्ञान् [2]सभायामुपवेशयेत् ।
हर्म्ये वा गृहमध्ये वा प्राङ्गणे वा मनोहरे[3] ॥ १४०४ ॥

उद्याने शाद्वले स्थाने कुर्यान्नृ[4]त्यविनोदनम् ।
इति नृत्यविनोदोऽयं कथितो लक्षणान्वितः ॥ १४०५ ॥

कथाविनोदः सरसः कथ्यते साम्प्रतं मया ।

[5]इति नृत्यविनोदः[6] ॥

धर्मार्थोचितमेवात्र कृत्वा कार्यं कृतक्रियः ॥ १४०६ ॥

पत्य(थ्य)मिश्रं ततो भुक्त्वा वामपार्श्वाषितक्षणम् (णः) ।
आहूय चतुरान् दक्षान् लोकत्रयपारगान् जनान् ॥ १४०७ ॥

चतुःषष्ठिकलाभिज्ञांश्चतुर्भाषाविशारदान् ।
चित्तज्ञान् धर्मसचिवान्नानारसकथाविदः ॥ १४०८ ॥

समयज्ञान् सावधानान् रागद्वेषविवर्जितान् ।
आस्तिकान्धर्मकार्येषु वाग्मिनः प्रौढशालिनः ॥ १४०९ ॥

तरुणान् बुद्धिवृद्धांश्च देशकालविभावकान् ।
दुःखद्रुमकुठारांश्च वैराग्येन्धनपावकान् ॥ १४१० ॥

शृङ्गारोदधिशीतांशु(शून्)रागाम्बुजदिवाकरान् ।
कथां पृच्छेन्महीपालो महाभारतसम्भवाम् ॥ १४११ ॥

रामायणोद्भवां भव्यां पुराणेभ्यः समुद्धृताम् ।
बृहत्कथासमुत्पन्नां वीराणां चरितोत्कटाम् ॥ १४१२ ॥

---

१. A. द्वा । २. D. स्व । ३. A. रं । ४. A. त्त । ५ A. इतिश्री four or five lines blank after this on that page । ६. D. adds अथकथाविनोदः कथ्यते ॥ A. omits further portion upto पुरुषद्वयसंसिद्धा etc.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नाटकादी(दि)समुद्भूतां महाकाव्यसमाश्रिताम्।
उत्प्रेक्ष्य निर्मितां तज्ज्ञैर्लोकवृत्तान्तदर्शिनीम् ॥ १४१३ ॥

ततस्ते पृथिवीशाय कथयन्तु कथाः शुभाः।
एकवक्त्रा द्विवक्त्राश्च तथा चैव चतुर्मुखाः ॥ १४१४ ॥

बहुभिः कथिता या तु कथा स्यात्तु चतुर्विधा।
एकेन कथिता या तु सा भवेदेकवक्त्रिका ॥ १४१५ ॥

पुरुषद्वयसंसिद्धा[1] द्विवक्त्रा सा भवेत्कथा[2]।
चतुर्भि[3]र्गीयते या स्यात्क[4]था सा तु चतुर्मुखा[5] ॥ १४१६ ॥

बहुभिः[6] क्रियते या[7] तु सा[8] कथा बहुपूरुषा।
शारी[9]रध्वनिसंयुक्तः[10] सर्वरा[11]गेषु कोविदः ॥ १४१७ ॥

वाग्मी च पठने दक्षो [12]विनीतो[13] येन (ना तालेन य)त्कथा(म्)।
गीतेन सह यो वक्ति[14] रसभा[15]वसमन्वितम्[16] ॥ १४१८ ॥

स वरः क[17]थ्यते लोके[18] कथयन्नेकवक्त्रिकाम्।
शब्दशास्त्रविशेषज्ञो लोकव्यापारकोविदः ॥ १४१९ ॥

वाग्मी च मितभाषी च श्लोकार्थावतिबोधकः[19]।
चतुरो वेदत[20]त्त्वज्ञः साहित्येषु कृतश्रमः ॥ १४२० ॥

[21]सूत्कार[22]रहितः प्राज्ञो वरः[23] पौराणिको[24] मतः[25]।
[26]लिपिज्ञो गी[27]ततत्त्वज्ञः[28] [29]सुस्वरो म[30]धुरध्वनिः ॥ १४२१ ॥

श्लोकान्वक्ति पद[31]छंद(च्छेदैः)सरागैर्वाचको वरः।
ईह[32]ग्लक्षणयुक्ताभ्यामुभाभ्यां परिकल्पिता ॥ १४२२ ॥

---

१. A. वा। २. A. थं। ३. A. गी। ४. D. त्तथास्यात्तु। ५. A. खी। ६. A. भ। ७. A. पा। ८. A. स। ९. A. रि। १०. A. क्ता। ११. A. रो। १२. A. वी। १३. A. तालन। १४. A. त्ती। १५. A. मां। १६. A. ताम्। १७. A. ध्र। १८. A. कोथयंन्ने कवच्छियां। १९. A. काः। २०. A. त्त। २१. D. स। २२. D. स.। २३. A. र। २४. A. का। २५. A. त। २६. A. भि। २७. D. ति। २८. A. ज्ञेः। २९. A. सू। ३०. A. धुध्वरध्वनि। ३१. A. दैः संगगैर्वाचको वरः। ३२. A. दु।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथा पुराण[1]सम्बद्धा द्विवक्त्रा सो[2](सा) प्र[3]कीर्तिता ।
दण्ड[4]कौ(कैः) प[5]टहीभिश्च[6] ता[7]लरागसम[8]न्विता(ताम्) ॥१४२३॥

प्रा[9]कृताभिश्च[10] भाषाभि[11]र्ब्रूते सूतो वरां कथाम् ।
[12]तिसृभिर्गायकीभिश्च[13] मध्ये मध्ये प्रवृत्तयेत्(वर्तयेत्) ॥ १४२४॥

गीतं मनोहरं यत्र सा[14] कथा स्याच्चतु[15]र्मुखी ।
कर्णाटभाषया यस्तु[16] षट्[17]पदीपटनोदितः (पठनोद्यतः) ॥१४२५॥

[18]किन्नरी[19]स्वरसंवादी[20] ध्वनि[21]र्यस्य विराजते ।
उदारध्वनिसंयुक्ताः[22](क्तः) सौष्ठ[23]वेन समन्विताः[24](तः) ॥ १४२६॥

वर्णकैः[25] सह यो वक्ति स चित्रकथको वरः ।
गायक्यो(का)यत्र गायन्ति विना [26]तालैर्मनोहर[27]म् ॥ १४२७॥

[28]मार्दङ्गिकद्वयोपेतं सा कथा बहुपूरुषा ।
[29]शौर्यौदार्यगुणोपेता [30]तथाद्भुतरसाश्रया ॥ १४२८॥

रौद्रबी[31]भत्सहास्याढ्यां(ढ्या) करुणो(णा) भयनिर्भरा ।
शृङ्गाररस[32]सम्पूर्णा प्रेमभोगसु[33]सम्भृता ॥ १४२९॥

विप्रलम्भरसोपेता[34] दुर्घटे घटनान्विता ।
ईर्ष्या[35]दर्पसमोपे[36]ता मदमोहसमन्विता ॥ १४३० ॥

नानाश्च[37]र्यचरित्राढ्या नृपचित्तप्रमोदिनी[38] ।
आक[39]र्णयेत्कथाः श्राव्या दिव्या भव्या मनोहराः ॥ १४३१॥

---

१. A. णसंबंधाः । २. D. सीत् । ३. A. किर्त्तित D. कीर्त्ति । ४. A. क्रो । ५. A. र । ६. A. श्वा । ७. A. ला । ८. A. प्रन्विताः । ९. A. क्त । १०. A. श्व । ११. A. भिः ब्रू । १२. A. विश्व । १३. A. श्वा । १४. A. मा । १५. A. मू । १६. A. सु । १७. A. ट्दिपदनोद्यतः । १८. A. क्रिंनीरि । १९. A. स्वसं । २०. A. द । २१ A. य । २२. D. क्ता । २३. A. ष्ट । २४. D. ता । २५. A. कैसहयोवक्ति टनोव्वतः किनरंरवसंवादिः ध्वनिर्यस्य वराजते सचिकथकोवरः । २६. A. त । २७. A. रौमर्दृगिकविनातालैर्मनौहरौ मर्दृगिकद्वयोपेतः राजते सचिकथकोवर १६ गायक्यो यत्र गायंति विनातलैर्मनोहरौ । २८. A. मर्दृगिकद्वयोपेतः । २९. A. सौर्यौदार्य । ३०. A. स्तथोभूत । ३१. A. वाभवाभत्सहास्याडकरुणेभयनिर्भरा । ३२. A. संसयुर्णाः । ३३. A. संसृता । ३४. A. तां । ३५. A. य्यो । ३६. A. ऐ । ३७. A. श्चै । ३८. A. ना । ३९. A. र्ष ।

Dr. Urmila Sharma Collection, Varanasi

[1]स्वयं च कथये[2]द्राजा प्रेयसी[3]प्रेमवृत्त(द्ध)ये ।
एवं कथाविनोदोऽयं[4] सर्वानन्दकरो वरः ॥ १४३२ ॥

भूलोकम[5]ल्लदेवेन कथितश्चक्रवर्तिना ।

(इति कथाविनोदः)

[6]चमत्कारविनो[7]दोऽत्र साम्प्रतं वक्ष्यते मया ॥ १४३३ ॥

समस्ताद्भुतगर्भो[8]ऽयं विदग्धजन[9]मोहनः[10] ।
नृक[11]पाले मृदा पूर्णे कटुकालाबुजी[12]रकम् ॥ १४३४ ॥

उत्प्या(त्प्वा)[13]पत्रं हरेन्मू[14]लं गु[15]टिके कल्पयेत्पृथक् ।
पत्रोत्थगुटिकाक्लृप्त[16]तिलको यन्निरीक्षते ॥ १४३५ ॥

तद्भक्ष्यं[17] क[18]टुतां याति माधुर्यं[19] मूलचित्रकः[20] ।
[21]श्वा(श्व)कपालेऽर्क[22]बीजानि सम्यगुप्ता(प्त्वा)ङ्कुरोद्गमे ॥ १४३६ ॥

क्षिपेत्तत्र मृतं सर्प(र्पं) कलि[23]ते [24]मूलमा[25]हरेत् ।
[26]तूललाक्षारसालिप्तं(प्तां) [27]वर्तिं(र्तिं) कृत्वा प्र[28]दीपयेत् ॥१४३७॥

तत्प्रदी[29]पप्रकाशेन जनाः पश्य[30]न्ति पन्नगान्[31] ।
अभ्यज्य मधुना नेत्रे जना निर्मलचक्षुषा ॥ १४३८ ॥

पश्यन्ति तत्त्वतः[32] सर्वं वस्तुजातं[33] पुरे[34](रः)स्थितम् ।
नित्यमङ्कोल्ल(ल)तैलेन वेत्रदण्डे(ण्डं) विलेपितम् ॥ १४३९ ॥

धारयेद् भक्तमध्ये तु मासमेकं निरन्तरम् ।
अर्चितायां(ष्मत्यां) स्पृश(शे)[35]द्दण्डं सर्पेणै(र्पो नै)व [36]प्रदृश्यते
॥ १४४० ॥

---

१. A. स्वयवष्क । २. A. यें । ३. A. स । ४. A. य । ५. A. ल । ६. D. gives अथचमत्कारबिनोदः कथ्यते before this line । ७. A नोत्रा । ८. A. भोयंति । ९. A. नो । १०. A ना । ११. A. पंलि । १२. A. वाजके । १३. A. यन्न । १४. A. न्मु । १५. A. ट । १६. A. क्रप्रतिलको यंन्नितें । १७. D. क्षं । १८. A दूतायत । १९. A. यं । २०. A. क । २१. A. स्वा । २२. A. कवि । २३. A. ला । २४. A. मु । २५ A. माहरे । २६. A. तु । २७. A. वृत्ति D. वर्त्ति । २८. A. दि । २९. A. दि । ३०. A. पश्यांत । ३१. A. न । ३२. A. त । ३३. A. त । ३४. A रेः । ३५. A. द । ३६. A. सद ।

करञ्जतै[1]ललेपेन पुनः स्थाप्य प्रपद्यते ।
दीपोत्सवचतुर्दश्यां रजना(नी)माग[2]तं(तां) हरेत् ॥ १४४१ ॥

कृष्णः[3] कपिलवर्णस्य(श्च) तां [4]क्षिपेत्करके नवे ।
स्मशा[5]ने भूगतं कृत्वा वर्षान्ते [6]तद्दिने हरेत् ॥ १४४२ ॥

[7]कष्यां सा बध्यते यस्य सोऽ[8]दृश्यो जायते नरः[9] ।
पिशा[10]चाङ्कोल[11]चाण्डालीहेम[12]बीजावलीभुवा ॥ १४४३ ॥

तैलेनाभ्यञ्जये[13]द्धस्तौ कोदण्डं तद्गुणं तथा ।
स्थलस्थं गगनस्थं वा तोय[14]मध्यगतं[15] तथा ॥ १४४४ ॥

[16]सुसूक्ष्मे चञ्चलं(ले) व(ल)क्ष्ये विद्ये(ध्ये)देव न [17]संशयः ।
सञ्चूर्ण्य [18]गुटिकां शुभ्रां[19] [20]कटुतुम्बीरसेन ताम् ॥ १४४५ ॥

वज्रले[21]पेन मिश्रं(श्रां)च गुटिकां परिकल्पयेत् ।
तया वृश्चिकमालिख्य[22] स्पर्शये[23]दन्तरं नरः ॥ १४४६ ॥

चिता[24]ङ्गारमषी[25] मिश्रसिद्धतैलेन लेपिते ।
करे हरीतकी[26] धत्ते तत्क्षणात्पूगरूपताम् ॥ १४४७ ॥

प्लक्षं(क्ष) पत्त्राणि सेवते(न्ते) ताम्बु(म्बू)ली पत्त्ररूपतं(ताम्) ।
मुद्गा मरिचतां याति(न्ति) चूर्णा(चणा)न्याढकिरूपताम् ॥१४४८॥

आढ[27]क्यो हरिमन्थत्वं हरिमन्थोऽप[28](पि)माषता[29]म् ।
[30]अनेनैव प्रकारेण [31]सर्ववस्तुविपर्ययः ॥ १४४९ ॥

[32]अवनीजातका[33]र्पासं पा(पो)तक्यण्डतले क्षिपेत् ।
तस्मिन्दिने समाधाय [34]लाक्षावर्ती समाचरेत् ॥ १४५० ॥

१. A. drops this तैल । २. A. गंतंहरं । ३. A. ष्ण । ४. A. क्षक्षिपेत् । ५. A. सा । ६. A. तर्द्दिनेहरे । ७. A. वकव्यासीवध्य । ८. A. दूसो । ९. A. र । १०. D. चाकोल । ११. A. चांडीली । १२. A. बिवावलिभूवा । १३. A. द्व । १४. A. या । १५. A. त । १६. A. सुद्मे चंचलं वदरं । १७. A. स । १८. A. घु । १९. A. भ्रं । २०. A. drops this क । २१. A. प । २२. A. ख । २३. A. दतरं । २४. A. तागार । २५. A. षि D. खा । २६. A. कीं । २७. A. व्यकयोहरि मंश्वत्वं । २८. D. थ । २९. D. कं । ३०. A. ओनै । ३१. A. म । ३२. A. अउविजाल । ३३. A. प्यी । ३४. A. लांक्षाकं वर्त्तिमाचरोम ।

CC0. In Public Domain, Digitizagtion by eGangotri

कपिलाज्येन तद्वर्त्या प्र[1]दीपं यस्य दर्शयेत् ।
स नरो [2]नृपतिस्वास्थ्यं(र्वास्तु) तस्य कारञ्जतैल(लि)कः? ॥१४५१॥

[3]मुण्डीजलूकशेवारचूर्ण(र्णं)वे(भे) कवसोक्षितम् ।
[4]मल्लिकाश्रितल(म)स्याग्नि ज(र्जा)य[5]न्ति(ते)हिमशीतलः ॥१४५२॥

भेकस्य पयसा(वसया) लिप्तं पाणिं दहति नानलः[6] ।
[7]सयाच(वसया)सहिता शुण्ठी चवि(र्वि)ता वह्निलेपने? ॥ १४५३ ॥

[8]शुण्ड्या केवलया लिप्तं[9](प्तः) पाणिं धा(णिर्धा) रयतेऽनल[10]म् ।
मातङ्गी [11]प्राग्रजोलिप्त(प्तः) पाणिरग्नौ[12] न दृश्य(दह्य)ते ॥ १४५४ ॥

आरक्तपाटलामू[13]लं दन्तै[14]र्गाढतरं धृतम् ।
दिव्यार्थमहतो[15](सो) स्या(ह्य)ग्नेः शक्ति[16]र्घाताय कल्पते ॥१४५५॥

[17]ताम्बूलपत्रं मरिच[18]मारनालेन [19]पेषितम् ।
तेन लि[20]प्त्वा ततः पश्चा[21]त्तैलेनाभ्यज्य[22] मूर्ध्द(र्ध)जान् ॥ १४५६ ॥

तेषामुपरि सन्दीप्ता[23] व[24]र्तिर्नैव दहेच्छिरः[25] ।
अप्येकं मूर्ध्द(र्ध)जं वह्नि[26]र्नैव [27]दग्धुं भवेत्क्ष[28]मः ॥ १४५७ ॥

क्षारस्य[29] खरमञ्जर्या मूलं सम्पाद्य भस्मसा[30]त् ।
[31]तद्भस्मलेपितं गात्रं तोयं न स्पृशति स्फुटम् ॥ १४५८ ॥

हैमं गिरि[32]कदुर्गन्धामत्स्य[33]कल्कं सतैलकम् ।
नवनी[34]तयुतं तेन लिप्तां[35]श्चां(प्ताङ्गश्च जले) वसेत् ॥ १४५९ ॥

[36]जम्बूकबीजचूर्णेन सम्पाद्यं पादु[37]का [38]युगम् ।
तदाक्रम्योपरि स्वैरं भूमाविव जले व्रजेत् ॥ १४६० ॥

---

१. A. दि । २. A. नपतिस्थ्यं तकारजतैलकः । ३. A. मुडीजलूकशेवाभचूर्णवेकवसोक्षितं । ४. A. मच्छिकाश्रात लस्याग्रा । ५. D. यंती । A. यतिहिमशी । ६. A. ल । ७. D. drops this line । ८. A. शुद्धा । ९. D. प्त । १०. A. ल । ११. A. प्र । १२. A. ग्रै । १३. A. मुं । १४. A. गौ । १५. A. तसाग्रेः । १६. A. क्ती । १७. A. तांबुल । १८ D. चं आ । १९. A. लेषित । २०. A. प्ता । २१. A. द्यातै । २२. A. जं । २३. D. प्रां । २४. D. प्तांवर्ति । २५. A. स्थिरा । २६. D. drops this नैव । २७. A. ग्दग्धुभ । २८. A. वे क्षमः । २९. A. स्या । ३०. A. स्या । ३१. D. तत् भस्म A. तद्भस्मा । ३२. A. रंक । ३३. A. स्यकक्कंसं । ३४. A. नित । ३५. A. प्तात्प्रतो जले वसेत् । ३६. A. जंत्रुकबीज पु । ३७. A. द । ३८. A. म्युगं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चमरी[1]शक्र(कृ)दाहृत्य[2] पुरीषं करभस्य च ।
वज्रदुग्धतरो[3]र्मूलं पिष्ट्वा लिम्पेत्पदद्वयम् ॥ १४६१ ॥

पिबेच्च[4] माहिषं क्षी[5]रं [6]व्रजेना(ता)नेन यत्नतः ।
यथा स्थले [7]तथा तोये स्वेच्छया वर्त्त[8]ते नरः ॥ १४६२ ॥

चमरीमा(मां)समाहृत्य शोषयेत सशोषि(णि)तम् ।
तच्चूर्ण[10] विपचे[11]त्सम्यक् पयसा समस[12]र्पिषा ॥ १४६३ ॥

[13]घृतेनाङ्घ्रिं समभ्यज्य जलं तु विविशेच्छनैः ।
तत्राविशङ्कं विचरेद्यथा भूमौ तथा जले ॥ १४६४ ॥

राजहंसवसां पद्मं मृणालं कुष्ठमेव च ।
एतेषां पति[14]कं(मात्रिकं) भागं समं कृत्वा विपाचयेत् ॥ १४६५ ॥

विभी[15]तको[16]द्भवं तैलं [17]प्रशास्त(स्थ)मानं पयःसमम् ।
अनेन र(प)चितं मांसं न(प्रा)श्य[18]पाथशि(सि) संचरेत् ॥ १४६६ ॥

रुधिरं राजहंसस्य शृङ्गे खड्गस्य निक्षिपेत् ।
रक्तात्वचं[19] गुणं(चतुर्गुणं) सर्पिस्तैलं रक्ता [20]चतुर्गुणम् ॥ १४६७ ॥

दशाहं भूमिमध्यस्थं शृङ्गगुप्तं विधारयेत् ।
[21]सम्पूज्य बलिपुष्पाद्यैर्वि[22]धिना तत्समु[23]द्धरेत् ॥ १४६८ ॥

विलिप्य सर्वगात्राणि त[24]त्स्नेहेनाविश[25]ङ्कितः ।
[26]धरण्यामिव तोयान्तः स्वैरं वसति मानवः ॥ १४६९ ॥

क[27]मठस्य शिर[28]श्छित्त्वा देहमांसं[29] पचेद्[30] घृतम्(ते) ।
नृकपाले तु[31] तत्सर्पिर्धार[32]यित्वा शिवालये ॥ १४७० ॥

---

१. A. रि । २. A. त्या । ३. A. मु । ४. A. च म । ५. A. मी । ६. A. वृजैनाने यत्नत । ७. A. व । ८. A. र्तु । ९. A. नरि । १०. A. र्ण । ११. A. वेसम्यक । १२. A. र्प्पि । १३. A. ततस्तेनघ्रतेनाघ्रि समभ्यज्य जलंवशेत । १४. A. लि । १५. A. मि । १६. A. कोतृभ । १७. D. प्रशस्तमानं । १८. D. शः पाथसि । १९. A. वं । २०. A. च । २१. A. संपुज्य । २२. A. वि । २३. A. द्व । २४. A. त स्ने । २५. A. शांकि । २६. D. धारं । २७. A. मउठस्य । २८. A. रः छि । २९. A. मासे D. मांसं । ३०. A. घृ द्रू D. नृ घृ । ३१. A. तुरेत्सपि । ३२. इत्वा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अर्चयित्वा शिवा[1]न्तस्थं धारयेत्तत्(द्)धृतं घृतम् ।
चतुर्दश्यां[2] प्रयत्नेन तल्लि[3]प्साङ्गो जलं जये[4]त् ॥ १४७१ ॥

[5]पूरयि[6]त्वा प्रयत्ने[7]न वायुं जठरमध्यतः ।
वि(नि)रुध्य[8] रो(रे)चयेत्स्रो(स्तो)कं वाचमुच्चारयेज्ज[9]ले ॥ १४७२ ॥

शयान(नः)शयने य[10]द्वन्मीनवन्नम्रविग्रहः ।
दर्शयेत्सलिलस्त[11]म्भं जनविस्मयकारकम् ॥ १४७३ ॥

कृष्णमे[12]षीयमुत्पाद[13]जरायुकृतमुद्रिकम्(?) ।
फलानि या[14]चते यानि तानि वृक्षात्प[15]तन्त्यलम् ॥ १४७४ ॥

जातीफलं[16] सकनकं क[17]र्पूरं टङ्कणं तथा ।
[18]एषां कल्कप्रले[19]पेन भवेत्सर्वफले[20]धृतिः ॥ १४७५ ॥

अपामार्गफलैः[21] सिद्धं [22]महिषीदुग्धपायसम् ।
[23]भुक्त्वाम(क्त्वा न)[24]रः सुखं[25] तिष्ठ[26](ष्ठे)न्मा[27]समेकं क्षुधं विना ॥ १४७६ ॥

[28]सुश्वेता(श्वेता)करञ्जकामूलं दिव्यगव्यघृतं तथा ।
[29]शृगालोलू[30]कवसया मिश्रिता[31] गौरसर्षपाः[32] ॥ १४७७ ॥

एतत्सिद्धं समाधाय पादलेपं[33] समाचरेत् ।
[34]पञ्चाशद्योजन(नं) मार्गे(र्गं) गच्छन्त्या(त्या)याति तद्दिने ॥ १४७८ ॥

---

१. A. वंतस्स्थादाहरेतंध्रतं D धृतं धृतं । २. A. स्यां । ३. A. च्छिप्तागो । ४. A. यै । ५. A. पुर । ६. A. इ । ७ A. न्ने । ८. A द्व । ९. A. ज । १०. A. द्वीन्मीनवन्नग्रह । ११. A. स्तम्भे । १२. A. मं । १३. A. दाजरायु कतुमुद्रिक D. दजरायुष्कृत । १४. A. चि D. व । १५. A. तंत्पले । १६. A. ल । १७. A. पुं । १८. A. एतेषाकल्कम्र । १९. A. यें । २०. A. ध्व । २१. A. लै सिंद्ध । २२. D. मा । २३. A. भूत्कान । २४. A. र । २५. A. पं । २६. A. ष्टन् । २७. A. सकं क्षुधं विना । २८. A. श्वेतार्वाकरजजंघा मूलंगव्यघ्रतं तथा । २९. D. शृं । ३० A. लु । ३१. A. तं । ३२. A. पा । ३३. A. प । ३३. A. पंचांशद्यंजनं मार्ग्रे गच्छत्यायाति तदने ।

Dr. Urmila Sharma Collection, Varanasi

अनामिकांश[1]मिश्रेण शिखिकुक्कु[2]टति[3]त्तिरैः ।
[4]सक्तुत्तां गुटिकां कृत्वा वृश्चिका[5]कारवारिणी(?) ॥ १४७९ ॥

नीलमक्षिकया लिप्ता शस्त्रधारा समन्ततः[6] ।
निपा[7](ष्पा) द्या तत्र तत्र[8] स्यात्त[9]क्षणा[10]त्कीटसङ्गतिः[11] ॥ १४८० ॥

विलिप्त(प्तं) परिशु[12](तः) छिन्नारसेन[13] शतशः कृतम् ।
[14]मांस(सं) वस्त्र(स्त्रे) निबद्धं[15] साल(स्याल्ल)की[16] भवति
तत्क्षणात्(?) ॥ १४८१ ॥

एकचित्ता[17] भक्षयापि [18]पिंडी(ण्डी)तकसमुद्भवम्(?) ।
नि[19]गीर्ण(र्णं)निभृतं वापि मूलं [20]शस्त्र[21]भयापहम् ॥ १४८२ ॥

एकलि[22]ङ्गादेकवृक्षात्स्म[23]शानाभ्य(नेभ्यो) महोदधौ[24](महोदधेः)
विद्युन्नि[25]पतनस्थानान्मा[26]तृगेहाच्च सङ्गमात्[27] ॥ १४८३ ॥

तरङ्गि[28]णीतट[29]द्वन्द्वान्महालक्ष्मीं वि(क्ष्मीव)नादपि ।
धान्याङ्कुले[30] व(रेभ)[31]दन्ताभ्यां वृषभस्य विषाणतः[32] ॥ १४८४ ॥

[33]मृदो द्वादश सङ्ग्राह्या ता(स्ता)सु संयोज[34]येदिमाम् ।

उत्कण्टकी[35] स्वरी[36] वन्ध्याक[37]कौंटी वैष्णवी[38]मपि ॥ १४८५ ॥

[39]कर्कोटी तुलसी चैव चन्द्राली[40]मिन्द्रवारुणी[41] ।
कन्यापु[42]ष्पं च तत्सर्वं छागरक्तेन [43]लेपयेत् ॥ १४८६ ॥

[44]पङ्केनानेन लिप्ताङ्गः स(सं)ग्रा(ङ्ग्रा)मे यदि वान्यतः[45] ।
[46]शस्त्रैर्न [47]बाध्यते मृत्यो[48]र्बलिभिश्चापि [49]पीडितः ॥ १४८७ ॥

---

१. A. श्रुवि । २. A. कुं । ३. A. तिरैं । ४. A. तक्तां चगुष्टिकां कत्वा । ५. A. कांक्त्रधावारिणी । ६. A. drops this त । ७. A. प । ८. A. त्व । ९. A. त । १०. A. कि । ११. A. ति । १२. A. ञ्यु । १३. D. च A. नशतस । १४. A. सास । १५. A. वंद्धं । १६. A. कि भवति तक्ष । १७. A. ता । १८. A. पिडतकसमुद्भवा । १९. A. गिर्णत्रि । २०. A. शा । २१. A. भयापह । २२. A. लिगा । २३. A. तृश्म । २४. A. धं । २५. A. त पत । २६. A त्रमेहाव संगमा । २७. A. न् । २८. A. ण । २९. A. टेद्वंद्वामा । ३०. D. लं । ३१. A. दंत्याभ्यां । ३२. A. ता । ३३. A. मृ द्वोदस । ३४. A. जनोदि । ३५. A. का । ३६. A. स्वरी । ३७. A. कोंटि । ३८. A. वि । ३९. A. कांटितुलसीचैव । ४०. A. लिमिद्र । ४१. A. णि । ४२. A. पुष । ४३. A. पोपयेत् । ४४. A. पंक्तेना । ४५. A. त । ४६. A. शा । ४७. A. वा । ४८. A. त्पाव । ४९. A. पाडातः ।

त[1]क्रीरी तु जया प्रोक्ता विजया चाग्नि[2]मन्थकाः ।
तयोर्विकरणाल्लेपाच्छस्त्रघातं जये[3]न्नरः ॥ १४८८ ॥

एवमादिप्रयोगैश्च[4] त्रि(वि)चित्रैरपरैरपि ।
[5]चित्तभ्रा[6]न्ति(न्तिं)मही[7]पालो विदध्या[8]द्विदुषा[9]मपि ॥ १४८९ ॥

हरिमे[10]खलादिशास्त्राणि चालोड्य [11]पृथिवीपतिः ।
दिव्यं(व्य) तन्त्र(न्त्र)क्रियायोगै[12]र्मोहयेन्मानसं नृणाम् ॥ १४९० ॥

[13]आहूय प्रेक्ष[14]कान् सर्वान् स्वदेश[15]परदेशजान् ।
प्रेयसी[16] च(श्च) कुमारी[17] च(श्च) तथा [18]मन्त्रिमहत्तरान् ॥१४९१॥

प्रासा[19]दे सुस्थितो वापि [20]प्राङ्गणे वा मनोहरे ।
चमत्कारविनोदं तु दर्शये[21]ल्लोकरञ्जकः ॥ १४९२ ॥

चमत्कारविनोदोऽयं सर्वलोकमनोहरः ।
विक्रमादित्यपुत्रेण सोमभूपेन भाषितः[22] ॥ १४९३ ॥

सुजनहृ[23]दयभूमौ [24]हर्षचातुर्यकन्दं
रिपुषु[25] भयविवृद्धिं[26] धातु(चानु)रागं प्रियासु ॥
जनयितुमिहशास्त्रे मानसोल्लासनाम[27]—
न्यवददिति[28] विनोदा[29]न् विंश[30]तिं सोमभूपः ॥छ॥ ॥छ॥ ॥छ॥
॥ १४९४ ॥

इति श्रीमहाराजाधिराजसत्याश्रयकुलतिलक[31]चालुक्याभरण—
श्रीमद्भूलो[32]कमल्लश्रीसोमेश्वरदेवविर[33]चिते[34]ऽभिलषितार्थ-
चि[35]न्तामणौ
मानसोल्लासे प्रमोदकविनोदकथने चतुर्थोऽध्यायः[36] ।

---

१. A. त क्री रि । २. A. ग्निमथक । ३. A. येनर । ४. A. श्व । ५. A. वि । ६. A. भृंति । ७. A. हिप.ले । ८. ध्मा । ९. A. खा । १०. A. मेषलादि D. मेखलादी । ११. A. प्रथवीपति । १२. A. गैमो । १३. A. आहु D. व्याहू । १४. A. कास । १५. A. देशे । १६. A. सिथ । १७. A. रिच । १८. D. मंत्री । १९. A. सांदंतस्थितो । २०. A. प्राग । २१. A. येलो । D. येत् लो । २२. A. तं । २३. A. दुदय । २४. A. हर्षपवर्षरिपु । २५. A. उ । २६. A. द्धियानु । २७. D. मा । २८. A. त । २९. A. दाविं । ३०. A. शतिसोमभूप । ३१. A. च । ३२. A. लक । ३३. A. रचते । ३४. A. ते अमिलीपी । ३५. A. चिन्तामनौ । ३६. D. ॥ छ ॥ छ ॥ ग्रन्थ ७००६ ॥ छ ॥ A ॥ ४ ॥

CC0. In Public Domain, Digitizagtion by eGangotri

[1]विंशतिश्च समाख्याता विनोदाः[2] सोमभूभु[3]जा ।
अधुना [4]भूधरक्रीडा[5] वक्ष्यतेऽतिमनोहरा ॥ १ ॥

[6]तत्र चित्रद्रुमोपेतं वनं कुर्यात्समन्ततः ।
तन्मध्ये रुचि[7]रं रम्यं क्रीडाहेतोर्मनोहरम् ॥ २ ॥

कारयेत्पर्वतं राजा [8]तुङ्ग[9]शृङ्गविराजि[10]तम् ।
नानावृक्षसमाकीर्णं सुविशालशिलातलम् ॥ ३ ॥

तत्र चित्रफला वृक्षास्त[11]त्प्रयोगविनिर्मिताः ॥
अन्यपत्रान्य[12]फलकाः पुत्रवत्परिपालिताः ॥ ४ ॥

अन[13]न्तफलभूयिष्ठाः सर्वकाल[14]फलान्विताः ।
लघवोऽपि महा[15]कायाः प्रशस्ताः कुब्जतां गताः[16] ॥ ५ ॥

अन्य(न्ये)स्वादुफलोपेतास्तात्कालिकफलोदयाः ।
प्रयत्नेन[17] कृताः शैले नाना फलमही[18]रुहाः ॥ ६ ॥

स्वभावपक्व[19](क्व)फलितं(तो)निर्दोषं शुष्क[20]मानपे(तपे) ।
फलवीजं[21] समालिप्तं गोमये दिनपञ्चकम्[22] ॥ ७ ॥

विडङ्ग[23]घृत[24]धूपेन धूपितं कारये[25]त्(द्)भृशम् ।
सर्वेषामेव वृक्षाणां(णा)मेष बीजविधिः[26] स्मृतः[27] ॥ ८ ॥

गोक्षीर[28]भावितं बीजं दशरात्रं निरन्तरम् ।
छायाशुष्कं च मिलितं [29]व्याघ्रीदुग्धेन भस्मना ॥ ९ ॥

यवगोधु[30](धूम)मिलितं गोमयेन प्रलेपितम् ।
स्थापयेत्[31] क्षीरवृक्षाणां [32]विधेयं(या)बीजसंस्मृ(स्कृ)तिः ॥ १० ॥

---

१. A. विंशति शूमख्याता । २. D. दः । ३. A. भू । ४. A. भु । ५. A. क्रिडावक्षते । ६. A. ततत्रच्चित्र द्रुमे । ७. A. चिरंम्यं । ८. A. तृगं । ९. A. शृंगं । १०. A. ते । ११. A. तत्र यो विनिर्मिताः । १२. A. प । १३. A. त्यंत फलभूपि । १४. D. ले । १५ A. हा । १६. A. तः । १७. A. नंकृतानाना । १८ A. हि रुहा D. हीरुहां । १९. D. क्ष । २०. A. ष्कमायतं । २१. D. ज । २२. A. पञ्चक । २३. A. घ्र । २४. D. दीपेन । २५. A. येद्भृवा । २६. A. धि । २७. A. त । २८. A. क्षिर । २९. A. थाघ्री संकुततभस्मना । ३०. A. धुमसिल्तं D. सूत्र । ३१. A. येक्षी । ३२. A. द्विविधंत्राजसंस्मृती ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुस्वा[1]दुसलिले देशे वल्मी[2]कोपलवर्जिते ।
भूरिमृत्स्ने तथा स्निग्धे तुषारपरिवर्जिते[3] ॥ ११ ॥

ति[4]लानुप्त्वा तथा माषान् दृष्ट्वा पुष्पफलोर्जितान् ।
तस्मि[5]न्नुपवनं कुर्यात्क्रीडाशैले समन्ततः[6] ॥ १२ ॥

षोडशैकादशाष्टौ [7]वा तथा हस्ताश्चतुर्दश[8] ।
कर्त[9]व्यं [10]रोप्यमाणाना[11]मन्तरालं महीरुहाम् ॥ १३ ॥

बृहन्मध्यकनि[12]ष्ठानां ज्ञात्वा विस्तारयोगि[13]ना(ता)म् ।
अन्तरालविकल्पोऽयं कथितस्तरुकोविदैः ॥ १४ ॥

चतुर्हस्तमितं [14]खातं कृत्वा[15] तन्मात्रविस्तृतम् ।
प्रचुरास्थिकरी[16]षाभ्यां पूरयि[17]त्वा दहेद् भृ[18]शम् ॥ १५ ॥

अपसार्य[19] ततो भस्म[20] पूरयेद्वालुकां [21]मृदा ।
अजामांसवसा[22]सेकं कुर्यात्तनुरक्तवारिणा ॥ १६ ॥

उप्तेषु तत्र[23] बीजेषु जाय[24]न्ते शोभना द्रुमाः[25] ।
यद्वान्यतः[26] समानी[27]य समूला एव रोपिताः[28] ॥ १७ ॥

अशोकनिम्बपुन्ना[29]गबकुलो(ला) नागकेसरः ।
शिरी[30]षस्तिलकश्चैवमुप्यते(न्ते)प्रथमं वने ॥ १८ ॥

सु(सु)खारोग्य[31]यशोवृद्धिलक्ष्मीविजय[32]वृद्धये[33] ।
सौभाग्यार्थमिमे[34] वृक्षाः कर्तव्या भूभृता वने ॥ १९ ॥

[35]पलाशः काञ्चनारश्च [36]चिञ्चा श्लेष्मात[37]कोऽर्जुनः ।
करञ्जश्चे[38]त्यमी वृक्षा नारोप्याः[39] सुखिना वने ॥ २० ॥

---

१. A. खा । २. A. र्णिकोयवर्जते । ३. A. र्जंत । ४. A. तिलान् मुद्गा । ५. A. ननुप्रवन । ६. A. त । ७. A. वा नेस्तथा । ८. A. शा । ९. A. त्त । १०. A. रों । ११. D. नां अंतरालंमहिरुहं । १२. A. बृहन्मध्यक मिष्टा । १३. A. गी । १४. D. ख्या । १५. A. त्व । १६. A. करीकभ्यां । १७. A. इंचा । १८. A. हेभृशं D. हेतृभृशं । १९. D. र्यं । २०. A. स्मा । २१. A कामद । २२. A. मेकं कुर्यातग्नु । २३. A. त्राषिजे । २४. A. यते । २५. A. म । २६. A. तममा । २७. A. निय । २८. A. ता । २९. A. पुंत्राग वकुलो नागकेशरः । ३०. A. रिपस्तिलकश्चैवमुप्यंते । ३१. A. गंपशोवृद्धि लक्षं । ३२. D. सि । ३३. A. येः । ३४. A. वेवृक्षा कर्त्तव्या भूभृताचने । ३५. D. पा । ३६. A. विंचो । ३७. D. ष्मांत । ३८. A. चेति-वृक्षा । ३९. A. प्या ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हेमन्ते शिशिरे देयं तोयमेकान्तरे दिने ।
वसन्ते च तथा ग्री[1]ष्मे देयं प्रातः सदा बुधैः ॥ २१ ॥

वर्षासु च[2] शरत्काले यदा शुष्कं मही[3]तलम् ।
तदा देयं जलं तज्ज्ञैराल[4]वाले महीरुहाम् ॥ २२ ॥

आलवालस्थितं तोयं शोषं न[5] भजते यदा ।
अजीर्णं[6] तद्विजानी[7]यान्न देयं तादृशे(शं) जलम् ॥ २३ ॥

खनित्वा च तथा भूमिं शोषयि[8]त्वा स्थितं जलम् ।
प[9]श्चात्तु सेचनं कार्यं वृक्षाणां वृद्धिमिच्छता[10] ॥ २४ ॥

नीहाराच्चण्डतापाच्च[11]धूमाद्वैश्वानरात्तथा ।
जालकाराः[12](रात्)प्रयत्नेन रक्षणीयाः[13] क्षमारुहः[14] ॥ २५ ॥

समी[15]पजातं यत्नेन तृणगुल्मलतादि[16]कम् ।
समूलं च समुत्पा[17]ट्य(ट्यं)द्रुमाणां वृद्धिमि[18]च्छता ॥ २६ ॥

विद्युता दग्धवृक्षस्य भूमिमादाय[19]नन्दने ।
रक्षार्थं विक(कि)रेद्रे[20]षां तया न[21]हिमबाधनम् ॥ २७ ॥

सिता(त) शाल्योदनं दध्ना सैन्धवेन युतं वने ।
क्षेपणीयं मही[22]पृष्ठे करकावृष्टि[23]वारकम् ॥ २८ ॥

निशाविडङ्गसिद्धार्थैः[24] पुष्पैरर्जुनसम्भवैः ।
मत्स्यरोहित[25]मांसेन[26]धूपं कुर्याद्विचक्षणः[27] ॥ २९ ॥

[28]धूपोऽयं फलपुष्पाणां सम्पत्तिं कुरुते भृशम् ।
घुणा[29]दीन्वारयत्याशु[30] [31]वृक्षरोगांश्च नाशयेत् ॥ ३० ॥

---

१. A. ग्रि । २. A. व । ३. A. हा । ४. A. वा । ५. A. नत्रते । ६ A. जिण । ७. A. नियानिदेयां ताडशे । ८. A. ईत्वास्थिरं । ९. श्वा । १०. A. त । ११. A. च धूमाद्वैश्वानराद्गुणा । १२. A. रां D. कराः । १३. A. णिया । १४ A. हा । १५. A. मिप । १६ A. दिकसमुलं । १७. A. समुत्पाद्य । १८. D. मीलिता A. मिच्छताम् । १९. A.या । २०. D. द्रेखां । २१. A. हिमवा D. ह्यप्पत्रा । २२. A. हिप्र । २३. A. कारकं । २४. A. र्थे । २५. A. मासेन । २६. A. धु । २७. A. णा । २८. A. धुपोयंफलपुष्पाणांसंपतिं । २९. A. दित्वा । ३०. A. शु । ३१. A. वृरोगाश्च नाशये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विडङ्गहिङ्गु[1]सिन्धूत्थमरिचा[2]ति[3]विषावचाः[4] ।
भ[5]ल्लातकं तथा शृङ्गं माहिषं समभागतः[6] ॥ ३१ ॥

एतै[7]र्विरचितो योगो निहन्यात्[8] कि(कृ)[9]मिकीटकम् ।
उद्याने पादपानां तु सर्वव्याधिविनाशनः[10] ॥ ३२ ॥

[11]बीजावापात्समारभ्य[12] कुम्भेनैकेन सेचयेत् ।
यावद्वर्षं ततः[13] कुम्भं प्रतिवर्षं विवर्धयेत्[14] ॥ ३३ ॥

समानां विंशति[15] या(र्यां)वत्ततस्तेनैव मान[16]तः ।
जलं दे[17]यं प्रयत्नेन यथाकालं महीरुहाम् ॥ ३४ ॥

सर्वं[18]त्तु(र्तु)कफलोपेताः सर्वदा फलशो[19]भिताः ।
शफरी[20]घृतसिद्धार्थ[21]कदली[22]दलनिर्मितः[23] ॥ ३५ ॥

धूपः[24] करोति वृक्षाणां सस्निग्धं फलदं पदम् ।
[25]अङ्कोल[26]क्वाथतोयेन मिश्रितं[27]घृतमाक्षिकम् ॥ ३६ ॥

वसा किरि[28]क(कु)रङ्गणामेतैः सिक्ता महीरुहाः ।
[29]सर्वर्तुकफलोपेता(ः)सर्वदा फलशोभित(नः) ॥ ३७ ॥

दृश्य[30]न्ते नन्दने वृक्षा दलपुष्पफलान्विताः[31] ।
विडङ्गैर्मधुसर्पिभ्यां(र्भ्यां)क्षीरेण कृतसेचनाः[32] ॥ ३८ ॥

धूपिता नत[33](जतु)कुष्ठाभ्यां क्षीरवृक्षाः[34] सदाफलाः[35] ।
कुष्ठक्वथिततोयेन गवां क्षीरेण मेदसा ॥ ३९ ॥

अज[36]गरस्य संसिक्तां(क्ता)वल्लयः स्युः सदाफलाः ।
[37]वृश्चिकाकारवृक्षाणां गो[38]घृतेन च धूपिताः ॥ ४० ॥

---

१. A. संधुधघ । २. A. चारतिविषा । ३. D. वचा । ४ A. चा । ५. A. भाला । ६. A. त । ७. A. तैविरचितोभूपौतौं । ८. A. न्याक्रि । ९. A. मक्रि । १०. A. ने । ११. A. विजानापास । १२. A. क्ष्य । १३. A. त । १४. A. द्धये । १५. D. तिं । १६. D. ग । १७. A. दैयं प्रयत्नेन यथाकालमहीरुहं । १८. A. वैर्त्तुकफलीपेता । १९. A. शोता । २०. A. रिघ्र । २१. D. थैं । २२. A. ल्लि । २३ A. निमिता । २४. A. पं । २५. D. अकोल्ल । २६. A. क्वातो । २७. A. घ्रतं । २८. A. रकरंगाणां मैंतैसिक्तामहि । D. रिमितंगा । २९. D. drops this line । ३०. A. श्यते । ३१. A. ता । ३२. A. मधुसपिंभ्यां क्षीरेणकृतसेचना । ३३. D. कुष्टा । ३४. A. क्षा । ३५. A. ला । ३६. A. अ गरस्यससिक्तां चलयस्फसदाफा । ३७. D. वृश्चिककंटकंविद्धां । ३८, A, घ्रतेन च धूपित। ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किरि[1]मूषकमेदोभ्यां सिक्ता [2]वल्ल्यः सदाफलाः[3] ।
कृकवाकुम[4]ले क्षिप्ते [5]मत्स्यस्य [6]पललाम्बुनी(नि) ॥ ४१ ॥

द्राक्षा भवति सुस्वा[7]दुर्भू[8]यिष्ट(ष्ठ)फलशोभिता[9] ।
सारङ्गजमार्जारक्रोध(ड)चापफ(षप)लेन च ॥ ४२ ॥

मेदसा पयसा सिक्ता दाडिमी[10] [11]स्वादुसत्फला ।
यस्य कस्यापि पललं गोक्षी[12]रं गु(रगु)ड मिश्रि[13]तम् ॥ ४३ ॥

तेन सिक्तेषु [14]मूलेषु नार[15]ङ्गी स्यात् फलोर्जिता ।
मधुक्रोडवसायुक्त[16]मङ्कोल[17]क्राथितं [18]जलम् ॥ ४४ ॥

तेन [19]मूलेषु संसि[20]क्ताश्चू[21]ताः स्युः[22]फलिताः[23] सदा ।
कमलस्य पलाले(शे)न [24]कृतसंवेष्टनक्रियः[25] ॥ ४५ ॥

हर्षकण्टकितानी[26]व फलानि पनसो वसे(हे)त् ।
मधुसर्पि[27]गु(र्गु)डः(ड) क्षी[28]रैः फलि[29]ले(पलले)न विमिश्रितैः[30] ॥४६॥

कपित्थश्रीद्रुमौ सिक्तौ[31] [32]भूति(रि)[33]स्वादुफलान्वितौ ।
प्रथमं कुसुमोत्प[34]त्तेः कुमारेण [35]कृते क्षते ॥ ४७ ॥

[36]जपायां(पया)तिलचूर्णेन [37]मधुना सर्पिषा तथा ।
कर्द[38]माकृतिना[39] तेन [40]क्षतदेशविलेपिता ॥ ४८ ॥

फलान्यामल[41]की सूते स्वा[42]दूनि बहुलानि च ।
सूकराश्व[43]शकृद्वह्नि[44]तप्तसूची[45]विभेदि[46]ता ॥ ४९ ॥

---

१. A. कि र । २. A. यल्ला । ३. A. ला । ४. A. मंले । ५. A. पश्यस्य । ६. A. फल । ७. A. स्वादु । ८. A. भूइंष्ट । ९. D. ताः । १०. A. डिमि । ११. A. सा । १२. A. गोक्षि । १३. A. मिश्री । १४. A. सुमुलेपु । १५. A. रंगिस्यात्फलोर्जितं । १६. D. मक्कोल्ल । १७. A. काथि । १८. A. डाला । १९. A. मुले । २०. A. सक्ता । २१. A. चुता । २२. A. स्या । २३. A. ता । २४. A. कष्टसंवष्टन । २५. A. त्रिया । २६. A. निव । २७. A. सर्पि । २८. A. क्षिरे । २९. A. लनेनत्र । ३०. A. श्रितौं । ३१. A. सि क्तौं । ३२. A. भूमि । ३३. A. सादु । ३४. A. त्पते । ३५. A. क्रते । ३६. A. जपाया । ३७. A. समेन मधुसर्पस । ३८. D. र्द । ३९. D. नस्ते । ४०. A. क्रतदेश D. क्षतदेशे । ४१. A. लिक्त । ४२. A. स्वादु । ४३. A. सुकराश्व D. श्व स । ४४. A. त म । ४५. A. सूचि । ४६. A. दता D. दिताः ।

Dr. Urmila Sharma Collection, Varanasi

फल[1]गर्भसमु[2]द्देशो रम्भा भूति(रि)फला भवेत् ।
विडङ्गमाषमधुक [3]सु(मु)राभिर्जातिशीतलैः ॥ ८० ॥
चूर्णितै[4]र्मदिरामिश्रैः[5] ल(लै)वणेन सम[6]न्वितैः ।
कृतलेपो विभावर्यां[7]फलहीनोऽपि सर्वदा ॥ ८१ ॥

[8]नालिकेरतरुः[9] सूते बहुस्वादु [10]बृहत्फलम् ।
तिलस्य[11] मधु[12]यष्टि(ष्टे)श्च [13]चूर्णेन समभागतः[14] ॥ ८२ ॥

मिश्रा[15]भ्यां क्षौ[16]द्रतोयाभ्यां सर्वां[17] कुसुमजन्मना ।
मूले[18]षु कृतसंसेका बदरी फलति[19] क्षणात् ॥ ८३ ॥

मधुराणि सुगन्धा(न्धी)नि महान्ति च फलानि सा[20] ।
द्विपेन्द्र[21]दन्तचूर्णाग्नितप्तस्वर्ण[22]शलाकया ॥ ८४ ॥

फलमूले तले विद्धा[23] रम्भा स्थूलफला [24]भवेत् ।
दन्तिदन्तमयी[25] भोडी[26](यक्षोदः)क्रोडदंष्ट्रोद्भवानि(वेन) च ॥ ८५ ॥

पूतिता(ना) गजदानेन [27]कन्ददेशे निवे[28]शिता(तः) ।
निगू[29]हिता(तो) मृदा चाढं[30] कदल्या(:)कुरुते [31]भृशम् ॥ ८६ ॥

करीन्द्रदशनाकारधारिणीं[32] फल[33]सम्पदा[34]म् ।
पिण्याकमदिराबी[35]जमत्स्याखु[36]पललेन च ॥ ८७ ॥

सिद्धे[37](न)वारिणि संसिक्ता(वारिणा सिक्ता) बीजपूरा [38]बृहत्फला ।
[39]राजजम्बूदलो[40]शीरमुस्ताक्वाथेन[41] सेचिता (तः) ॥ ८८ ॥

आम्रोऽपि सहकारः स्यात्सहकारो[42]ऽतिसौरभः ।
तुरङ्ग[43]करिसार[44]ङ्ग शृगाला(लो)क्षोत्त्थमेद[45]सा ॥ ८९ ॥

---

१. D. ला । २. A. देशे । ३. A. सुसुराभिजातिशितलें । ४. A. मर्दिरा । ५. A. श्रौ । ६. A. मंन्वि । ७. A. र्याफल्हिनो । ८. A. ताल । ९. A. तरु । १०. A. बृहफ । ११. A. श्व । १२. D. भूयिष्टश्च । १३. A. चु । १४. A. त । १५. A. श्री । १६. A. क्षो । १७. D. र्वां । १८. A. मूलपु । १९. A. तितक्ष । २०. A. शा । २१. A. द्विपेद्रदंतचुर्णोग्नि । २२. D. र्णे । २३. A. द्वान् । २४. A. भवे । २५. A. यि । २६. A. डदंष्ट्रोष्ट्रोद्ध । २७. A. कंर्द । २८. A. येतिस । २९. A. गु । ३०. A. ढ । ३१. A. भ्र । ३२. A. णि । ३३. A. लं । ३४. A. दम् । ३५. A. व । ३६. A. षु । ३७. A. द्धनयारिणासिक्रा । ३८. A. बृहफ । ३९. D. दिव्य । ४०. A. शिरा । ४१. A. ना । ४२. A. रःसु । ४३. A. किर । ४४. A. रंगाश्लंगा । ४५. A. घस ।

CC0. In Public Domain, Digitizagtion by eGangotri

कथिते[1]न सदुग्धेन [2]पञ्चपल्लववारिणा ।
कृतसेको भवेदाम्र[3]ः सहकारः सुसौरभ[4]ः ॥ ६० ॥

[5]एष एव [6]सुरायुक्तः प्रयोगः[7] कुरुते भृशम् ।
सर्वासां पुष्पजाती[8]नां करोत्यामोदमुत्तमम् ॥ ६१ ॥

क्वण[9]द्भ्रमरवृन्देन वाचालितदिगन्तराम्[10] (रम्) ।
कुब्जशोणितयुक्ताय(क्तोयं)नागपुन्नागकेसरान् ॥ ६२ ॥

पुष्पवृद्धियुतान्वृ[11]क्षान् कुर्याद्गन्धमनोहरान् ।
तरुण्या नूपुरोपेत[12]पादघातेन ताडितः[13] ॥ ६३ ॥

अशोको विकसत्याशु सु(मु)खमध्ये(ध्ये)न केसरः ।
मदा[14]हतेन [15]नेत्रेण [16]ताडितस्तिलक[17]द्रुमः ॥ ६४ ॥

कामिनी[18] कर्ण[19]पूरेण पुन्नागो नागचम्पकः ।
कामिनी[20] कुचपाटीर पार[21]णे नि(परागैस्ति)लकद्रुमः[22] ॥ ६५ ॥

विधत्ते कौसुमीं[23] वृत्तिं मकरन्दोदविन्दुभिः[24] ।
विवा[25]हविधि[26]ना युक्ता [27]कृतकौतुकमङ्गला ॥ ६६ ॥

निकटस्थद्रुमे[28]नोदा(ढा)[29] श्यामा पुष्पवती[30] भवेत् ।
दिनान्ते घु(सु)रया युक्ताः करवीराः[31] [32]कुरण्टकाः ॥ ६७ ॥

माधव्यः [33]सुवते पुष्पं सर्वकालं मनोहरम् ।
पलालवह्नि[34]ना दग्धा मल्लि[35]का शी[36]तकातरा ॥ ६८ ॥

पुष्पाणि प्रचुरं [37]शीते(सूते) भृङ्गवृन्दमुदाह्न[38]तम् (वहा) ।
क्षीरेण सेचि[39]ता मूले जपा[40] कुसुमलो[41]हिता ॥ ६९ ॥

---

१. A. तेरनस । २. A. पचपल्वारण । ३. A. म्र । ४. A. भ । ५. A. ग । ६. D. सुयुक्तप्रयोगः A. सुरान्युक्त । ७. A. ग । ८. A. ति । ९. A. णुद्भ्र । १०. D. तू । ११. A. न्क्ष । १२. A. ते । १३. A. त । १४. A. हा । १५. A. न । १६. A. स्ता । १७. A. कं । १८. A. निर्क । १९. A. पु । २०. A. नि । २१. A. रंगैस्ति । २२. A. म । २३. A. मात्वर्त्तिमकर । २४. A. भि । २५. A. हाय । २६. A. ध । २७. A. क्र । २८. A. मोनाटा । २९. A. स्या । ३०. A. ति । ३१. A. रा । ३२. A. कुरुरंटका । ३३. A. सुनते D. सूवते । ३४. A. हि । ३५. A. ल्ली । ३६. A. शा । ३७. A. शि । ३८. A. द्रुतं D. हरं । ३९. A. वि । ४०. A. य । ४१. A. ले ।

Dr. Urmila Sharma Collection, Varanasi

धवलं[1] कुसु[2]मं [3]सूते शशाङ्ककिरणोज्ज्व[4]लम्।
कर्णिकारजपाशोकबाणाम्रातकभूरु[5]हाः। ७० ॥

[6]सुवते धवलं पुष्पं योगेनानेन[7] नन्दने[7]।
आसमृत्या[8](त्सा)च सकला[9] पुष्पसौरभवापिताः[10](सिता)॥७१॥

[11]शनिभौमविनिक्षिप्ता द्रुमाणां कुसुमोकरे (त्करे)।
एकाहान्तरसंसिक्ता[12] गन्धतोयेन भूयसा ॥ ७२ ॥

मासमात्रेण कुर्वन्ति(रुते) गन्धहीनाऽपि सौरभम्।
यस्य कस्यापि[13] पुष्पस्य सौरभेणाधि[14]वासिता (न्) ॥ ७३ ॥

मृत्तिका [15]शकलान्मूले[16] वृक्षाणां बहु[17]ला(न्)क्षिपेत्।
गन्धपत्रसु(मु)रामुस्तात[18]गरोशीरचूर्णकैः ॥ ७४ ॥

मिश्रि[19]तेनाम्भसा से[20]कै(क)स्ततः सौरभसम्भवः[21]।
मध्वाज्यलेपिते [22]बाल्ये शै[23]शवे [24]सूत्रवे[25]ष्टिते ॥ ७५ ॥

एकीभूय प्रसूये[26]ते सि[27]तलोहितमञ्जरी।
मधुना लेपिता वल्ली [28]सूते पुष्पं सुलोहितम् ॥ ७६ ॥

सर्पिषा[29] लेपिता सूते[30] सि[31]तं पुष्पं मनोहरम्।
मधुना [32]सर्पिषा चैव कुमुदाम्भोजकन्दपौ(योः) ॥ ७७ ॥

कलायस्य[33] च [34]चूर्णेन कर्दमेन [35]च पूर्णयोः।
एकेनैव तु [36]बा(ना)लेन द्वे[37] पुष्पे [38]भवतः शुभे ॥ ७८ ॥

कुसु[39]दं कमलं चैव सरस्याश्चर्यकारके।
कुनटीहरि[40]तालाभ्यां जल[41]सूकरमेव(द)सा ॥ ७९ ॥

---

१. A. णं। २. A. रु। ३. A. सु। ४. A. द्वा। ५. A. राहा। ६. A. सूय। ७. A. नेनन्दन। ८. A. न्या। ९. D. शकलाः। १०. A. ता। ११. D. drops this line। १२. D. त्ताः। १३. A. प। १४. A. का। १५. A. स। १६. A. मू। १७. D. ह। १८. A. गतरोशिरचुर्णकं। १९. A. श्रीते D. श्रितो। २०. A. सेकेस्तत D. मेकैस्ततः। २१. A. व। २२. A. वाल्यै D. वल्यौ। २३. A. सेसिवे। २४. A. सु। २५. A. चे। २६. A. य। २७. A. तूलोहतमञ्जर। २८. A. सु। २९. A. षलि। ३०. A. त्ते। ३१ A. सा। ३२ A. सीर्प्पवाकुसुदांभोजकंदपौ। ३३. D. स्याश्च। ३४. A. चु.। ३५. A. व। ३६. A. बालेना। ३७. A. द्वौं। ३८. A. भं। ३९. A. म। ४०. A. र। ४१. A. सु।

दुग्धेन चम्पकः[1] सिक्तः[2] के[3]सर[4] प्रसवो भवे[5]त्।
यष्टी[6]कुलत्त्थ[7]चूर्णेन मधुना च [8]विमिश्रितैः ॥ ८० ॥

सलिलैः[9] सेचिता(तो) [10]मूले तप्तवर्णा(र्णो)मधू[11]कसूः।
नृमां[12]साङ्को[13]ल्लतैलाभ्यां सप्तवासरवासि[14]तम् ॥ ८१ ॥

करकामृत्तिकाव्युप्तं बीजं सद्यः प्ररोहति।
एकविंशतिवारेण कु[15]क्कुटस्यासृजोक्षितम् ॥ ८२ ॥

तत्क्षणादा(दा)डिमी[16]बीजं व[17]र्द्धते फलति[18] ध्रुवम्।
मत्स्य[19]क्रोडवसामां[20] सदुग्धेन परिभा[21]वितम् ॥ ८३ ॥

यस्य कस्यापि वा[22] बीजं द्रुतं पुष्पफलं भवेत्।
[23]पक्वमाम्रतरोर्बीजं निहि[24]तं दिनसप्तकम् ॥ ८४ ॥

मत्स्यक्रोडवसातैल[25] [26]घृतदुग्धेषु सन्ततम्।
बृहतीतिलकाण्डानां भस्मना मिलितं ततः[27] ॥ ८५ ॥

[28]व्युप्तं रोहति सद्यस्तु पुष्पि[29]तं फलि[30]तं भवेत्।
नर [31]मांसवसारक्तदन्तिदन्तविचूर्णितैः[32] ॥ ८६ ॥

मिश्रि[33]तेनाम्भसा सिक्ता[34] रम्भा मानफला भवेत्।
कोलशोणितमेदोभ्याम[35]ङ्कोलं (ल्ल)[36]क्वथितेन च ॥ ८७ ॥

सेचि[37]ता कदली [38]सूते दाडिमीफलमुत्तमम्।
यष्टीमधुकपुष्पाणि श्वेतकुष्टं समाक्षिक[39]म् ॥ ८८ ॥

निष्पावाङ्गु(ङ्गु)लिकां कृत्वा मूलं निष्कृष्य निक्षिपेत्।
इमं प्रयोगं वृक्षस्य यस्य कुर्याद्विचक्षणः[40] ॥ ८९ ॥

---

१. A. क। २. A. कं। ३. A. श। ४. D. रः। ५. A वत्। ६. A. ष्टि। ७. A. चुर्णेना। ८. A. लिमिश्रीतै। ९. A. लैसेवि। १०. A. मुलेस्तसवर्णा। ११. A. धु D. धूः। १२. A. सां। १३. A. को। १४. A. ताम्। १५. A. कुस्या...सृजोक्षितम् D. क्कुट्ट। १६. A. मिबि। १७. A. द्वन्ते। १८. A. ते। १९. A. त्स। २०. A. मांद्रु। २१. A. क्षा। २२. A. चावि। २३. A. एक। २४. A. हं। २५. D. लं। २६. A. द्यु। २७. A. तं। २८. A. द्यु। २९. A. ष्पी। ३०. A. ली। ३१. A. मांकसा। ३२. A. तैं। ३३. A. श्र। ३४. A. क्तांभमान। ३५. A. मंक्कोभं। D. मंक्कोल्लं। ३६. A. क। ३७. A. वि। ३८. A. स। ३९. A. काम्। ४०. A. णा।

फलं निरस्थिकं तस्य मधुरं जायते [1]भृशम् ।
अङ्कोल्लक(क)थनं [2]स्वि(नस्वि)न्नं [3]श्वमांसं छागदुग्धयु[4]क् ॥९०॥

पिण्याकसहितं मूले सहकारस्य निक्षिपे[5]त् ।
द्राक्षावल्ली[6]समाकारः[7] सहकारः[8] सदाफलः[9] ॥ ९१ ॥

जायते निश्चितं दत्तं[10](त्ते) सर्वेषामद्भुतं हृदि ।
वृक्षस्य फलिता शाखा सप्तवेष्टनवेष्टिता ॥ ९२ ॥

सन्धौ कृष्ण[11]स्य दात्रस्य चर्मणा गलजन्मना ।
ईदृ[12]ग्विधेन बन्धेन[13] गाढ[14]संयोजिता सती ॥ ९३ ॥

पाके[15]न रहि[16]तं दत्ते सर्वदा हरितं फलम् ।
कृकाटी[17]चर्मणा बद्धा शाखा[18] छागस्य सन्धितः ॥ ९४ ॥

अपक्वं फलमादत्ते यस्य कस्यापि[19] भूरुहः ।
बाल[20]कूष्माण्डकस्यान्तर्म[21]धुसर्पियु(र्यु)तं क्षिपेत् ॥ ९५ ॥

वार्ताक[22]बीज[23](जं)यत्नेन पादा(पक्षा)न्ते तत्समुद्धरेत्[24] ।
तदुप्तं जनयेद्व[25]ल्लीं [26]कूष्माण्डदलसंयुता[27](म्) ॥ ९६ ॥

फलानि तत्र जायन्ते वार्ताकान्येतदु[28](द)द्भुतम् ।
यवमाषतिलव्रीहि[29]चूर्णाः[30](र्णैः)सङ्कुषितामिसैः[31] (षैः) ॥ ९७ ॥

सिक्ता जलयुतै[32]श्चिश्वा निश[33]या धूपि[34]ता भृशम् ।
सुखा(स्वा)[35]दुफलशो[36]भाढ्या [37]वल्लीरूपेण वर्तते ॥ ९८ ॥

चित्रमेतत्समाख्या[38]तं वृक्षाणां तत्र योग[39]तः ।
ईदृग्विधवनस्या[40]न्तः कृतशैले मनोहरे ॥ ९९ ॥

---

१. A. भ्र । २. A. लकथनं वित्तं । ३. A. स्व । ४. A. व्यु । ५. A. पे । ६. A. ती । ७. A. र । ८. A. र । ९. A. ल । १०. A. ते । ११. A. ष्णुस्पदांतस्य । १२. A. द्ररिग्वधेन । १३. A. नवंधेना । १४. A. ढं । १५. D. को । १६. A. वित्रं । १७. A. टि । १८. A. षा । १९. A. मि । २०. A. कु । २१. A. मधुर्सार्प्पे । २२. D. की A. र्त्ताक । २३. A. जे । २४. A. तः । २५. A. दूल्ली । २६. A. कु । २७. D. तं । २८. A. द्रुद्भम् । २९. A. ह्वि । ३०. A. र्णा । ३१. A. सौ । ३२ A. तेश्चिवा । ३३. A. शा । ३४. A. प । ३५. D. प । ३६. A. सो । ३७. A. बलि । ३८. A. खा । ३९. A. गं । ४०. A. स्पांता ।

CC0. In Public Domain, Digitizagtion by eGangotri

[1]कृत्रिमान्[2] रचयेद्[3] वृक्षान्[4] सरांसि स[5]रितस्तथा।
हरित्पट्ट[6]कृतैः[7] पत्रैः[8] पुष्पैः[9] काञ्चननिर्मिते(तैः) ॥ १०० ॥

फलैः[10] प्रवालघटितै[11]रै[12]प्यशाखामहीरुहान्।
विशालाञ्शी[13]तलच्छा[14]यान् बहुभङ्गिविनिर्मि[15]तान् ॥ १०१ ॥

सुगन्धिपुष्पस्तबका[16]न्सुधास्वादु[17]फलान्वितान्।
[18]शङ्खनिर्मितहंसाद्य[19](ढ्यं) निर्मलो[20]दक[21]पूरितम्।
पो[22]तिका[23]कदलीकीर्ण(र्णं)कनत्का[24]ञ्चनपङ्कजा[25]न्(जम्)॥ १०२॥

इन्द्रनी[26]लविनिर्वृ[27]त्तं(त्त)नवेदी[28](न्दी)वरभूषि[29]तम्।
दिग्व[30]धूदर्पणाकारं गिरौ कुर्यात्सरोवर[31]म् ॥ १०३ ॥

सूक्ष्ममुक्ताफलैः[32] [33]क्लृप्तवालुकापुलिनस्थलम्।
कुङ्कुमोदकसम्पूर्णाः कुल्याः[34] कुत्रापि कारयेत् ॥ १०४ ॥

विधायैवंविधं शैलं ततः[35] सान्द्र[36]मुदान्वितः[37]।
प्रसाद[38]वित्तकैः सार्धं[39] प्रेयसीभिः समन्वितः ॥ १०५ ॥

राजभिः[40] सहि[41]तान्पुंसः पण्डितात्सु[42](न्सु)विचक्षणा[43]त्(न्)।
समाहूय महीपालः[44] कृतशृङ्गारशोभित[45]म् ॥ १०६ ॥

वरं वाहं समारुह्य लीलागमनम[46]ण्डितम्।
हेम[47]किङ्किणिकानादै[48]र्ज्वल(जल्प)न्तमिव शोभनम् ॥ १०७ ॥

पुण्डरी[49]ककृतच्छाया(य)सितचामरवी[50]जिनम्(तः)।
पुरन्दर[51]इव श्रीमा[52]न् विबुधैः[53]परिवारितः ॥ १०८ ॥

---

१. A. कतिमां। २. A. रं। ३. A. त्। ४. D. रसी। ५. A. द। ६. A. ते। ७. A. त्रै। ८. A. ष्पै। ९. A. नमितैं। १०. A. लैं। ११. A. तौं। १२. D. गंध्य १३. A. ली। १४. A. च्चा। १५. A. मित। १६. A. की। १७. A. पलान्वित। १८. A. शांक्षा। १९. A. द्य। २०. A. लौं। २१. A. धूंपतं। २२. D. यो। २३. A. च। २४. A. न्काच। २५. A. जा। २६. A. नि। २७. A. वृतं। २८. A. न्दावरं। २९. A. षि। ३०. A. ग्धधु। ३१. A. र। ३२. A. लैं। ३३. A. कु। ३४. A. ल्यां। ३५. A. त। ३६. A. द्र। ३७. A. त्विता। ३८. A. वित D. चिन्त। ३९. A. ध्वं। ४०. A. सि। ४१. A. हतात्पुंस। ४२. A. सु। ४३. A. णा। ४४. A. ल। ४५. A. ता। ४६. A. माहितम्। ४७. A. पकिकणि। ४८. A. घैज्वलपतमिव। ४९. A. रिकक। ५०. A. वि। ५१. A. द्र। ५२. A. मावि। ५३. A. रिवारितम्।

Dr. Urmila Sharma Collection, Varanasi

अप्सरोधिकरम्या[1]भिर्मि[2]ह(र्महि)लाभिरूपा[3]सितम् (तः)।
शनैः[4] शनैः सुखं[5] गत्वा पर्यन्तं[6] वनमाविशेत् ॥ १०९ ॥

नेत्रानन्दकरान् [7]वृक्षान् चे(क्षांश्चे)तसो [8]भ्रान्तिदायकान् ।
दर्शयन्ह[9]रिणाक्षीणां [10]व(प)रिमण्डलिकाम(न)पि ॥ ११० ॥

समारोहेत्ततः[11] शैलं[12] पुष्पकं राघवो यथा ।
कल्पपादपशा[13]खाभं प्रसार्य भुजमायतम् ॥ १११ ॥

[14]विक्रमात्परभूपाललक्ष्मीरिवसमाहृताः[15] (हृताः) ।
आ[16]कृष्य तरुणीं[17] (णीः)शैले[18] तस्मिन्नारोपयेन्नृपः[19] ॥ ११२ ॥

परिवारजना(नां)श्चै[20]व परदेशसमागताः[21] (तान्) ।
आरोहये[22]त्प्रियैर्वाक्यैर्बहुमानपुरः[23] सरम् ॥ ११३ ॥

प्रवालफलभूइष्टा(यिष्ठा)न्हरिप(त्प)द्दलान्वितान् ।
सुवर्ण[24]कुसुमोदारान् रत्नपक्ष[25](त्र)विराजितान् ॥ ११४ ॥

कल्पवृक्ष[26]कृतस्पर्धान्[27] कृत्रिमान्ध[28]रणीरुहान् ।
सरः कनकपङ्केन राजितं [29]वार(रि)पूरितम् ॥ ११५ ॥

रत्नवालुकया चम्पाश्री[30] खण्डक्षोद[31]पङ्किलम् ।
चन्द्रकान्तशिला[32]युक्ता[33](क्तां)[34]कुङ्कुमोदकवाहिनी(नीम्) ॥११६॥

वाहिनीं[35] दर्शयेद्राजा[36] चित्तलोचनहारिणी[37](म्) ।
[38]नीलोत्पलदला[39]क्षीणां परिवारजनस्य च ॥ ११७ ॥

क्रीडन्ति तत्र कामिन्यो मरालगतिशोभिताः[40] ।
चक्रचारुकुचद्वन्द्वा विकासिकमला[41]ननाः ॥ ११८ ॥

---

१. A. स्था । २. A. र्मह । ३. A. पासित । ४. A. शनैसनै । ५. A. षं । ६. A. तं । ७. A. वक्षाएत । ८. A. भ्राति । ९. A. न्करिणां क्षीणां । १०. A. पंर । ११. A. त । १२. A. ला । १३. A. षा । १४. D. वक्रिमापरभूपालोलक्ष्मी A. विक्रमात्परभूपालक्ष्मी । १५. D. वृत्ता । १६. A. क्र । १७. A. णा । १८. A. लं । १९. A. न्नपा । २०. A. च्चं । २१. A. ता । २२. A. प्रि । २३. A. र । २४. A. र्णौनुसुमौ । २५. A. त्क । २६. A. वृ । २७. A. र्द्धाक्ष्रि । २८. A. नुध । २९. D. वाप्र । ३०. A. षंड । ३१. A. पंकिला । ३२. A. भा । ३३. D. क्ताः । ३४. A. कुकु । ३५. A. नी । ३६. A. जवित । ३७. A. णि । ३८. A. नि । ३९. A. क्षा । ४०. A. ता । ४१. A. तानना ।

CC0. In Public Domain, Digitizagtion by eGangotri

चित्ररत्नतरो[१]र्मूले [२]स्फटिकोपलवेदिके[३] ।
उपविश्य महीनाथो[४] दिव्यरत्नफलं बहु ॥ ११९ ॥

कनका(त्का)ञ्चनपुष्पाणि दिव्याम्बरदलानि च ।
दद्यात्प्रसादपात्रेभ्यः[५] परिमण्डलि[६]नेऽपि च ॥ १२० ॥

ततो[७] विसर्जि[८](सृज्य)तान् सर्वान् रमणीभिः[९] [१०]समावृतः ।
राजते पृथिवीनाथः[११] शक्रो वाप्सरसां गणैः ॥ १२१ ॥

क्वचिच्च पादपच्छाये क्वचिच्च सरितां[१२] तटे ।
क्वचिच्च सरसीती[१३]रे क्रीड[१४]ति [१५]क्षितिवल्लभः[१६] ॥ १२२ ॥

गाप[१७]येत्कलकण्ठीश्च व[१८]र्त्त(नर्त)येल्ललि[१९]ताङ्गनाः[२०] ।
हासयन्त[२१]रुणी[२२]वृन्दमानन्दं परमाप्नुयात् ॥ १२३ ॥

अन्यसङ्क्रान्तगन्धानि पुष्पाणि रुचिराणि च ।
मण्डनार्थं[२३] समाहृत्य तरुणी[२४]भ्यः सम[२५]र्पयेत् ॥ १२४ ॥

ततोऽवरो(रु)ह्य शैला[२६]ग्रादारुह्य वरवारणम् ।
आगच्छेत्स्वपुरं श्रीमान् दिव्यतूर्यविराजितः ॥ १२५ ॥

इतीयं भूधरक्री[२७]डा [२८]कुतूहलकरी नृणाम् ।
भूलोकमल्ल[२९]देवेन कथिता [३०]ख्यातकीर्त्तिना ॥ १२६ ॥

(इति भूधरक्रीडा ॥१॥)

सुरम्या[३१] च[३२] वनक्रीडा कथ्यते विस्तरेण तु ।
व्यती[३३]ते शिशि[३४]रे राजा क्रीडां कुर्याद्वनाश्रयाम् ॥ १२७ ॥

[३५]ऋतौ वसन्ते [३६]सम्प्राप्ते दक्षिणे [३७]मलयानिले ।
[३८]शीतले सुखसंस्पर्शे पुष्पगन्धमनोहरे ॥ १२८ ॥

---

१. A. मू । २. A स्फु । ३. A. की । ४. A. थो । ५. A. भ्य । ६. A. ल । ७. A. ते । ८. A. जि । ९. A. भि । १०. A. ससावृत । ११. A. थ । १२. A. ता । १३. A. ति । १४. A. डंति । १५. A. क्ष । १६. D. भाः । १७. A. य । १८. A. र्त्त । १९. A. ल । २०. A. ना । २१. A. स्त । २२. A. वृंदे । २३. A. र्थ्वे । २४. A. णिनां । २५. A. मां । २६. A. ली । २७. A. इतियभूधराक्षिडा-तु । २८. A. कुतुहलकरि D. कुतूहळकरी । २९. A. ल । ३०. A. कांत । ३१. A. स्या । ३२. A. वचन । ३३. A. ति । ३४. A. श । ३५. A. क्र । ३६. A. संप्र । ३७. A. सलयानिलो । ३८. A. drops this word ।

Dr. Urmila Sharma Collection, Varanasi

नागकेसरपुन्नागचू[1]तचम्पकरेणुभिः[2] ।
[3]पिञ्जरे मारुते वापि (ति) दिग्वधूमुखरञ्जने ॥ १२९ ॥

सङ्गतप्रियस[4]ङ्गीते विमुक्त[5]रुदितेऽनुगे ।
तरुणीहृदयोल्लासे कोकिलानि[6]स्वने सति ॥ १३० ॥

पुष्पिते सहकारौ[7]घे प्रफुल्ले चम्पकद्रुमे ।
प्र[8]सूनरम्ये बहु(कु)ले केसरे कुसुमोर्जिते[9] ॥ १३१ ॥

*जम्बीरसुमनोगन्धे पाटलाप्रसवो[10]त्कटे ।
विकसन्मुचुकुन्दाद्यैः[11](न्दौघैः) सुर[12]भीपुल्ल(भ्युत्पल)शोभिते ॥१३२॥

कर्णिकारे(र) सुवर्णाभे(भ) रक्ताशोकसुरञ्जिते ।
माधवीस्तबकैः [13]शुभ्रैर्वल्ली चम्पकमेव च (भिश्चम्पकैस्तथा)
॥ १३३ ॥

निवि[14]डैः क्रमुकैर्भव्यैः पङ्क्तिस्थैः सरलैः[15] शुभैः[16] ।
पयोधरफलाक्रान्त[17]नारिकेलैर्मनोहरैः[18] ॥ १३४ ॥

सिन्दुरारुणवर्णाढ्यफलैर्नारङ्गभूरुहैः ।
सुवृ[19]त्तकुचसङ्काशः(श) फलैरेवाय[20]तद्रुमैः ॥ १३५ ॥

फलेनैकेन लो[21]कानां [22]तृप्तिमुत्पादयामहे ।
इती[23]व जातरोमाञ्चकण्टकैः पनसद्रुमैः ॥ १३६ ॥

कदलीखण्डकैर्भव्यैः सूर्यातपनिवारकैः ।
[24]पक्तिश्च(कैश्च)फलगुच्छै[25]श्च शोभितै[26]श्च व[27]नान्तरैः ॥ १३७ ॥

नीपनीवारजम्बीरजम्बुवृक्षैरलङ्कृतैः ।
कपित्थैर्लकुचै[28]राम्रैः[29] प्राची[30] नाम[31]लकैस्तथा ॥ १३८ ॥

---

१. A. चुनृ । २. A. भि । ३. A. पिजेरे । ४. A. संगते । ५. A. क्ति । ६. D. निः । ७. A. रोये । ८. A. सुंनु : ९. A. ता । १०. D. त्तरे । ११. A. घैः । १२. A. भीत्पुरभील्लशोभिते *This stanza is repeated here after 132 । १३. A. श्वभ्रैर्धलिचम्पक । १४, A. वि । १५. A. लै । १६. A. भै । १७, A. नालिकेरै । १८. A. रै । १९. A. त । २०. A. र । २१. A. लौंकाना । २२. A. त्रृप्तिमुत्पातयोमहो इतीव जातरोमांचै कंटकैः पनसद्रुमे । २३. D. इत्येवं । २४. This line is omitted in D । २५. A. च्छेश्च । २६. A. तेश्च । २७. A. नंतरो । २८. A. चे । २९. A. म्रै । ३०. A. चि । ३१. A. कलै ।

CC0. In Public Domain, Digitizagtion by eGangotri

दाडिमै[1]र्बीजपूरैश्च लवङ्गैश्च नवद्रुमैः ।
सिध्रि[2]कान्ता(ता)ल[3]हिंता(न्ता)ल[4]तिलकैः[5] [6]सरलद्रुमैः ॥ १३९ ॥

खर्जूरी[7]केतकीखण्डैर्मल्लिकाविटपैरपि ।
तगरैः[8] शतपत्रैश्च सुगन्धैः[9] करवी[10]रकैः ॥ १४० ॥

[11]वर्णकैर्जल(लु)कावर्णैः[12] पीतैः कृष्णैः[13] कुरण्टकैः ।
हरिद्राश्रृङ्गवेरैश्च [14]सारणैः करिकर्णकैः ॥ १४१ ॥

दमनैर्मरु[15]कैश्चैव स्थाने स्थाने विराजिते ।
विलम्बिकलगुच्छाढ्यद्राक्षामण्डपमण्डिते[16] ॥ १४२ ॥

प्रभूतफल[17]सञ्छन्ने करंवर(रमर्द)महीरुहैः[18] ।
क्षीरिकावृक्षगहने तालगुल्मोपशोभिते[19] ॥ १४३ ॥
